व्याख्या - इह अपरोक्षतत्त्वज्ञानबोधकशास्त्रे चतुष्टयं साधनं भवतीति सूरिभिः निगदितम्। तत्र प्रथमं साधनम्, इदं नित्यम् इदमनित्यमिति नित्यानित्यवस्तुनोः विविच्य ज्ञानम्। ततः परम् इहामुत्रविरागः - ऐहिके आमुत्रिके वा कर्मफलभोगे विरागः विरक्तता। तृतीयञ्च वक्ष्यमाणस्वरूपाणां शमादीनां षट्कम्। अन्तिमं च मोक्षेच्छा। सा च मोक्षेच्छा कीदृशी इति चेत् इदं जगन्मिथ्या, परं ब्रह्मैव सत्यम् इति सामान्यपरिज्ञानात् सांसारिके भोगे विरतिः, संसारबन्धाच्च आत्मानं मोक्तुमिच्छा चेति। (१)

२, ३.

द्वाभ्यां शमादीनाह।

शमो दमश्चोपरतिस्तितिक्षा श्रद्धा समाधानमितीह षट्के[9]।
लक्ष्यैकतानत्वमुशन्ति शान्तिं चित्तस्य बाह्यार्थविनिग्रहो दमः।। २।।
न्यासं वदन्त्युपरतिं सहनं शुचां यत्
क्षान्तिं च देशिकवरोदितशास्त्रमार्गे।

---

8. *Vera* reads as मोक्षश्चेति. The editor has missed that the commentary thereon has the reading मोक्षेच्छेति च.

9. *Vera* reads as षट् ते.

श्रद्धाऽतिविश्वसनमात्मपरैक्यमात्रे
धीस्थापनं खलु वदन्ति समाधिमार्याः।। ३ ।।[१०]

अन्वयः - शमः, दमः, उपरतिः, तितिक्षा, श्रद्धा, समाधानं चेति षट्के इह लक्ष्यैकतानत्वं शान्तिमुशन्ति। चित्तस्य बाह्यार्थविनिग्रहो दमः। न्यासम् उपरतिं वदन्ति। शुचां सहनं क्षान्तिं च। देशिकवरोदितशास्त्रमार्गे यद् अतिविश्वसनं तत् श्रद्धा। आर्याः आत्मपरैक्यमात्रे धीस्थापनं समाधिं च खलु वदन्ति।

व्याख्या - शमादयः इमे षट् - शमः, दमः, उपरतिः, तितिक्षा, श्रद्धा, समाधानं चेति। क्रमेण तेषां स्वरूपाण्युच्यन्ते। चित्तस्य लक्ष्यैकतानत्वम्, अर्थात् अन्तःकरणस्य विनिग्रहः शम इत्युच्यते। बाह्यार्थेषु मनसो विनिग्रहः, अर्थात् विषयेभ्यः बहिरिन्द्रियाणां विनिवर्तनं दमः। सांसारिकव्यवहारे जायमानानां सुखदुःखादीनामनुभवानां न्यासं, परित्यजनम् उपरतिं वदन्ति। कामक्रोधादीनां क्षान्तिरेव, सहनमेव, तितिक्षाशब्देन उच्यते। गुरुवचने शास्त्रोदितार्थे च सुदृढो विश्वासः श्रद्धेत्युच्यते।। जीवब्रह्मैक्यबोधे मनसः स्थापनमेव समाधानमिति आत्मविद्याविचक्षणाः प्राहुरिति। (२,३)

४.

प्रोक्तं साधनचतुष्टयम् अपरोक्षतत्त्वज्ञानस्य अनुपेक्षणीयम् अधिकारसम्पादकञ्चेत्याह -

त्यक्त्वा साधनसञ्चयं नहि भवेत् साध्यः प्रबोधो नृणां
तस्मात्साधनशालिनामिह भवेद् ब्रह्मात्मबोधोदयः।
प्रत्यग्रस्य हि साधकस्य न भवेत् स्याच्चेत्क्वचित् कस्यचित्
जन्मस्तोमशतैः कृतेन तपसेत्येवं सतां निश्चयः।। ४।।

अन्वयः - साधनसञ्चयं त्यक्त्वा नृणां प्रबोधः साध्यः नहि भवेत् । तस्मात् साधनशालिनाम् इह ब्रह्मात्मबोधोदयः भवेद् । क्वचित् कस्यचित् प्रत्यग्रस्य साधकस्य (तत्) न भवेच्चेत् जन्मस्तोमशतैः कृतेन तपसा एव तदिति सतां निश्चयः।

व्याख्या - साधनं विना साध्यं न हि भवति। इह च साध्यं प्रबोधः। किंरूपः प्रबोधः? ब्रह्मात्मबोधः। सच्चिदानन्दं ब्रह्मैवाहम् इति बोधः। तस्य उदयः उक्तं

10. ***Vera*** has an additional stanza after this. It runs as अहमोऽज्ञानसमुत्थादात्मज्योतिरावृतेस्तूर्णम्। निजरूपबोधमात्रादिच्छा मोक्तुं मुमुक्षुता कथिता।।

साधनचतुष्टयं विना न हि भवति। अन्वयेन व्यतिरेकेण च व्याप्तिस्तयोः। कदाचित् कस्यचित् नवीनस्य साधकस्य साधनचतुष्टयं विनापि ब्रह्मात्मबोधोदयः दृश्यते किल इति चेत् जन्मान्तरशतैः कृतेन तपसा एव साधनसम्पत्तिः आर्जितेति मन्तव्यम्। एवं सतां विनिर्णयः इति। (४)

५, ६.

अस्मिन् अपरोक्षतत्त्वशास्त्रे कोऽधिकारी इति पद्यद्वयेन दर्शयति।

कश्चित्कोटिशतेषु देहिषु नरो देहोत्थितैर्व्याधिभि-
र्दैवादापतितैरथाक्षजनितैर्भूतोत्थितैर्भौतिकैः।
दुःखैर्नित्यसुपीडितोऽर्ककिरणैस्सन्तप्तकीटो यथा
भीतस्संसृतिमोक्षणाय चकमे प्राप्तुं स्वतत्त्वामृतम्।। ५।।

एषोऽधिकारी सुतदारवित्तवाञ्छा विलूयैण इवाथ जालम्।
धावन्[11] समित्पाणिरशेषतत्त्ववेत्तारमेवाप गुरुं शरण्यम्।। ६ ।।

अन्वयः - कोटिशतेषु देहिषु कश्चित् नरः देहोत्थितैर्व्याधिभिः दैवात् आपतितैः तथा अक्षजनितैः भूतोत्थितैर्भौतिकैः (च) दुःखैः यथा अर्ककिरणैः सन्तप्तकीटः (तथा) नित्यसुपीडितः भीतः संसृतिमोक्षणाय स्वतत्त्वामृतं प्राप्तुं चकमे। अधिकारी एषः सुतदारवित्तवाञ्छाः, एणः जालमिव, विलूय समित्पाणिः धावन् अशेषतत्त्ववेत्तारं शरण्यं गुरुमेवाप।

व्याख्या - वेदान्तशास्त्रे स एवाधिकारी भवति यः संसारतापतप्तः कथञ्चित् तस्मादात्मानं मोचयित्वा नैजे परमानन्दपदे स्थातुं हृदयेन वाञ्छतीति दर्शयति। तादृशश्च नरः कोटिशतेषु देहिषु कश्चित्सुदुर्लभः। सः शरीरजैः रोगैः इन्द्रियजैः आधिदैविकैः आधिभौतिकैश्च दुःखैः नित्यसुपीडितः कथञ्चित् तस्मात्तापाद् बहिरागन्तुं वाञ्छति। यथा मध्याह्ने प्रचण्डांशोः भानोः दीप्तरश्मिभिः सुतप्तः कीटः उत्कटं वाञ्छति ततोऽपगन्तुं तथा यः सर्वात्मना संसारतापादात्मानं मोचयितुं वाञ्छति स एवाधिकारी। तस्य सामान्यं ज्ञानमस्ति यत् संसारोऽयं स्वयङ्कृतानर्थः, वास्तवं निजं स्वरूपं च अमृतशीतळमिति। किन्तु तन्नैजं स्वरूपं पुनरधिगन्तुं मार्गः क इति न जानाति। सः एषणात्रयरूपाद् जालबन्धाद् आत्मानं कथञ्चिद् उन्मुच्य, जालं विलूय एण इव धावति। अतिवेगेन, यथा प्रदीप्तशिराः जले

11. ***Vera*** reads wrongly as यावान्.

पतति तद्वत् स गुरुम् उपसर्पति। कश्च गुरुः? अशेषवेत्ता शरण्यश्च। यः अधिगतपरमार्थः, यः सर्वं खल्विदं ब्रह्म इति जातबोधः, यस्य ज्ञानं स्फीतं निर्मलञ्च। तथा सर्वभूतात्मभावाद् अहैतुकदयासिन्धुः शरणे योग्यश्चेति। यः अभयं ब्रह्म प्रापयितुं योग्य इति। (५,६)

७.

तस्य गुरुपसत्तिं वर्णयति।

नत्वा तिष्ठन् स गुरुसविधे मूर्ध्नि बद्धाञ्जलिस्सन्
प्राह स्वामिन् विषयगरळैर्मायिकैर्दूनदूनः।
छित्वा कोशान् हृदयमपि मे साधु शीतं विधातुं[12]
श्रीमन् बोधामृतशिशिरया मां गिरा बोधयेति ।। ७ ।।

अन्वयः - मायिकैः विषयगरळैः दूनदूनः सः गुरुसविधे मूर्ध्नि बद्धाञ्जलिः सन् तिष्ठन् नत्वा प्राह। स्वामिन् श्रीमन्! कोशान् छित्वा मे हृदमपि शीतं विधातुं मां बोधामृतशिशिरया गिरा साधु बोधयेति ।

व्याख्या - सः गुरुं समुपेत्य सप्रश्रयं नतः साञ्जलिबन्धम् उवाच। दूनदूनः भृशं खिन्नः मिथ्याभूतैः विषयविषैः सन्तप्तः सः किमुवाच? मां बोधयेति। अमृतशीतळया वाचा बोधयेति। यो बोधः जनिष्यते सः परमसुखस्वरुपोऽहमिति शीतळिमैव। तद्बोधकानि वचांस्यपि शीतळानीति। अन्नमयादीन् पञ्च कोशान् छित्वा मे हृदयं शीतं विधातुं मत्स्वरूपं मां बोधयेति प्रार्थयति शिष्यः। (७)

८.

दीक्षाविधिमाह -

कमठझषवयांसीवादरात् स्मृत्युदीक्षा-
च्छद[13]युगपुटमध्यस्पर्शनैर्दीक्षयित्वा।
अमुमथ गुरुराह त्वज्जनिं मार्जयिष्या-
म्यहमपि मम वाक्यं श्रूयते चेत् सुभक्त्या।। ८ ।।

अन्वयः - गुरुः अमुं कमठझषवयांसीव स्मृत्युदीक्षाच्छदयुग पुटमध्यस्पर्शनैः दीक्षयित्वा आदरात् अथ आह, 'मम वाक्यं सुभक्त्या श्रूयते चेत् त्वज्जनिं

12. ***Vera*** reads as विधाय.

13. ***RSV*1** and ***RSV* 2** read छय.

मार्जयिष्यामि' इति।

व्याख्या - गुरुः शिष्यं स्नेहेन आदरेण च दीक्षाभिस्तिसृभिरपि दीक्षयित्वा प्राह। मम वाक्ये सुभक्तिरस्ति चेत् श्रद्धा अस्ति चेदेव उपदिशामीति। तव भवसरणौ पुनरपि जनिं निर्मार्जयिष्यामि निश्चयेनेति। अत्र गुरूपदेशे शास्त्रवाक्ये च श्रद्धातिशयः अधिकारिणः अनुपेक्षणीयः इति दर्शितम्।

त्रयो दीक्षाप्रकाराश्च इमे - स्मृतिदीक्षा, ईक्षणदीक्षा, स्पर्शदीक्षा चेति। कमठः स्थले निक्षिप्तमण्डजातं जले स्थित्वा सदैव स्मरति। स्मरणेन रक्षति, दिशति च अण्डाद् बहिरागन्तुं शिशून्। एवमेव झषः दृष्ट्या अण्डजातं रक्षति साहाय्यमाचरति च शिशूनाम् अण्डोद्भेदनाय च। पक्षिणोऽपि अण्डानामुपरि छदयुग्मस्पर्शोष्णेन पक्षयोः स्पर्शेन क्षमया तान् रक्षति सहायो भवत्यण्डोद्भेदनाय। एवं गुरुः साधकं दीक्षाभिः तिसृभिः तन्त्रमार्गे दीक्षयति। (८)

९,१०.

शिष्यस्य सर्वात्मना गुरुप्रपत्तिं वर्णयति द्वाभ्याम्।

संलग्नघोरभवरोगनिवृत्त्युपायं
वक्तर्यथो गुरुवरेऽमृतमग्नवत्सः।
आर्द्राङ्गकोऽक्षिविगळत्सुखवारिपूर्णः
प्राह प्रणम्य पुनरेव विनीतगात्रः।। ९ ।।

त्वद्वाक्यश्रवणाक्षमोऽपि भगवन् कारुण्यदृष्ट्या विभो
स्वाधीनं प्रविधातुमत्र किल मां को वा प्रयासस्तव।
त्वज्जन्मक्षतयेऽस्त्युपाय[14] इति यन्मां प्रत्यवोचः पुरा
तत् स्वामिन् सपदि प्रदर्श्य कृपया मां रक्ष रक्षेति च ।। १०।।

अन्वयः - अथो गुरुवरे संलग्नघोरभवरोगनिवृत्त्युपायं वक्तरि सः अमृतमग्नवद् आर्द्राङ्गकः अक्षिविगळत्सुखवारिपूर्णः विनीतगात्र एव पुनः प्रणाम्य प्राह।

"हे भगवन् (अहं) त्वद्वाक्यश्रवणाक्षमः किल स्याम्। तथापि हे विभो कारुण्यदृष्ट्या मां स्वाधीनं प्रविधातुं तव को वा अत्र प्रयासः? 'त्वज्जन्मक्षतये उपायः अस्ति' इति यन्मां प्रति अवोचः स्वामिन् सपदि तत् प्रदर्श्य कृपया मां रक्ष रक्ष च।" इति।

---

14. ***Vera*** wrongly reads as उपायमिति.

व्याख्या - घोराद् भवरोगात् निवृत्त्युपायं वक्तुं यदा गुरुवरः प्रवृत्तः तदैव अमृताप्लुत इव शीतळिमनि मग्नमग्नः स शिष्यः सन्तोषाश्रुपरिपूर्णनेत्रः आर्द्राङ्गकः अङ्गविक्षेपादिभिः प्रकाशितहृदयगतविनयभरः सादरं गुरुं प्रोवाच इति।

यद्यप्यहं त्वदुपदेशावगमाय असमर्थः स्यां कदाचित्, तथापि कृपया त्वया नोपेक्षणीयः इति। यद्यप्यहं मन्दबुद्धिः तथापि करुणामयेन कटाक्षेण मां सुधियं कर्तुं समुद्धर्तुं च सुकरमेव भवतामिति। जन्मसन्तत्युच्छेदाय मार्गः अस्तीति यद् भवतोक्तं तच्छ्रवणेनैव महानानन्दो जातः। कृपया झटिति तमुपायं दर्शयित्वा अस्मात्संसारतापाद्रक्ष इति प्रार्थयच्च। रक्ष रक्षेति वीप्सा श्रवणे महतीं त्वरां सूचयति। (९,१०)

११.

गुरुः उपदेशाय प्रक्रमते।

प्रत्याहृताक्षनिचयं परमप्रशान्तं
योग्योऽयमित्यथ गुरुः प्रणिधाय चित्ते।
ब्रह्मीविधातुमपि भृङ्गककीटवत्तं
श्रोतारमाह कृपया परमात्मतत्त्वम् ।। ११ ।।

अन्वयः - अथ गुरुः परमप्रशान्तं प्रत्याहृताक्षनिचयं (तम्) अयं योग्यः इति चित्ते प्रणिधाय श्रोतारं तं भृङ्गककीटवत् ब्रह्मीविधातुं अपि परमात्मतत्त्वं कृपया आह।

व्याख्या - संयतेन्द्रियग्रामः अयम् अधिकारी इत्याकलय्य करुणावारिधिर्गुरुः श्रद्धावन्तं तत्वं श्रोतुकामं तं ब्रह्मीविधातुं परमात्मतत्त्वम् उपदिदेश इति। उपदेशेन किं भवति? ब्रह्मीभवति। तदाह ब्रह्मीविधातुमिति। यथा भ्रमरः कीटमन्तर्निधाय तन्निविष्टचेतसं अभ्रमरमपि भ्रमरं करोति तद्वदिह वस्तुतः यः ब्रह्मैव भवति तं शिष्यं जीवात्मानं ब्रह्मभिन्नभ्रान्त्याः सन्निवर्त्य ब्रह्मैव कर्तुं ब्रह्मीकर्तुम् उपदिदेश इति।

अत्र इदं श्रद्धेयम्। ब्रह्मीविधातुम् इत्यत्र च्विः चिन्त्य एवेति। कृभ्वस्तीनां योग एव च्विः विहितः (अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः)। ब्रह्माविधातुम् (ब्रह्म आविधातुम्) इति पाठः स्वीकर्तुं शक्यते। (११)

१२.

अखण्डचितिरूपोऽहम् इति निश्चयज्ञानमेव संसारनिवर्तकं भवतीत्युपदिशति।

वत्सायाह्ययि मामकं शृणु परब्रह्मैक्यबोधोज्झिताः
ये मर्त्याः पुनरेव जन्म च समेत्यात्र भ्रमन्त्यातुराः।
ते चक्रानिलधूतघासतुलितास्तत्कालवेगादध-
श्चोर्ध्वं यावदहं परशिशव इति ज्ञानं न विन्दन्त्यमी।। १२ ।।

अन्वयः - अयि वत्स आयाहि। मामकं (वक्ष्यमाणं वचः) शृणु। ये मर्त्याः परब्रह्मैक्यबोधोज्झिताः पुनरेव जन्म समेत्य च आतुराः (सन्तः) अत्र भ्रमन्ति तेऽमी यावत् 'अहं परशिशवः' इति (तद्) ज्ञानं न विन्दन्ति (तावत्) कालवेगात् चक्रानिलधूतघासतुलिताः अधऊर्ध्वं भ्रमन्ति।

व्याख्या - मरणशीलाः मर्त्याः नैजं परमानन्दस्वरूपम् अखण्डानन्दस्वरूपं विस्मृत्य घटीयन्त्रवत् चक्रवाते आपतिततृणतुल्याश्च परतन्त्राः अध ऊर्ध्वं भ्रमन्ति। कियत्पर्यन्तं भ्रमन्ति? यावत्तेषाम् अहं परशिशव इति बोधः उदेतीति।

वस्तुतः अखण्डानन्दो भवति स्वस्य रूपम्। तद्भिन्ने अहमिति भ्रमः यदा जातस्तदा तदीया धर्माः 'मदीय'तामापन्नाः। निजस्वरूपम् आत्मनः अन्यज्जातम्। किन्तु आनन्दमयं निजं स्वरूपं पुनः आसादयितुम् उत्कटवाञ्छा जागर्ति। अत एव हि सर्वो जन्तुः सुखमभिलषति। तद्धि नैजं रूपम्। यावत् तन्नैजम् अखण्डानन्दस्वरूपं पुनः प्राप्नोति, अथवा प्रत्यभिजानाति तावत् संसारेभ्रमो भवेदिति। (१२)

१३.

जन्मक्षतये उपायः पृष्टः किल शिष्येण। तमाह -

स्वञ्च स्वाधारमीशं भुवि विबुधवरो वेत्ति चेत् स स्वयं स्याद्
भूत्वा ब्रह्मैव तिष्ठन् यदि जनिमृतितो मुच्यते तत्क्षणेन।
वेत्सि त्वं त्वां सुपूर्णं नहि तव विहतिः कल्पकालेऽपि नूनं
यस्मान्मामेत्य भक्त्या[15] कृतबहुविनयः [16]पृष्टवांस्तन्मयोक्तम्।। १३।।

अन्वयः - भुवि विबुधवरः स्वं स्वाधारम् ईशं (च) स्वयं वेत्ति चेत् सः ब्रह्म एव भूत्वा तिष्ठन् तत्क्षणेन जनिमृतितः मुच्यते। त्वमपि सुपूर्णं त्वां यदि वेत्सि

15. ***Vera*** wrongly reads as भक्त्यां.

16. ***Vera*** reads as पृष्टवन्तं मयोक्तम्. However the commentary clearly says त्वञ्च यस्मान्मामेत्य भक्त्या पृष्टवान् अत इदमित्थं परिज्ञानमेव मोक्षसाधनं मुमुक्षोरिति मयाप्युक्तम् ....

चेत् तव कल्पकालेऽपि नूनं न हि विहतिः स्यात्। यस्मात्त्वं मां भक्त्या एत्य कृतबहुविनयः सन् पृष्टवान् तत् मयोक्तम्।

व्याख्या - यः स्वं जीवात्मानं, स्वाधारं कूटस्थचैतन्यं, ईशम् ईश्वरं, साक्षिणं च स्वयं वेत्ति — नाम यो नरः, जीवः चिदाभासः साक्षी कूटस्थः इत्येतेषु चतुर्ष्वपि एकमेव चैतन्यमिति, तदेव च नैजं रूपमिति च प्रत्यभिजानाति, सः तस्मिन्नेव क्षणे संसारभ्रमान्मुच्यते। घटे नष्टे घटान्तर्वर्त्ती आकाशः बहिराकाशे यथा निलीन इव (वस्तुतः द्वावप्येकमेव) दृश्यते तथा स्वरूपज्ञानेन तेन संसारभ्रमात् संसारी अहमिति भ्रमात्सद्यो मुक्तो भवतीति। यस्मात्त्वया पृष्टं तस्मादेव मयोक्तमिति — 'त्वज्जन्मक्षतयेऽस्त्युपाय इति यन्मां प्रत्यवोचः पुरा तत् स्वामिन् सपदि प्रदर्श्य कृपया मां रक्ष रक्षेति च' (पद्यं १०) इति पृष्टत्वात्। वस्तुतः मम कथनस्य आवश्यकता नास्ति। कथनात्प्रागपि अखण्डानन्दरूपं ब्रह्म आसीः। अधुनाप्यसीति। (१३)

१४.

"त्वमपि सुपूर्णं त्वां वेत्सि चेत् तव कल्पकालेऽपि विहतिः नूनं नास्ति" इति गुरुवचनं मनसि कृत्वा शिष्यः पृच्छति -

मां विज्ञाय जडं गुरो हृदि भवानेतद्वचः प्रोक्तवान्
सर्वे ज्ञातनिजस्वरूपगतयो लोके भवन्त्यातुराः।
उत्पत्तिक्षयशालिनः कथमहो निश्चित्य तत्त्वं मम
ब्रूहि त्वत्पदपङ्कजं गतवतां भूयो न दुःखं क्वचित्।। १४ ।।

अन्वयः - हे गुरो मां हृदि जडं विज्ञाय किल भवान् एतद्वचः प्रोक्तवान्? लोके ज्ञातनिजस्वरूपगतयः उत्पत्तिक्षयशालिनः आतुराः भवन्ति। अहो! कथमेतत्? तत् त्वं निश्चित्य ब्रूहि। त्वत्पदपङ्कजं गतवतां क्वचिद् (अपि) दुःखं भूयः (भवेत् हि)।

व्याख्या - भवता, मूर्खोहम् इति कृत्वा एवमुक्तं (त्वं त्वामवेहि, चेत् संसारभ्रमातुरत्वं नष्टं स्यादिति) किम्? लोके सर्वोऽपि निजं रूपं निजां गतिञ्च सम्यगेव जानाति हि। अहं देवदत्त इति, इयद्वयस्क इति, पुमानिति, वृद्ध इति, बाल इति एवमादि। तथापि संसारचक्रे भ्रमति च। कथमेतत्? तस्मात् त्वं निर्णयं कृत्वा वस्तुतत्त्वं यथावदुपदिशेति शिष्यः प्रार्थयति। तस्य श्रद्धा तु द्रढीयसी अस्त्येव। यतः "त्वत्पादकमलं शरणं गतस्य न कदापि दुःखानुभवः स्यादिति" सः गुरुं दृढभक्त्या वदति। (१४)

१५.

त्वं त्वां यथावन्न जानासि, देहाद् भिन्नः देही अस्तीत्याह।

अयं देहो देह्यप्ययमिति यथार्थाद्विदितवान्
नरो यो वा लोके स तु भवति बुद्धात्मविभवः।
[१७]गुराविथंवाचि स्वयमथ जगादैष वपुषो
निजात् स्थूलात् कोऽस्तीत्ययमपि जहासोरुविमनाः।। १५।।

अन्वयः - 'अयं देहः, अयमपि देही इति यथार्थाद् यो वा नरः विदितवान् स एव लोके बुद्धात्मविभवः भवति' इत्थंवाचि गुरौ सः तु 'स्थूलान्निजात् वपुषः अथ कोऽस्ति (अपरो देही)' इति जगाद। सोऽपि एषः उरुविमनाः स्वयं जहास।

व्याख्या - अयं करचरणादिमान् देहः नश्वरः,देही तु (अयमपीत्यत्र अपिसब्दः त्वर्थकः) अस्माद्भिन्नः अनश्वरः इति यथावद् यो वेत्ति स एव बुद्धात्मविभव इति कथ्यते। ज्ञातनिजस्वरूपः इति कथ्यते। गुरौ इत्थंवाचि सति (इत्थं वक्तीति इत्थंवाक्, तस्मिन्निति) शिष्यः पुनराह। स्थूलादस्मात् करचरणादिमतो देहादन्यः कोऽस्ति यो भवता देहीति कथ्यते इति। तच्छ्रुत्वा गुरुः उरुविमना अपि जहास। भृशं दुःखितोऽपि जहासेति कथम् ? संसारचक्रप्रविष्टाः सर्व एव जीवाः ज्ञानिनोऽपि अज्ञानिन एवेति तेषाम् अस्थाने दुःखं दृष्ट्वा जहासेति। जीवानाम् अज्ञानेन दुःखितश्च। (१५)

१६.

शिष्यस्य देहात्मभ्रान्तिं नाशयितुं दयासिन्धुर्गुरुराह –

देहादन्यो नास्ति देहीति चेत्त्वं स्वप्ने को वा वेत्ति सर्वं विकारम्।
सुप्तौ को वा शून्यवेत्ता प्रबोधे गृह्णात्यक्षैर्दृश्यजातं वदस्व।। १६।।

अन्वयः - देहादन्यः देही नास्ति इति चेत् स्वप्ने को वा सर्वं विकारं वेत्ति? सुप्तौ वा कः शून्यवेत्ता (भवति)? (किञ्च को वा) प्रबोधे अक्षैः दृश्यजातं गृह्णाति ? त्वं वदस्व।

व्याख्या - देह एव त्वं, देहाद् भिन्नः देही नास्ति इति किल त्वं वदसि? एवं तर्हि स्वप्ने यदा त्वं देहं विस्मृत्य स्वपिषि स्वप्ने च सर्वं विकारं वस्तुजातं पश्यसि वेत्सि च, तदा कस्तत्पश्यति? देहः (देहबोधः) नास्ति किल? किञ्च

17. ***Vera*** wrongly reads as गुराविथं वाचि.

सुषुप्तौ 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति पश्चात्तनस्य व्यवहारस्य बीजभूतं यद् ज्ञानं तत् को वा जानाति? तस्मिन् समये देहस्य कर्तृत्वेन करणत्वेन वा असत्वात्। जागरणकालेऽपि अक्षैः इन्द्रियैः को वा जानाति? विचिन्तय, ब्रूहि इति। (१६)

१७.

दृग्दृश्यविवेके किञ्चिदिव उद्बोधितः शिष्यः प्रतिवचनमिषेण तत्त्वबुभुत्सां वेदयति।

जाग्रत्काले सकलविषयानक्षजातैर्हि जाने
स्वप्ने पश्याम्यहमपि तथा सुप्तिकाले न किञ्चित्।
जानाम्येवं प्रतिदिनमथाप्यन्तरन्तर्न[18] जाने
किञ्चिद्भातं किल सपदि मे ब्रूहि तत्त्वं महात्मन्।। १७।।

अन्वयः - जाग्रत्काले अक्षजातैः सकलविषयान् जाने। स्वप्ने अपि अहं पश्यामि। तथा सुप्तिकाले न किञ्चित् जानामि। अथापि प्रतिदिनम् अन्तरन्तः किञ्चिद् भातम्। (हे) महात्मन् तत्त्वं मे सपदि ब्रूहि।

व्याख्या - जागरणसमये इन्द्रियद्वारा अहं सर्वं विषयजातं प्रत्येमि। स्वप्नेऽपि एवमेव अवगच्छामि। सुषुप्तौ तु अहम् न किञ्चित् जानाम्येव। एवं सदा तिसृष्वप्यवस्थासु अनिशं मम अन्तर्हृदये अहमिति किञ्चिद्भातम्। किन्तु तदधिकृत्य सम्यगवगाहो नास्ति मे। हे अधिगतपरमार्थ महात्मन्! करुणामूर्ते तत्त्वं याथातथ्येन सपदि मे ब्रूहि इति जिज्ञासुः शिष्यः महता आतङ्केन पृच्छति। (१७)

१८.

एवं प्रकटितस्वबुभुत्सं तं शिष्यं ब्रह्मस्वरूपं दर्शयितुं स गुरुः, लोके प्रथमं स्थूलं प्रदर्श्य, क्रमेण सूक्ष्मस्य बोधने यः प्रकारः उपादीयते तं स्वीकर्तुमैच्छदित्याह -

लोके तारं प्रदर्श्य प्रकटमथ जनोऽरुन्धतीं दर्शयिष्यन्
शाखामुच्चैः प्रदर्श्य प्रथितमुडुपते[19]श्चन्द्रिकां वा यथेह।
स्थूलं सम्यक् प्रबोध्य प्रथममतितरां सूक्ष्ममाकाशतो यत्
पश्चाद् ब्रह्मस्वरूपं वरगुरुरभयं बोद्धुमैच्छत्क्रमेण।। १८।।

---

18. ***Vera*** reads as प्रतिदिनमथाप्यन्तरं तन्न.
19. ***Vera*** reads as उडु ततः.

अन्वयः - लोके अरुन्धतीं दर्शयिष्यन् जनः प्रकटं तारं प्रदर्श्य (यथा बोधयितुमिच्छति), यथा वा उच्चैः शाखां प्रदर्श्य उडुपतेः चन्द्रिकां (दर्शयितुमुद्युङ्क्ते), तद्वत् प्रथमं प्रथितं स्थूलं सम्यक् प्रबोध्य आकाशतः अतितरां सूक्ष्मं अभयं ब्रह्मस्वरूपं पश्चात् क्रमेण बोद्धुं (सः) वरगुरुः अथ ऐच्छत्।

व्याख्या - लोके अरुन्धतीदर्शनन्यायेन शाखाचन्द्रन्यायेन च यथा निकटवर्ति वस्तु वा स्थूलं वा रूपं प्रदर्श्य, तदनन्तरम् उद्दिष्टं वस्तु वा सूक्ष्मं रूपं वा यथा दर्श्यते बुद्धिमद्भिः जनैः, तथा सः वरगुरुः अभयं, भयकारणस्य द्वितीयभ्रमस्य मूलकारणच्छेदि ब्रह्मस्वरूपं क्रमेण - स्थूलात्सूक्ष्ममिति क्रमेण - उपदेष्टुमैच्छदिति। (१८)

१९.

प्रतिज्ञातं मोक्षोपायं वक्तुमुपक्रमते।

अध्यारोपान्मृषोत्थाद् भवति खलु नृणां बन्धनञ्चापवादात्
मोक्षो भूयाद् बुधानामिति खलु विदितो निर्णयः पूर्वकाणाम्[20]।
तत्रारोपं शृणु त्वं जडविषयमिमं मोक्तुमत्यन्तबद्धं
पश्चाद्वक्ष्येऽपवादं परचिति[21] सुखतः स्थातुमानन्दसीम्नि।। १९।।

अन्वयः - मृषोत्थाद् अध्यारोपात् खलु नृणां बन्धनं भवति। अपवादात् बुधानां मोक्षश्चेति पूर्वकाणां निर्णयः खलु। तत्र अत्यन्तबद्धम् इमं जडविषयं मोक्तुं त्वम् अध्यारोपं शृणु। पश्चात् आनन्दसीम्नि परचिति सुखतः स्थातुम् अपवादं वक्ष्ये।

व्याख्या - जीवानां बन्धनमध्यारोपात् (वक्ष्यमाणस्वरूपात्) खलु भवति। अध्यारोपश्च मृषोत्थः। मिथ्याज्ञानहेतुकः। अपवादाच्च (अस्य स्वरूपमपि अनुपदं वक्ष्यते) बुधानां विदित-अध्यारोपाणां मोक्षश्च नूनं भवति। संसारबन्धः मिथ्याज्ञानविलसिताद् अध्यारोपादेव भवतीति। अवास्तवः संसारबन्धः। अपवादश्च मिथ्याज्ञाननिवृत्तिः। अपवादाच्च अखण्डानन्दरूपा परचिदेवाहम् इति बोधो भवति। स एव मोक्षः। (१९)

२०.

अध्यारोपो नाम कः, अपवादश्च कः इति विशदयति।

---

20. ***Vera*** reads wrongly as पूर्विकानां.

21. ***Vera*** reads as परिचितिसुखतः.

अध्यारोपः कश्चेदन्यस्मिन्नन्यथा[22] भ्रान्तिः।
सर्पः स्रज्यर्कोस्त्रे[23] तोयं स्थाणौ च चोरताधिषणा।। २०।।

अन्वयः - कः नाम अध्यारोपः (इति) चेत् अन्यस्मिन् अन्यथाभ्रान्तिरेव। यथा स्रजि सर्पः, यथा वा अर्कोस्त्रे तोयम्, यथा च स्थाणौ चोरताधिषणा ।

व्याख्या - एकस्मिन् वस्तुनि वस्त्वन्तरगतस्य धर्मस्य भ्रान्तिरेव अध्यारोप इत्युच्यते। यथ मालायां सर्पभ्रान्तिः, यथा सूर्यरश्मौ जलभ्रान्तिः, यथा वा मन्दप्रकाशे स्थाणौ चोरत्वभ्रान्तिः। अध्यारोप एव अध्यास इत्युच्यते। तथा चोक्तं ब्रह्मसूत्रभाष्ये 'अध्यासो नाम अतस्मिन् तद्बुद्धिः' इति।

अत्र तृतीयपादे अर्केऽभ्रे इति मुद्रितः पाठः। अर्कोस्त्रे इति युक्ततरः पाठः इति स्वीकृतः (२०)

२१.

निर्गुणं निर्धर्मकं निरवधिकम् इत्यादिना शास्त्रैरुच्यमाने ब्रह्मणि कथं जगद्भ्रान्तिर्भवितुमर्हतीत्याह।

गतोपमाने सति निष्प्रपञ्चे संवित्स्वरूपे च तथाऽद्वितीये[24]
यथाम्बरे नैल्यतलादिकल्पना तथा परे ब्रह्मणि विश्वकल्पना।। २१।।

अन्वयः - यथाम्बरे नैल्यतलादिकल्पना तथा (एव) च गतोपमाने निष्प्रपञ्चे अद्वितीये संवित्स्वरूपे सति परे ब्रह्मणि विश्वकल्पना ।

व्याख्या - यथा सर्वव्यापिनि रूपरहिते आकाशे नीलत्वं तलत्वं इत्यादि कल्प्यते आरोप्यते तथा एव उपमानरहिते नानात्वरहिते एकस्मिन् त्रिकालाबाध्ये सत्स्वरूपे चिद्रूपे परस्मिन् ब्रह्मणि जगदारोप इति। (२१)

२२.

अध्यासपरम्परां मूलतो वक्तुमाह —

यत्राव्यक्तेऽखिलतनुभृतो वासनाभिः प्रलीनाः
सुप्तौ[25] यद्वत्प्रलयपरसीम्न्यादिहीनास्तदेव।

---

22. ***Vera*** reads as अन्यतोभ्रान्तिः.
23. ***RSV1*** and ***RSV2*** have the reading अर्केऽभ्रे. ***GN*** reads अर्काऽभ्रे. ***Vera*** reads अर्कोस्त्रे, which sounds correct.
24. ***Vera*** reads as सदाऽद्वितीये.
25. ***GN*** reads as यद्यत्.

[26]ईशालोकाद्धि गुणसमतां सन्त्यजद्व्यक्तसंज्ञां
गच्छत् सत्त्वं रज इति तमो नैकभेदञ्च जातम्।। २२।।

अन्वयः - यत्र प्रलयपरसीम्नि अव्यक्ते आदिहीनाः अखिलतनुभृतः वासनाभिः (सह) यद्वत् सुप्तौ प्रलीनाः तदेव ईशालोकाद् गुणसमतां सन्त्यजद् व्यक्तसंज्ञां गच्छत् सत्त्वं रजः तम इति नैकभेदं जातञ्च।

व्याख्या - प्रलयपरसीम्नि महाप्रलये अव्यक्ते - यस्मात्सर्वमिदं व्यज्यते यत्तु स्वयं न व्यक्तं तस्मिन् - सर्वे जीवाः यथा वासनाभिः सह प्रलीनाः भवन्ति तद्वत् ईशालोकात्, सर्वाधिष्ठातृपरमेश्वरवीक्षावशात्, गुणसाम्यावस्थां त्यक्त्वा व्यक्तमिदं जगज्जातमिति। महाप्रलये यत् जीवजातम् अव्यक्ते निलीनमासीत् तत् परमेश्वरस्य सिसृक्षावशात्, तदीक्षणेन व्यक्ततामापेदे इति। गुणानां साम्यम् अव्यक्ते। व्यक्ते च वैषम्यम् इति द्रष्टव्यम्। (२२)

२३.

गुणवैचित्र्याद् विकारजातस्य जगतो वैचित्र्यमिति दर्शयितुं गुणस्वरूपमाह -

सत्वं भवति विशुद्धं रजस्तु रक्तं तमस्तु कृष्णञ्च।
परिवर्तिषु चैतेषु द्वे न्यूने चैकमधिकं स्यात्।। २३ ।।

अन्वयः - सत्वं विशुद्धं भवति। रजस्तु रक्तं (भवति)। तमस्तु कृष्णञ्च। एतेषु परिवर्तिषु द्वे न्यूने ऐकमधिकं च स्यात्।

व्याख्या - त्रिषु गुणेषु सत्वं विशुद्धं निर्मलं स्वच्छं भवति। रजस्तु रागात्मकम्। रागद्वेषप्रकृतिकं कामादिप्रयोजकञ्च भवति। तमस्तु कृष्णम् आवरकं भवति। एतेषु त्रिषु सदा परिवर्तिषु परिवर्तनस्वभाववत्सु सदा द्वे न्यूनप्रभावे, अपरञ्च एकमुद्रिक्तं भवेदिति। (२३)

२४.

सृष्टिप्रक्रियायामपरोऽपि प्रकारः अस्तीत्याह -

अयमिह मार्गश्चैकस्त्वपरोऽव्यक्तादभून्महत्।
तत्त्वं भवति ततोऽहङ्कारस्तस्मादेते गुणा जाताः ।। २४ ।।

अन्वयः - अयमिह एको मार्गः। अपरस्तु - अव्यक्तात् महदभत्। ततः अहङ्कारः। तस्मादेते गुणा जाताः (इति)।

---

26. ***Vera*** reads as ईशालोकाद्विगुणसमतां.

व्याख्या - उक्तप्रकारः एको मार्गः सृष्टिक्रमस्य। अपरस्त्वेवं भवति। अव्यक्तात् सर्वनिदानात् स्वतन्त्रात् त्रिगुणसमुदायरूपात् महत्तत्त्वं जातम्। प्रकृतेः अव्यक्तस्य आद्यः परिणामो भवति महान्। महतः अहङ्कारो जातः। स च अहङ्कारः त्रिधा भिद्यते। तस्माच्च एते गुणा जाताः इति। (२४)

२५.

एवं प्रकारान्तरमस्तीति दर्शयित्वा सामान्यतः सृष्टिक्रमं पुनरेवाह -

ब्रह्मच्छाया भवति हि गुणेष्वेषु सर्वेषु माया
सत्वं तत्र प्रतिफलति यो हीश्वरश्चान्तरात्मा।
तस्योपाधेरननुभविता[27] सोऽयमीशो निमित्तं
चोपादानं सकलजगतामूर्णानाभिर्यथैकः ।। २५।।

अन्वयः - एषु सर्वेषु गुणेषु ब्रह्मच्छाया भवति हि। तत्र सत्वं माया प्रतिफलति। यो हि ईश्वरः अन्तरात्मा च। उपाधेः तस्य अननुभविता सः अयम् ईशः सकलजगतां निमित्तम् उपादानं (च भवति)। (तद्) यथा ऊर्णनाभिः एकः (हेतुर्भवति तथा)।

व्याख्या - त्रिष्वपि गुणेषु चित् प्रतिफलति। तत्र सत्वे या चितश्छाया भवति सा मायेत्युच्यते। मायायां प्रतिबिम्बितं ब्रह्म ईश्वरः भवति। स एव अन्तरात्मा अन्तर्यामी इति च व्यवह्रियते। स ईश्वर एव जगतः सृष्टिस्थितिसंहारेषु कारणं भवति। सः हि ईश्वरः उपाधेः अननुभविता च। मायादर्पणे ईश्वरः जीवरूपेण प्रतिफलति। ईश्वरो बिम्बः। जीवश्च प्रतिबिम्बः। यद्यपि ईश्वरः मायायाम् उपाधौ प्रतिबिम्बितः तथापि न तदधीनः। मायामुपाश्रित्य मायया करणभूतया मायिकमिदं जगत् सृजत्यवति चेति। एक एव कथं निमित्तम् उपादानं च भवितुमर्हतीति चेद् ऊर्णनाभिर्निदर्शनमिति। (२५)

२६.

माया, अविद्या आनन्दमयकोशः इत्यादीन् निरूपयति -

ईशस्येयं सुषुप्तिर्भवति पुनरियं कारणं देहमासीत्
एषैवानन्दकोशो भवति ननु गुणो राजसोऽसावविद्या।
चिच्छाया चेतरस्यां स्फुरति बहुतरं जीवकोट्योऽत्र यस्यां
सर्वा स्फूर्तिः सुषुप्तौ तदभिमतवतस्तस्य तु प्राज्ञसंज्ञा।। २६।।[28]

27. ***Vera*** reads as तस्योपाधिस्तदनुभविता.

28. ***Vera*** does not have this stanza.

अन्वयः - इयम् (अवस्था) सुषुप्तिर्भवति। इयं पुनः ईशस्य कारणं देहमासीत्। एषैव आनन्दमयकोशो भवति। राजसः असौ अविद्या भवति ननु। (सा) इतरस्यां चिच्छाया स्फुरति, यस्यां जीवकोट्यश्च (स्फुरन्ति)। यस्यां सुषुप्तौ सर्वा (इयं) स्फूर्तिर्भवति तदभिमतवतः तस्य (ईश्वरस्य) प्राज्ञसंज्ञा।

व्याख्या - सत्वगुणे प्रतिबिम्बिता ईश्वरस्य छायैव मायेत्युच्यते। तस्या मायायाः स्वरूपं सुषुप्तिरेव। इयं सुषुप्तिरेव ईश्वरस्य कारणशरीरम्। एतदेव आनन्दमयकोशः। यः ईश्वरस्य राजसो गुणः, अर्थात् रजोगुणे प्रतिबिम्बिता या ईश्वरस्य छाया तस्याम् अविद्या स्फुरति। अविद्यैव जीवानाम् उत्पत्तिस्थानम्। अविद्यायामेव जीवकोट्यः स्फुरन्ति, भासन्ते। यस्याञ्च सुषुप्त्यवस्थायां सर्वे जीवाः अविद्यास्वरूपेण ईश्वरकोशे सुप्तवद्भान्ति ईश्वरस्य साऽवस्था प्राज्ञ इति गीयते। (२६)

२७.

एवम् ईश्वरस्य कारणोपाधिमभिधाय अधुना जीवस्य तमाह -

अविद्यासंसक्ताः[२९] सकलपशवस्सैव भविता
तदानन्दः कोशो दृढतरसुषुप्तिर्वपुरपि।
अमीषामज्ञानप्रचुरमथ वक्ष्ये सुमलिनात्
गुणादुद्भूतं यच्छृणु तदिह भूयोऽप्यवहितः।। २७ ।।

अन्वयः - सकलपशवः अविद्यासंसक्ताः। सैव तदानन्दः कोशो भवति। (एवमेव) दृढतरसुषुप्तिः वपुरपि। (इदानीं) सुमलिनाद् गुणादुद्भूतम् अमीषाम् अज्ञानप्रचुरं यत् (सूक्ष्मं शरीरं) तदिह अवहितः शृणु।

व्याख्या - सर्वेऽपि जीवाः अविद्यासंसक्ताः। अविद्यायाः कार्योपाधौ प्रतिबिम्बिताः अस्वतन्त्राः सन्तः पशुसदृशाः। यस्यामविद्यायां ते जीवाः संसक्ताः सैव तेषाम् आनन्दमयः कोशः। तथा कारणशरीरमपि। सैषा दशा दृढतरसुषुप्तावेव अनुभूयते। एवं सत्वगुणे रजोगुणे च य आरोपः स उक्तः। इतःपरं सुमलिनाद् अज्ञानभूयिष्ठात् तमोगुणाद् अज्ञानप्रचुरं यत् सूक्ष्मशरीरं भवति तदुत्पत्तिं कथयामि। कथ्यमानम् अवधानेन शृणु इति। (२७)

---

29. ***Vera*** reads as अविद्यायाः सक्ताः.

२८.

सृष्टिक्रमवर्णनम् अनुवर्तते।

पत्युः पशूनां कृपयैव सर्वभोगार्थ[30]मज्ञानमयं तमो हि।
विक्षेप इत्यावरणञ्च नाम्ना द्वेधाऽभवच्चावृतयेऽ[31]पि सृष्ट्यै।। २८।।

अन्वयः - पशूनां पत्युः कृपयैव सर्वभोगार्थम् अज्ञानमयं तमः हि आवृतये सृष्ट्यै अपि आवरणं विक्षेपः चेति नाम्ना द्वेधा अभवत्।

व्याख्या - तमोगुणः द्वेधा अभवत्। किमर्थम्? आवृतये सृष्ट्यै च। केन कारणेन इदं जातम्? पशूनां पत्युः (अस्वतन्त्राणां जीवानां नियन्तुः) ईश्वरस्य कृपया एव। ईश्वरकृपा किमर्थमेवं प्रवृत्ता? सर्वेषां जीवानां भोगार्थम्। आवरणं विक्षेपः इति अज्ञानमयस्य तमसः द्विधा भिन्नस्य नामनी। आवृणोति आत्म-अनात्मभेदमिति आवरणम्। विक्षिप्यते ज्ञात्रादिरूपेण आत्मा अनेन इति विक्षेपः।

अत्र पूर्वार्धे सर्वं भोगार्थम् इति मुद्रितपुस्तके पाठः। किन्तु सर्वभोगार्थमित्येव युक्ततरः भाति। (२८)

२९.

अथ विक्षेपशक्तेः सूक्ष्मशरीरोत्पत्तिं वर्णयति।

शक्तिर्विक्षेपनाम्नी समभवदथ सा व्योम तस्मान्नभस्वान्
तस्मादग्निस्ततोऽम्भः समभवदवनिः पञ्च भूतानि तानि।
नाम्ना प्रोक्तानि धीरैरिति सकलनृणां भोगलाभाय तेभ्यो
जातं पुर्यष्टकं तज्जगति जनिमतां लिङ्गदेहं वदन्ति।। २९।।

अन्वयः - विक्षेपनाम्नी शक्तिः व्योम समभवत्। तस्मात् नभस्वान्। तस्माद्वह्निः। ततः अम्भः समभवत्। (ततः) अवनिः। तानि (इमानि) धीरैः पञ्च भूतानि इति नाम्ना प्रोक्तानि। तेभ्यः सकलनृणां भोगलाभाय पुर्यष्टकं जातम्। तत् जगति जनिमतां लिङ्गदेहं वदन्ति।

व्याख्या - या विक्षेपाख्या शक्तिः पूर्वमुक्ता सैव व्योम, आकाशं समभवत्। तद्धि शब्दतन्मात्रम्। तस्मादाकाशात् नभस्वान्, वायुः समभवत्। स स्पर्शतन्मात्रः। तस्माद्वायोरग्निः समभवत्। रूतन्मात्रोऽग्निः। अग्नेश्च अम्भः समभवत्।

30. ***RSV 1***, ***RSV 2*** and ***GN*** read as सर्वं भोगार्थम्. ***Vera*** read as सर्वभोगार्थम् which sounds apt.
31. ***Vera*** reads as विसृष्ट्यै.

रसतन्मात्रमम्भः। अम्भसः अवनिः सम्भूता, या गन्धतन्मात्रा। तन्मात्ररूपाण्येतान्येव धीरैः, बुद्धिमद्भिः, पञ्च सूक्ष्मभूतानीति कथ्यन्ते। एतेभ्यः सूक्ष्मभूतेभ्यः सकलजीवानां भोगसिद्धये पुर्यष्टकं इति संज्ञितः लिङ्गदेहः समुत्पन्नः। एतदेव सकलजीवानां साधारणं लिङ्गशरीरमिति वदन्ति। (२९)

३०.

लिङ्गशरीरं किंस्वरूपं कथञ्चोत्पन्नमिति दर्शयति।

भूतेषु पञ्चसु गुणत्रयमस्ति नित्यं
सत्त्वाद् भवन्ति खलु पञ्च मतीन्द्रियाणि।
आसीन्मनश्च धिषणा च[32] समष्टिसत्वाद्
एतानि सप्त खलु बोधविवर्धकानि।। ३० ।।

अन्वयः - (एतेषु) पञ्चसु भूतेषु नित्यं गुणत्रयमस्ति। सत्त्वात् पञ्च मतीन्द्रियाणि भवन्ति खलु । समष्टिसत्वाद् मनश्च धिषणा च आसीत्। एतानि सप्त बोधविवर्धकानि खलु।

व्याख्या - एतेषु पञ्चभूतेषु नित्यम् अनुगतं गुणत्रयम् अस्ति। सत्वं रजस्तम इत्येते गुणाः सन्ति। पञ्चभूतेषु अनुगतात्सत्वगुणात् एकैकशः पञ्च ज्ञानेन्द्रियाणि भवन्ति। अर्थात् पञ्चभ्यो भूतेभ्यः पृथक्पृथगनुगतसत्वगुणात् श्रोत्रं, त्वक्, चक्षुः, रसना, घ्राणमिति ज्ञानेन्द्रियाण्युत्पन्नानि। एभ्य एव पञ्चभ्यो भूतेभ्यः अनुगतसत्वगुणात् मनः बुद्धिश्च – करणरूपेण इदंवृत्तिरूपं मनः, कर्तृरूपेण अहंवृत्तिरूपा बुद्धिश्च - उत्पन्ने। एतानि सप्त - पञ्च ज्ञानेन्द्रियाणि, मनः, बुद्धिश्चेति – ज्ञानसाधनानि भवन्ति। (३०)

३१.

लिङ्गशरीरोत्पत्तिमेव कथयति।

गुणाद्धि रजसोऽनिलाः[33] खलु भवन्ति पञ्चाप्यमी
तथा प्रबलकर्मकाण्यपि भवन्ति चाक्षाण्यपि[34]।
दशैव मिलितान्यतो भवति सप्त लिङ्गाभिधं
शरीरमिदमात्मनां सुरनृदैत्यनीडौकसाम्[35]।। ३१।।

---

32. ***Vera*** reads as धिषणाश्च.

33. ***Vera*** reads as रजसोऽनिला.

34. ***Vera*** reads as चाक्षाणि हि.

35. ***Vera*** wrongly reads as सुरनृदैत्यनिस्सौकसाम्.

अन्वयः - रजसः गुणात् पञ्च अनिलाः भवन्ति खलु। तथा प्रबलकर्मकाणि पञ्च अमी अक्षाण्यपि (भवन्ति)। अतः दश सप्त मिळितानि लिङ्गाभिधं शरीरं भवति। इदं सुरनृदैत्यनीडौकसाम् आत्मनां (शरीरं भवति)।

व्याख्या - पञ्चसु भूतेषु अनुगताद् रजोगुणात् पञ्च अनिलाः प्राणापनव्यानोदानसमानाख्याः भवन्ति। अर्थात् पृथक् पृथक् स्थितेभ्यः पञ्चभ्यो भूतेभ्यः एकैकशः अनुगताद्रजोगुणात् पञ्च वायवः समुद्भवन्ति। एवमेव अनुगताद्रजोगुणात् एकैकस्माद् भूतादेकैकमिति पञ्च कर्मेन्द्रियाण्यपि वाक्पाणिपादपायूपस्थाख्यानि भवन्ति। एतानि दश पूर्वोक्तैः सप्तभिर्मिळित्वा लिङ्गाभिधं शरीरं भवति। सर्वेषां जीवराशीनाम्, सुराणामसुराणां नराणां पक्षिणामपि, इदमेव सूक्ष्मशरीरम्। (३१)

३२.

जीवेश्वरयोः स्वरूपावस्थानादिकं कथयति।

व्यष्टिष्वेतासु जीवो यदि च परिगतस्तैजसाख्यां विधत्ते
सूत्रात्मा चेत्समष्टिष्वपि भवति पुनः स्वप्न एष द्वयोश्च।
प्राणव्यापारवत्वादपि खलु ममताहेतुतः कर्तृभावात्
स्यात्कोशानामिदं तत्त्रितयमिति वदन्त्यात्मशास्त्रप्रवीणाः।। ३२।।

अन्वयः - एतासु व्यष्टिषु परिगतो जीवः तैजसाख्यां विधत्ते। समष्टिषु चेत् सूत्रात्मा अपि भवति। द्वयोः एषः स्वप्नश्च। प्राणव्यापारवत्वात् ममताहेतुतः कर्तृभावाच्च इदं कोशानां त्रितयम् इति आत्मशास्त्रप्रवीणाः वदन्ति।

व्याख्या - एतासु तनुषु व्यष्टिषु परिगतो जीवः तैजसाख्यां विधत्ते। समष्टिषु तनुषु चेत् सूत्रात्मा हिरण्यगर्भसंज्ञां लभते। द्वयोः तैजसहिरण्यगर्भयोः अवस्थाविशेषः स्वप्न एव। उच्छ्वासादिप्राणवायुव्यापारवत्वात्; ममताहेतोः, अभिमानित्वात्; कर्तृत्वाच्च इदं लिङ्गशरीरं वक्ष्यमाणस्वरूपाणां प्राणमनोविज्ञानात्मकानां कोशानां त्रितयमपि भवतीति वेदान्तविज्ञा अभिप्रयन्ति इति। (३२)

३३.

स्थूलदेहोत्पत्तिं वर्णयति।

एतत्सूक्ष्मशरीरजातमुदितं पश्चात्प्रवक्ष्ये शृणु
स्थूलारोपविधानमाश्वसुभृतां स्थूलाय भोगाय हि।

पञ्चीकारमतश्चकार भगवानेकः परात्मा स्वयं
यत्तेषां तमृते भवन्ति न हिता[36] भोगाश्च सूक्ष्मा तनुः ।। ३३ ।।

अन्वयः - सूक्ष्मशरीरजातम् एतद् उदितम्। पश्चात् आशु स्थूलारोपविधानं प्रवक्ष्ये। शृणु। एकः परात्मा भगवान् असुभृतां स्थूलाय भोगाय अतः पञ्चीकारं चकार। यत् तमृते तेषां ते भोगाः न भवन्ति हि। सूक्ष्मा तनुरपि (न भवति)।

व्याख्या - एवं सप्तदशतत्वाधिष्ठितं सूक्ष्मशरीरमुक्तम्। अनन्तरं क्षिप्रमेव स्थूलारोपविधानं प्रवक्ष्ये। आरोपशब्देन वक्ष्यमाणस्वरूपम् इदं जगत्समस्तं केवलम् आरोप एवेति सूचितम्। जीवानां स्थूलभोगायैव भगवान् पञ्चीकारं चकार। स हि एकः केवलः परमात्मा। तथापि जीवानां भोगायैव, अर्थात् वासनातानवाय, आशानिरासाय, भोगेन सुखदुःखाद्यनुभवजनितपापक्षयद्वारा अपवादज्ञानायैव पञ्चीकरणं निर्ममे। पञ्चीकरणमन्तरा भोगो न भवतीत्यतः। (३३)

३४.

पञ्चीकरणप्रकारमाह कृत्वेति।

कृत्वा पञ्चैव भूतान्यपि च दश ततस्तेषु पञ्चापि चत्वा-
र्येकं भागं विहाय स्वयमथ चतुर्षु प्रायशो मेलनं यत्।
भागानां बुद्धिमन्तो जगति परिपठन्त्येव पञ्चीकृतिं तद्
भूतग्रामः[37] समस्तस्समभवदमुतो भोगजातानि लोकाः ।। ३४ ।।

अन्वयः - पञ्चापि भूतानि (एकैकं द्विधा विभज्य) दश (खण्डानि कृत्वा) तेषु (एकैकस्य भूतस्य एकमर्धं तथैव संस्थाप्य अपरमर्धं) चत्वारि खण्डानि कृत्वा अथ तानि च स्वयं विहाय अन्येषु चतुर्षु भूतेषु (भूतार्धेषु) यत् भागानां मेळनं तदेव जगति बुद्धिमन्तः पञ्चीकृतिं परिपठन्ति। अमुतः समस्तः भूतग्रामः समभवत्। भोगजातानि लोकाश्च (समभवन्)।

व्याख्या - व्योमादीनि अवन्यन्तानि पञ्च भूतानि द्विधा समं विभज्य, तेषु एकैकमर्धं तथैव संस्थाप्य, अपरञ्चार्धं चतुर्धा समं विभज्य तांश्च अष्टमांशखण्डान् इतरेषु चतुर्षु भूतार्धभागेषु संयोज्य एकैकस्य रूपत्वमापादनीयम्। (रूपं नाम एकत्वसंख्या।) एतदेव पञ्चीकरणम्। अस्मादेव, पञ्चीकृतभूतेभ्य एव समस्तो भूतग्रामः (जीवनिकायः), भोगजातं समस्तं, लोकाश्च समस्ताः समुत्पन्नाः इति। (३४)

36. ***GN*** and ***Vera*** read as न हि ते.

37. ***RSV 1*** and ***RSV 2*** read as भूतग्रामात्समस्तं. ***GN*** and ***Vera*** read as भूतग्रामः समस्तः.

३५.

स्थूलशरीरे उपहितयोः जीवपरेशयोः नामदशादिकम् उच्यते -

स्थूलाभिमानी खलु विश्व उच्यते विराट् समष्ट्याग्रहतः परेशः।
एतद्द्वयोर्जागरणञ्च कोशस्त्वन्नाभिधः स्थूलविसर्ग[38] एषः।। ३५।।

अन्वयः - स्थूलाभिमानी (जीवः) खलु विश्व इत्युच्यते। परेशः समष्ट्याग्रहतः विराट् (च उच्यते)। द्वयोः जागरणं च (एकैव दशा)। कोशस्तु अन्नाभिधः एषः। एषः स्थूविसर्गः।

व्याख्या - स्थूलशरीरे व्यष्टौ अभिमानी यः जीवः स एव विश्व इत्युच्यते। समष्टौ आग्रहतः, समष्टिशरीरे अभिमानतश्च, परेशः विराडित्युच्यते। द्वयोः विश्वविराजोः जाग्रदवस्था एव। कोशस्तु अन्नाख्यः। एषैव स्थूलसृष्टिः। (३५)

३६.

एवं स्थूलशरीरे अवस्थादिके च समाने ईशजीवयोः मिथो भेदकं किमित्याह -

उपाधिमेकं वदसीशजीवयोः कथं प्रभेदस्त्विति चेच्छृणुष्व तम्।
समष्टितो व्यष्टिवशेन कारणात् क्रमेण कार्यादपि नान्यथा भवेत्।। ३६।।

अन्वयः - ईशजीवयोः एकमुपाधिं वदसि। कथं तु (अनयोः) प्रभेदः इति चेत् तं शृणुष्व। समष्टितः कारणात् व्यष्टिवशेन क्रमेण कार्यादपि (इति)। अन्यथा न भवेत्।

व्याख्या - परमेश्वरस्य जीवानाञ्च स्थूलशरीरम् एकमेव, एक एव उपाधिः इत्युक्तम्। एवञ्चेत् कथमनयोर्भेदः इति यदि पृच्छसि चेत् तं भेदकं शृणुष्व। ईश्वरस्य समष्टिः कारणोपाधिः। जीवानां तु व्यष्टिवशेन कार्योपाधिः इति। (३६)

३७.

समष्टिव्यष्टिवशेन भेदः कथमिति लौकिकं व्यवहारं दर्शयन् समर्थयति।

वृक्षो व्यष्टिः स्यादरण्यं समष्टिर्गेहो व्यष्टिः पत्तनं स्यात्समष्टिः।
देहो व्यष्टिः स्यात्प्रपञ्चः समष्टिः शम्भोर्जीवस्यैष एव प्रभेदः।। ३७।।

अन्वयः - वृक्षो व्यष्टिः। अरण्यं समष्टिः स्यात्। गेहो व्यष्टिः, पत्तनं समष्टिः स्यात्। देहो व्यष्टिः। प्रपञ्चः समष्टिः स्यात्। शम्भोर्जीवस्य च एष एव प्रभेदः।

38. ***Vera*** reads as कोशस्त्वन्नाबिधस्थूर्लविसर्गः.

व्याख्या - पृथक् पृथग् दृश्यमानः एकैको वृक्षो व्यष्टिः। समूहत्वेन दृश्यमानमरण्यं समष्टिरित्युच्यते। एवमेव गेहो व्यष्टिः पत्तनं, गेहसमूहः समष्टिः। यथा देहो व्यष्टिरुच्यते, प्रपञ्चश्च समष्टिः तद्वत् शम्भुः समष्टिः जीवश्च व्यष्टिरिति। अयमेवानयोरभेदः। (३७)

३८.

एवम् आरोपमुपवर्ण्य अपवादं वक्तुं प्रक्रमते।

कल्पनागमविभ्रमस्तव दर्शितः खलु युक्तितः
स्वप्न एव जगत्समस्तमितीक्षिताऽत्र हि बोधवान्।
क्षिप्रमेव घनागमक्षतिकालशुद्धनभःसम-
स्वस्वरूपविशुद्धये[39] ह्यपवादमार्गमथो ब्रुवे।। ३८।

अन्वयः - कल्पनागमविभ्रमः तव युक्तितः दर्शितः खलु । समस्तं जगत् स्वप्न एवेति ईक्षिता अत्र बोधवान्। अथ घनागमक्षतिकालशुद्धनभःसमस्वस्वरूपविशुद्धये हि क्षिप्रमेव अपवादमार्गं ब्रुवे ।

व्याख्या - कल्पनया, भ्रान्त्या, अध्यासपरम्परया आगमः, भानं यस्य सः कल्पनागमः। तस्माज्जातो विभ्रमः जगद्विभ्रमः। सः क्रमेण सयुक्तिकं दर्शितः। अत्र अस्मिन् विभ्रमे यः समस्तमिदं जगद् भानमात्रं, स्वप्नाभम् इति पश्यति स एव ज्ञानी। अधुना तव अपवादमार्गं वक्ष्ये। स चापवादः स्वस्वरूपविशुद्धये कल्पते। स्वस्वरूपानुसन्धानं ह्यस्य प्रयोजनम्। स्वस्वरूपावगतिर्हि मोक्षः। यथा घनागमकालस्य क्षतौ वर्षाकालात्यये, अर्थात् शरत्काले नभः निर्मलं भवति तद्वत् निर्मलस्वस्वरूपानुसन्धानं ह्यस्य अपवादज्ञानस्य प्रयोजनमिति।

अत्र उत्तरार्धे, मुद्रितपुस्तके 'घनागमक्षतिकालशुद्धनभोपमः (नभःसमः) स्वस्वरूपविशुद्धये' इति पाठः। स तु क्लिष्ट इति त्यक्तः। (३८)

३९.

सोदाहरणम् अपवादमार्गं दर्शयति -

सर्प एष न रज्जुरेव न रूप्यमेव हि शुक्तिका
स्थाणुरेव नरो भवेन्न हि चैवमेव गुरोर्गिरा।

39. ***RSV 1***, ***RSV 2*** and ***GN*** read घनागमक्षतिकालशुद्धनभोपमः (नभःसमः) स्वस्वरूपविशुद्धये. ***Vera*** reads घनागमक्षतिकालशुद्धनभःसमस्वस्वरूपविशुद्धये.

नैव गात्रमथेन्द्रियाण्यपि[४०]नैव भूतपरम्परा
ब्रह्ममात्रमहं सदेत्यपवादमार्गमुशन्त्यमुम्।। ३९ ।।

अन्वयः - रज्जुरेव नैष सर्पः, इयं हि शुक्तिका न रूप्यकम्, एष स्थाणुरेव न नरः भवेद् हि। एवमेव गुरोर्गिरा अहं नैव गात्रम्, इन्द्रियाण्यपि (न)। नैव भूतपरम्परा (वा)। (किन्तु) सदा ब्रह्ममात्रम् इति (ज्ञानं यत्र) अमुम् अपवादमार्गम् उशन्ति।

व्याख्या - यथा भ्रमनिवृत्तौ मया दृष्टं वस्तु रज्जुरेव, न सर्प इति; यथा वा इयं हि शुक्तिकैव, न रजतमिति अज्ञाननिवृत्तिर्भवति; यथा च पुरुष इति मया चिन्तितम्, वस्तुतः स्थाणुरेवायम् इति आरोपनिवृत्तिः भवति तथा गुरोर्गिरा श्रवणमनननिदिध्यासनैश्च नाहं शरीरम्, न वा इन्द्रियाणि, नापि भूतसङ्घातः; किन्तु केवलं ब्रह्मैवाहम् इति स्वस्वरूपज्ञानम् उदेति। तदेव बुधाः अपवादमार्गमुशन्तीति। (३९)

४०.

सत्तामात्रमहं, चिन्मात्रमहम् इति ज्ञानमेव अपवादस्य फलमिति दर्शयति।

वस्त्रतन्तुकिरीटकुण्डलनिष्ककाञ्चनकुण्डिका[४१]-
मृद्धदेवमुदीक्ष्यतामिह[४२] चैकमेव हि वस्तुतः।
कारणाद् व्यतिरिक्तमस्ति न कार्यवस्तु कदाचने-
त्यात्ममात्रविलोकनं त्वपवादमाहुरमुं बुधाः।। ४० ।।

अन्वयः - वस्त्रतन्तुकिरीटकुण्डलनिष्ककाञ्चनकुण्डिकामृद्वद् उदीक्ष्यताम्। एवमिह च वस्तुतः एकमेव। कारणाद् व्यतिरिक्तं कार्यवस्तु कदाचन (अपि) नास्ति। इति आत्ममात्रविलोकनम्। अमुं बुधाः अपवादमाहुः।

व्याख्या - यथा वस्त्रं वस्तुतः तन्तुरेव, यथा वा किरीटकुण्डलादयः स्वर्णनिर्मिता अलङ्काराः काञ्चनमात्रम्, एवम् अत्रापि स्वस्मिन्नपि उदीक्ष्यताम्। वस्तुतः कारणाद् भिन्नं उपादानकारणादतिरिक्तं वस्तु कार्यं किञ्चन नास्त्येव। एवंरीत्या कार्याणि यथा तत्तत्कारणेषु विलीनतया यथा वीक्ष्यन्ते तद्वत् पश्यामश्चेत् आत्मवस्तु एव शिष्येत। तदिमम् एवंरीत्या आत्ममात्रविलोकनप्रकारमेव बुधाः अपवादमाहुः। (४०)

---

40. *Vera* reads as गात्रमतीन्द्रियाण्यपि.

41. *Vera* reads as कुञ्चिका.

42. *Vera* reads wrongly as उदीक्षितामिह.

४१.

आवरणशक्तिः विक्षेपशक्तिरिति शक्तिद्वितयमुक्तम्। तयोः शक्त्योः मुक्तिबीजमिति कृत्वा विक्षेपशक्तिः प्रथममुक्ता। इदानीम् आवरणशक्तिं निरूपयितुं शिष्यकृतप्रश्नमुखेन उपक्रमते।

विक्षेपावृतिसंज्ञयोरतिजडात्सञ्जातयोस्त्वं गुणात्
शक्त्योर्वै तमसस्तु सम्भणितवान् विक्षेपशक्तेः कृतिम्।
शंसत्वावरणस्य कार्यमखिलं येनैव बन्धो भवे-
दित्याख्यातवति प्रभूतविनये शिष्ये गुरुः प्राह तम्।। ४१।।

अन्वयः - अतिजडाद् गुणात् तमसः सञ्जातयोः विक्षेपावृतिसंज्ञयोः विक्षेपशक्तेः कृतिं भवान् सम्भणितवान्। (इदानीम्) आवरणस्य अखिलं कार्यं शंसतु, येन बन्धो भवेदिति प्रभूतविनये शिष्ये आख्यातवति तं गुरुः प्राह।

व्याख्या - अज्ञानमयं तमः विक्षेपः आवरणम् इति द्वेधाभवदिति पूर्वमुक्तम् (पत्युः पशूनां कृपयैव सर्वभोगार्थमज्ञानमयं तमो हि। विक्षेप इत्यावरणञ्च नाम्ना द्वेधाऽभवच्चावृतयेऽपि सृष्ट्यै।। २८।।)। तयोः विक्षेपशक्तिः मुक्तौ उपकारकमिति वक्ष्यते (विक्षेपकार्यं किल मुक्तिबीजम् इति - ४८ तमं पद्यं पश्यत)। अतः ज्यायस्त्वात् विक्षेपकार्यं प्रागेवोक्तम्। अधुना आवरणस्य कार्यं वदतु, येन बन्धो जातः, यस्मान्मोक्ष इष्यते च इति शिष्यः सप्रश्रयं पृच्छति। तदा गुरुः सदयमाहेति। (४१)

४२.

आवरणस्य स्वरूपं तत्कार्यञ्च कथयति।

स्वोपमानपरमेश्वरं विना ज्ञानिनं त्वसदभानरूपवत्[४३] **।**
ज्ञानलोचनपिधानकारि यत् प्रावृणोति सकलं तमो यथा।। ४२।।

अन्वयः - स्वोपमानपरमेश्वरं ज्ञानिनं (च) विना, असदभानरूपवत् तु (एतत्) ज्ञानलोचनपिधानकारि यत् तमः सकलं यथा प्रावृणोति (तथा प्रावृणोति)।

व्याख्या - इदमावरणं प्रावृण्णिशीथिनी इव सकलं जीवजालं प्रावृणोति। तस्मादेव एतदावरणं ज्ञानलोचनपिधानकारि इत्युच्यते। तत्र ईश्वरं ज्ञानिनं च आवरीतुम् इयमावरणशक्तिः न प्रभवति। ईश्वरः अनुपमः। स्वयमेव केवलमुपमानं

43. ***RSV1, RSV2 and GN*** read ज्ञानिनामसदभानरूपवत्. ***Vera*** reads as ज्ञानिनं त्वसदभानरूपवत्.

भवति। तत्तुल्याभावात्। स्वोपमानश्चासौ परमेश्वरश्च स्वोपमानपरमेश्वरः। तं, स्वस्वरूपावस्थितं, ज्ञानिनञ्च विहाय अन्यत्सकलं जीवजालम् अन्धीकरोति तमः। लोचने सत्यपि दर्शनशक्तिर्नाश्यते इति। ज्ञानलोचनस्य पिधानम् आवरणशक्त्या क्रियते। तस्या आवरणशक्तेः स्वरूपमेव असत्, अभानं च। अर्थात्, अस्ति भातीति सदा प्रकाशमानस्य ब्रह्मवस्तुनः सत्त्वं भानं च पिधीयते अनया। नास्ति न भाति इत्येव भायात् आवरणशक्त्या पिहितलोचनस्य जीवलोकस्य। असद् अभानं च रूपे (लक्षणे) अस्मिन् स्तः इति असदभानरूपवत्। (४२)

४३.

वस्तुतो भिन्नयोर्भेदमपि आवृणोति आवरणशक्तिः। तदेव संसारव्याधेर्मूलकारणमिति दर्शयति।

पूर्णस्य ब्रह्मणो वा बहिरपि जगतां वर्तते यो विभेदः।
कूटस्थस्यापि चान्तर्घनतरविकृतेरस्ति यो वा विभेदः।
आवृत्यैतत्समस्तं विलसति घनवद्घोररूपावलिः[४४] सा
संसारव्याधिबीजं सकलजनिमतामेतदेवाहुरार्याः।। ४३।।

अन्वयः - पूर्णस्य ब्रह्मणः बहिः जगतां यो विभेदः वर्तते यो वा अन्तः कूटस्थस्य घनतरविकृतेः च विभेदः अस्ति एतत्समस्तम् घनवत् आवृत्य सा घोररूपावलिः (आवरणशक्तिः) विलसति। एतदेव सकलजनिमतां संसारव्याधिबीजम् (इति) आर्याः आहुः ।

व्याख्या - पूर्णस्य तेनैव अपरिच्छिन्नस्य बहिः बाह्यविषये जगताम् आरोपितसमस्तविक्रियाणां च यो विशिष्टः स्पष्टो भेदो वर्तते सदसत्त्वेन, यो वा प्रकटो भेदः कूटस्थचैतन्यस्य घनतरविकृतेः अनादिदृढवासनाविजृम्भितघनीभूतविकारस्य च वरीवर्ति, एवं सदसतोः प्रस्फुरन्तं भेदं समस्तं भिन्नमभिन्नञ्च वस्तुजातं मेघवदावृत्य घोररूपा आवरणशक्तिः निर्बाधं विहरति। एतदेव आवरणं सकलजीवानां संसारव्याधेः बीजमिति अभियुक्ता वदन्तीति। (४३)

४४.

आरोपमधिकृत्य आशङ्कामाक्षिप्य निरस्यन् विशदयति।

आधारश्चेन्निगूढो भवति वरगुरो कुत्र वारोपयोगः
नो चेदारोपवार्ता नहि भवति यदीत्युच्यते तच्छृणुष्व।

44. ***Vera*** reads as घनवद्घोररूपावृतिः.

आधारो यः समानो भवति शुभमते यो विशेषस्तयोर्वा
पूर्वः[४५] सर्वत्र चैको भवति हि चरमः कल्पितोऽयं भ्रमेण।। ४४।।

अन्वयः - आधारः निगूढः भवति चेत् हे वरगुरो कुत्र वा आरोपयोगः? नो चेद् आरोपवार्ता न हि भवतीति यदि उच्यते तत् शृणुष्व। यः समानः आधारः भवति यश्च वा विशेषः तयोः पूर्वः सर्वत्र एको भवति हि। अयं चरमः भ्रमेण कल्पितः।

व्याख्या - शिष्यस्य आशङ्कामुद्भाव्य परिहरति। वस्तु आवृत्य तस्मिन् अवस्तु आरोप्यते तदेव अध्यास इत्युच्यते किल। तत्रेयमाशङ्का। यदि आवरणशक्तिः वस्तु सर्वथा आवृणोति तर्हि कुत्र, कस्मिन्नधिष्ठाने अवस्तु आरोप्यते इति सन्देहः। यदि पुनः वस्तु सर्वप्रकारेण न तिरोधीयते इत्युच्यते तर्हि कथम् स आरोप इति वक्तुं शक्यते। वस्त्वेव तद्भवेत्किल इत्याशङ्का। तत्रोच्यते। आधारः द्विविधः। समानः विशेषश्चेति। तयोः पूर्वः सर्वत्र एकः समानश्च। स न तिरोधीयते। चरमः (अपरः) भ्रमेण कल्पितः। अर्थात् विशेषः आधारः आरोपितः वर्तते। स हि अनेकप्रकारः कल्पितश्च। (४४)

४५.

तदेव स्फुटयति।

आश्चर्यमेतदवनौ परमं हि साम्य-
मन्तर्हितं न तु[४६] कदाऽपि विशेषयोगात्।
न ह्यावृणोत्यहमिति स्म परं स्वसाम्यं
किन्त्वावृणोति तम ईश्वरजीवबोधम्[४७]।। ४५ ।।

अन्वयः - एतद् अवनौ आश्चर्यं (भवति)। अहमिति परमं साम्यं विशेषयोगात् कदाऽपि न तु अन्तर्हितं भवति हि। तमः अहमिति परं स्वसाम्यं हि न आवृणोति स्म। किन्तु ईश्वरजीवबोधम् आवृणोति।

व्याख्या - एतदाश्चर्यं भवति। यद् अहमहमिति स्फुरत् सर्वेषु जीवेषु सदा विभाति तत् परमं साम्यं कदापि आधारविशेषस्य योगात् न तिरोहितं भवति। तमसः अज्ञानस्य आवरणरूपा शक्तिः अहम्बोधम् आवरीतुं न शक्नोति। किन्तु तद् ईश्वरजीवबोधम् आवृणोति। जीवस्य ब्रह्मैवाहम् इति बोधमेव आवृणोति।

45. ***Vera*** reads as सर्वः.

46. ***RSV 1***, ***RSV 2*** and ***GN*** read as ननु. ***Vera*** reads न तु.

47. ***Vera*** reads as ईश्वरजीवबोधः.

यद्वस्तु समस्तस्य जगतः उपादानकारणं भवति, यदधिष्ठाय सर्वमिदं भासते, यस्मिंश्च लयमेष्यति तदेव जीवस्वरूपम्; अथवा तस्मिन् ब्रह्मणि एव जीवत्वमारोपितम् इत्येतदावृणोति। (४५)

४६.

'वस्तुतः संसारभ्रमस्य, अज्ञानकल्पित-अनर्थपरम्परायाश्च बीजं विक्षेपशक्तिः किल? सा किल समस्तमिदमसद् जगद्विक्षिपति। किन्तु भवता सकलजीवानां संसारव्याधेः मूलकारणम् आवरणशक्तिरुक्ता। तत् कथम्?' इति शिष्यस्य शङ्कामुद्भाव्य समाधातुं प्रक्रमते ।

कोशाः पञ्च हि केवलं परमकं स्थानं तिरस्कुर्वते[४८]
जीवेशादिजगद्विकल्पजननी विक्षेपशक्तिः किल।
आवृत्याह्वयशक्तिरत्र[४९] विदिता शून्यं कुतोऽनर्थता
तत्स्याच्चेदिति[५०] वत्स मे [५१]कथयतस्तं निर्णयं [५२]त्वं शृणु।। ४६ ।।

अन्वयः - परमकं स्थानं पञ्च कोशाः हि तिरस्कुर्वते। विक्षेपशक्तिः किल जीवेशादिजगद्विकल्पजननी। आवृत्याह्वयशक्तिः अत्र शून्यं (इति) विदिता। (तस्याः) अनर्थता कुतः स्यादिति चेत् तत् तं निर्णयं कथयतः मे वत्स त्वं शृणु।

व्याख्या - अन्नमयाद्याः विक्षेपशक्तिकल्पिताः वक्ष्यमाणस्वरूपाः (कोशाः) केवलं परमकं स्थानं प्रत्यगात्मतत्त्वं तिरस्कुर्वते। हीति हेतौ। जीवः, ईशः, जगत् इत्यादेः समस्तस्य विकल्पस्य उत्पत्तिकारणं, वस्तुतः विक्षेपशक्तिः किल। आवरणशक्तिश्च स्वप्रभवतमोगुणवत् शून्यं, कर्तृत्वकारयितृत्वादिशक्तिशून्या, इति विदिता। एवं स्थिते तस्याः आवरणशक्तेः अनर्थता कथमुच्यते भवद्भिः इति चेत् हे शिष्य तथ्यं विवृण्वानस्य मे वचः त्वम् अवहितेन मनसा शृणु। तत्र निर्णयमहं वच्मि इति। (४६)

४७.

आवरणशक्तिरेव बलीयसी दुःखदात्री चेति दर्शयति।

---

48. ***RSV 1*** and ***RSV 2*** wrongly read as स्तिरस्कुर्वते.
49. ***Vera*** reads as आवृत्या ह्यथ किञ्चिदत्र.
50. ***Vera*** reads as तस्याश्चेदिति.
51. ***Vera*** reads as कथमतस्तन्निर्णयं धारय.
52. ***Vera*** reads as धारय.

सेयं विक्षेपशक्तिर्बाहुविधजगतः संविधात्री यदि स्यात्
ब्रह्माभ्यासैकभाजामपि खलु कुरुते तन्निवृत्तिं बुधानाम्।
तामस्यां यामवत्यां दिवसवदपि वा वर्तते चोपकारः
तद्दुष्टा ह्यावृतिः सा सकलजनिमतां दुःखसंसारहेतुः।। ४७।।

अन्वयः - इयं विक्षेपशक्तिः बहुविधजगतः संविधात्री यदि (अपि) स्यात् सा (एव) ब्रह्माभ्यासैकभाजां बुधानां तन्निवृत्तिमपि कुरुते। दिवसवत् उपकारः अपि वर्तते। तत् तामस्यां यामवत्यां दुःखसंसारहेतुः आवृतिरेव दुष्टा खलु।

व्याख्या - सत्यम्। विक्षेपशक्तिरेव विचित्रानुभवशबळमिदं जगत् संविदधाति। तयैव कल्पितमिदं विचित्रं जगत्। किन्तु ये ब्रह्माभ्यासे एकतानतया निमग्ना वर्तन्ते बुधाः, तेषां साधकाग्रणीनाम् इयमेव विक्षेपशक्तिः संसारनिवृत्तिं कुरुते। यथा प्रचण्डो दिवसः लोकानां बहु उपकरोति तथा निद्रासुखेन सर्वान् मोहयन्ती यामिनी किमुपकरोति? तस्मात् सकलजीवानां दुःखसंसारकारणम् आवरणशक्तिरेव दुष्टा, दुष्टतरा इति। (४७)

४८.

आवरणशक्तिरेव संसारबीजमिति द्रढयति।

अपि क्षये[53] वा जगतां सुषुप्तौ संवर्तकालेऽपि च कस्य मोक्षः।
विक्षेपकार्यं किल मुक्तिबीजं दुष्टाऽऽवृतिः[54] संसरणैकहेतुः।। ४८।।

अन्वयः - जगतां क्षये संवर्तकाले सुषुप्तौ वा कस्यापि मोक्षः भवेत् किम्? मुक्तिबीजं विक्षेपकार्यं किल ? संसरणैकहेतुः आवृतिः दुष्टा (एव) च।

व्याख्या - जगतां क्षये विनाशे संवर्तकाले प्रलयसमये (नैमित्तिकप्रलये) सुषुप्तौ (नित्यप्रलये) वा कस्यापि मोक्षो भवेत् किम्? न भवेत् किल। विक्षेपकार्यं मुक्तिबीजं, मोक्षसाधनम् इति अग्रे समर्थयिष्यते। संसरणे आवृतिः एव हेतुः तेन सैव दुष्टा इति। (४८)

४९.

विक्षेपकार्यं मुक्तिबीजं चेत् शुक्तिरजतमिव विक्षेपकार्यत्वात् मुक्तिरपि असद्भानं स्यादिति शङ्कामुत्थाप्य परिहरति।

---

53. ***RSV 1***, ***RSV 2*** and ***GN*** wrongly read as क्षयो वा. ***Vera*** reads as क्षये वा.

54. ***Vera*** reads as दुष्टा वृत्तिः.

विक्षेपशक्तिपरिकल्पितमेव सर्वं
शुक्तिस्थरौप्यवदसत्प्रतिभाति चेत्तत्।
मोक्षोऽपि सत्य इति तर्हि न पुण्डरीकः
स्वाप्नोऽपि[55] किं वितनुते प्रतिबोधमात्रम् ।। ४९।।

अन्वयः - विक्षेपशक्तिपरिकल्पितं सर्वं शुक्तिस्थरौप्यवत् असदेव प्रतिभाति तत् मोक्षोऽपि न सत्यः (इति) चेत् तर्हि स्वाप्नोऽपि पुण्डरीकः किं प्रतिबोधमात्रं वितनुते?

व्याख्या - विक्षेपशक्तिः वस्तुनि अवस्तु विक्षिपति। तच्छक्तिपरिकल्पितं सर्वमपि असत्। यथा शुक्तौ रजतत्वभ्रमः। एवं स्थिते विक्षेपकार्यं भवति मुक्तिबीजम् इत्युक्ते मोक्षोऽपि असन्नेव भवेत्। न सत्यः। इति शङ्कायां वदति। स्वप्नानुभवः असन्नपि सत्यं प्रतिबोधं जनयति। यथा स्वप्ने पुण्डरीकं, व्याघ्रं दृष्ट्वा भीतिर्जायते; असन्नयं पुण्डरीकः न केवलं भीतिं जनयति भीतिद्वारा प्रतिबोधमपि जनयति; असत्यजां भीतिं जनयित्वा तद्द्वारा सुप्तेरुत्थानम् अज्ञानात्प्रतिबोधमपि जनयति; तथा विक्षेपशक्तिः सत्यस्य मोक्षस्य साधनं भवतीति। (४९)

५०.

शास्त्रश्रवणादीनि विक्षेपकार्याणि भवन्ति चेदपि सत्यस्य मोक्षस्य साधनभूतानि इत्युक्तम्। एवञ्च मोक्षावगतिः मानसी प्रतीतिर्भवेत्। तथा सति मोक्षे प्राप्तेपि बन्धनिवृत्तौ जातायामपि अद्वैताभ्युपगमो न भवेत्, मनसः शिष्टत्वादिति शङ्कामुद्भाव्य परिहरति।

अय इव भुवनेऽयो[56] मार्गणं मार्गणो वा
मलमिव मलमेकं तद्गरं वागरञ्च।
मन इह परिशुद्धं नाशयित्वा मनोऽन्य-
च्छवदहनसमिद्धन्नाशमेति स्वयञ्च ।। ५०।।

अन्वयः - भुवने (यथा) अयः अन्यदयो नाशयित्वा स्वयं नाशमेति, (यथा वा) मार्गणः मार्गणं, मलम् (अन्यत्) मलं, गरञ्च (अन्यद्) गरं नाशयित्वा स्वयं

55. ***RSV 1, RSV 2*** and ***Vera*** read स्वप्नोऽपि. ***GN*** reads स्वप्नेऽपि. However स्वाप्नोऽपि sounds more apt. And it is supported by *Prabhā* commentary. The editor (***Vera***) misses this fact. The commentary runs as यथा स्वाप्नोऽपि स्वप्नविक्षेपकार्योऽपि व्याघ्रादिः प्रतिबोधमात्रं जाग्रदवगतिं न जनयति,....

56. ***RSV 1, RSV 2*** and ***Vera*** wrongly read भुवने यो. ***GN*** reads भुवनेऽयो.

नाशमेति (तद्वत्) इह परिशुद्धं मनः अन्यत् मनः नाशयित्वा शवदहनसमिद्वत् स्वयं नाशमेति च।

व्याख्या - यथा लोके अयोनिर्मितेन केनचित् शस्त्रविशेषेण शल्यभूतं किञ्चन अयःखण्डम् उद्ध्रियते अपसार्यते, ततश्च उभयमपि त्यज्यते; यथा वा बाणेन अन्यः बाणः अपसार्यते, तदनु उभयं त्यज्यते; यथा वा मलेन मलं, गरेण गरञ्च अपसार्यते ततश्च उभयं त्यज्यते; तद्वद् इहापि परिशुद्धं मनः, सत्वोद्रेकादच्छं मनः, यद् वृत्तिज्ञानम् आत्मानं मनुते (मनुते इति मनः) अवगच्छति तत् , अन्यत् मनः, रजस्तमोबाहुल्याद् अशुद्धं मनः, नाशयित्वा अनात्मप्रवणताम् उज्झित्वा स्वयमपि शाम्यति। यथा शवदाहाय उपयुक्तं काष्ठादिकं तस्मिन्नेव चिताग्नौ नाश्यते, अग्निश्च निरिन्धनतया स्वयं शाम्यति तद्वत् मनोजन्यमपि वृत्तिज्ञानं द्वैतभ्रमं नाशयित्वा स्वयम् अद्वैताखण्डानन्दस्वरूपमात्रं शिष्यतीति। (५०)

५१.

अथ अज्ञानिनां जीवानां सप्त अवस्था भवन्तीति कथयति।

अवस्थाः सप्तैताः प्रकृतित इतः स्युर्मलवता-
मबोधः पश्चादावरण इति विक्षेप इति च।
परोक्षप्रत्यक्षे तदनु भवितारावगती[५७]
ततो दुःखध्वंसस्तदनु सुखलब्धिश्च महती।। ५१।।

अन्वयः - इतः प्रकृतितः मलवतां एताः सप्त अवस्थाः स्युः - अबोधः (प्रथमं) पश्चात् आवरणः इति। (ततः) विक्षेपः इति च। तदनु परोक्षप्रत्यक्षे अवगती भवितारौ। ततः दुःखध्वंसः। तदनु महती सुखलब्धिश्च।

व्याख्या - इतः प्रकृतितः, अध्यासकारणतया उक्तायाः अविद्यायाः हेतोः, मलवताम् अज्ञानिनां (मलशब्दः अज्ञानार्थे प्रयुक्तो बहुत्र अनेन शङ्कुकविना इति द्रष्टव्यम्) शुभाशुभकर्मफलभोक्तॄणां जीवानाम् एताः अनुपदं वक्ष्यमाणाः सप्त अवस्थाः भवन्तीति। ताश्च क्रमेण अबोधः, आवरणः, विक्षेपः, परोक्षावगतिः, प्रत्यक्षावगतिः, दुःखध्वंसः, महती सुखलब्धिश्चेति। (५१)

57. ***Vera*** reads as भवितारावपगती. However *Prabhā* commentary has the reading अवगती. The commentary runs as परोक्षप्रत्यक्षे अवगती. The editor has missed this fact.

५२,५३.

क्रमेण तासामवस्थानां स्वरूपमाह, द्वाभ्याम्।

ब्रह्मस्वरूपास्मरणं त्वबोधस्तदेव नास्तीत्युदिताऽऽवृतिः सा।
विक्षेपनाम्नी वपुरादिभानं गुरोर्गिराऽस्तीति[58] परः परोक्षः।। ५२।।

तत्त्वार्थस्य विचारणाज्जगदिदं त्यक्त्वा ह्यसत्सन्निभं
ब्रह्मैवाहमिति स्थितिर्हि कथिता सैवापरोक्षं बुधैः।
कर्तृत्वादिनिवृत्तिरेव विदिता दुःखप्रहाणिश्चिरा-
दानन्दाप्तिरथोत्तरैव[59] कृतकृत्यत्वस्वरूपा हि सा।। ५३।।

अन्वयः - ब्रह्मस्वरूपास्मरणं तु अबोधः। तदेव नास्ति इति सा आवृतिः उदिता। वपुरादिभानं विक्षेपनाम्नी । गुरोः गिरा अस्ति इति (भानम्) परः, परोक्षः। तत्त्वार्थस्य विचारणात् असत्सन्निभं हि इदं जगत् त्यक्त्वा ब्रह्मैवास्मि अहम् इति स्थितिः (या) सैव हि अपरोक्षम् इति बुधैः कथिता। कर्तृत्वादिनिवृत्तिरेव दुःखप्रहाणिः विदिता। अथ चिरात् कृतकृत्यस्वरुपा एव उत्तरा,सा आनन्दावाप्तिः।

व्याख्या - अहं परं ब्रह्म एव अस्मीति बोधस्य अभावः एव, ब्रह्मस्वरूपस्य आवरणमेव, अबोधः अथवा अज्ञानम् इति प्रथमावस्था। तद्, यद्धि 'सत्यं ज्ञानमनन्तम्', 'यतो वाचो निवर्तन्ते' इत्यादि श्रुतिवाक्यशतैः उद्घुष्टं प्रत्यगभिन्नं ब्रह्म तन्नास्तीति स्थितिः, विचारगतिरेव, आवृतिरित्युक्ता। शरीराद्यभिमानित्वं, तेन च आत्मनि कर्तृत्वादिप्रत्ययः एव विक्षेपनाम्नी अवस्था। गुरोर्गिरा तत्त्वमस्यादिवाक्येन,यः श्रद्धापूर्वः अवगमः स एव परः, अनन्तरः, चतुर्थोऽवस्थाविशेषः। तत्त्वार्थस्य प्रत्यगात्मनः विचाराद्, गुरूपदिष्टवाक्यार्थमननाद्, इदं परिदृश्यमानं जगत्सर्वं असत्सन्निभं मायामात्रं सदिव प्रतीतञ्च इति उज्झित्वा अहं ब्रह्मैवास्मि इति स्थितिः अपरोक्षज्ञानम् इति पञ्चमी अवस्था। चिरात् कर्तृत्वभोक्तृत्वादिविक्षेपनिवृत्तरेव दुःखप्रहाणिः, दुःखध्वंसः इति षष्ठी अवस्था। अथ चिराभ्यासत् कृतकृत्यस्वरुपा अहम् अखण्डानन्दस्वरूपः, न किञ्चिन्मया कार्यम्, नानवाप्तमवाप्तव्यम् इति आनन्दस्वरूपावगतिरेव उत्तरा अन्तिमा सप्तमी अवस्थेति कथयति द्वाभ्याम्। (५२,५३)

---

58. ***Vera*** reads wrongly as अस्तीती.

59. ***Vera*** reads wrongly as उत्तरेव.

५४-५६

उक्तमर्थं लौकिकोदाहरणेन विशदयति त्रिभिः पद्यैः।

अत्र हि दृष्टान्तोऽयं तीर्त्वा [६०]सरितञ्च दश नरास्तेषाम्।
गणयन् स्वं मुक्त्वैको [६१]भ्रान्तोऽजानन् सुखं न लेभेऽज्ञः।। ५४।।
भ्रमिरात्मनो ह्यबोधो[६२] नास्ति न भातीति चावृतिः कथिता।
विक्षेपो घनशोको दशमस्यास्तिवाक्[६३] परोक्षं हि।। ५५।।

कस्याप्युक्तिवशान्नवापि पुरुषान् सङ्ख्याय पश्चात्स्वकं
साक्षात्कृत्य हि दर्शनं समुदितः प्रत्यक्षबोधो बुधैः।
दुःखित्वादिनिवृत्तिरत्र कथिता साऽनर्थहानिः परा
सङ्ख्याता हि समस्तसंशयलयादानन्दलब्धिश्चिरात्।। ५६।।

अन्वयः - अत्र हि अयं दृष्टान्तः। दश नराः सरितं तीर्त्वा (स्थिताः) । तेषामेकः स्वं मुक्त्वा अजानन् भ्रान्तः अज्ञः सुखं न लेभे। आत्मनः अबोधः हि भ्रमिः। नास्ति न भातीति च (धीः) आवृतिः कथिता। दशमस्य विक्षेपघनशोकः अस्ति। कस्यापि अस्तिवाक् परोक्षं हि। उक्तिवशात् नवापि पुरुषान् सङ्ख्याय पश्चात् स्वकं (च) साक्षात्कृत्य दर्शनं प्रत्यक्षबोधः इति बुधैः समुदितः। अत्र सा दुःखित्वादिनिवृत्तिः अनर्थहानिरिति कथिता। समस्तसंशयलयाद् (आप्ता) आनन्दलब्धिः परा सङ्ख्याता हि ।

व्याख्या - उक्तस्य अवस्थासप्तकस्य अवबोधाय लौकिकम् इदमुदाहरणम्। दश नराः नदीमेकां तीर्त्वा स्थिताः। सर्वे सन्ति वा इति संशयो जातः। एकः सर्वानन्यान् पङ्क्तौ संस्थाप्य अगणयत्। एकः, द्वौ, इत्यादि। आत्मानं विहाय अन्यान् नव जनान् गणयित्वा एको नष्ट इति पर्याकुल आसीत्। एवमेव अन्यैरपि आत्मानं विहाय गणनं कृत्वा एको नष्टः इति निश्चितम्। एवं तेषु पर्याकुलेषु स्थितेषु कश्चित् पान्थः यदृच्छया तत्रागतः। तान् विषण्णान् दृष्ट्वा विषादकारणमपृच्छत्। ते चावदन्। अस्मासु एकः नदीतरणे विनष्टः तं शोचामः इति। पान्थेन उक्तम्। न कोऽपि विनष्टः । भवन्तः दश जनाः सन्ति इति। तेषु

60. ***Vera*** reads wrongly as सरितश्च दर्शनास्तेषाम्.

61. ***Vera*** has the reading भ्रान्त्वा जानन्सुखी बभूवेति for the remaining part.

62. ***Vera*** reads as भ्रमिरज्ञात्वा बोधो.

63. ***RSV 1*** and ***RSV 2*** read as दशमस्यास्ति वाक् परोक्षं हि. ***GN*** reads as दशमस्यास्तिवाक् परोक्षं हि. ***Vera*** reads as दशमस्यास्तित्ववाक्परोक्षं हि.

अन्यतममाहूय पान्थेनादिष्टम्, गणनं कुरु इति। स च नवापि अगणयत्। तदा पान्थः अवदत्, "आत्मानं विस्मृतवान्, नवेति गणिताः किल, त्वं दशमोऽसि" इति। तदा सः आत्मानं प्रतिबुध्य न कोऽपि विनष्टः इति स्वयं बुध्वा विगतदुःखः अतितरां सन्तुष्टोऽभवत्। अत्र दशमस्य आत्मविस्मरणम् अबोधः। दशमो विनष्ट इति अज्ञानमेव आवरणम्। तेन अज्ञानेन जातं दुःखमेव विक्षेपः। पान्थस्य दशमः अस्तीति वाक् परोक्षज्ञानम्। स्वयं गणनं कृत्वा आत्मनः साक्षात्कारः प्रत्यक्षज्ञानम्। तेन दुःखध्वंसः चिराद् आनन्दावाप्तिश्च जायते। (५४-५६)

५७.

दशमस्त्वमसि इति साक्षात्कारवत् शिष्यस्य तत्त्वमसिवाक्यार्थबोधनाय उपक्रमते।

ददर्श दशमो यथा निजतनुं पुराऽऽप्तोक्तित-
स्तथैव कलयाम्यहं कथय मत्स्वरूपं निजम्।
इतीरयसि चेद् ब्रुवे तव हि तत्त्वमर्थं पुन-
र्विशोध्य परमद्वयं ह्यसिपदेन यत् प्रोच्यते।। ५७।।

अन्वयः - पुरा दशमः आप्तोक्तितः यथा निजतनुं ददर्श तथैव अहमपि निजं मत्स्वरूपं कलयामि, कथय इति ईरयसि चेत् तव तत्त्वमर्थं विशोध्य परम् असिपदेन यदद्वयं प्रोच्यते तद् ब्रुवे।

व्याख्या - दशमस्त्वमसि इत्युदाहरणवाक्यार्थं श्रुत्वा शिष्यः पृच्छति — यथा दशमः आप्तोक्त्या स्वीयं शरीरं स्वञ्च ददर्श तथा अहमपि निजं मम स्वरूपं कलयामि। अहं यथा अवगच्छामि तथा यथावत् त्वं मे दर्शयेति। तदानीं गुरुराह - एवं पृच्छसि चेदहं ब्रुवे। तत्त्वंपदयोः अर्थं प्रदर्श्य असिपदेन अद्वयं ब्रह्म यथा भागत्यागलक्षणया बोधयति श्रुतिः तदहं ब्रवीमीति। (५७)

५८.

तत्त्वमसिवाक्यार्थवर्णनस्य भूमिकात्वेन चैतन्यचतुष्टयं निरूपयति।

व्योमैकमेव जलदाम्बरमित्यथाऽन्यत्
कुम्भाम्बरं घटजलस्थनभश्चतुर्धा।
ब्रह्मैकमेव परिपूर्णमपीश्वरश्च
साक्षी च जीव इति नामवशाच्चतुर्धा।। ५८।।

अन्वयः - एकमेव व्योम, जलदाम्बरम् इति अथ अन्यत् कुम्भाम्बरम् (इति), घटजलस्थनभः इति चतुर्धा, (तथा) एकमेव ब्रह्म अपि, परिपूर्णं (ब्रह्म), ईश्वरः, साक्षी च, जीवश्च इति नामवशात् चतुर्धा।

व्याख्या - एकमेव ब्रह्म उपाधिवशात् चतुर्धा इव दृश्यते। व्यवह्रियते च। दृष्टान्तद्वारा एतद् दर्शयति। आकाशम् एकमेव। किन्तु शुद्धाकाशम्, मेघप्रतिबिम्बितमन्यदाकाशम्,घटान्तर्वर्ति अन्यदाकाशम्, एवमेव घटस्थजले प्रतिबिम्बितमन्यदिति उपाधिभेदेन यथा चतुर्धा दृश्यते, तथा ब्रह्मापि परिपूर्णचैतन्यम्, ईश्वरचैतन्यं, साक्षिचैतन्यं (कूटस्थचैतन्यं) जीवचैतन्यम् इति चतुर्धा भिन्नमिव दृश्यते। केवलं नाम्न्येव भेदः। एकमेव वस्तु। (५८)

५९.

क्रमेण तत्त्वमसिवाक्यार्थवर्णनाय उपक्रमते।

वाच्यावीश्वरजीवकावभिहितौ तत्त्वम्पदस्य क्रमात्
लक्ष्यञ्चेन्मलवर्जितः परपुमान् ब्रह्मापि मायोज्झितम्।
क्षीरेष्वाज्यमुपायशालिभिरिव त्वं स्वं विजानासि चेत्
सङ्घातात् सुविविच्य वेदवचनैर्युक्त्या विमुक्तो भवेः।। ५९।।

अन्वयः - तत्त्वम्पदस्य क्रमात् ईश्वरजीवकौ वाच्यावभिहितौ। लक्ष्यं च मायोज्झितं ब्रह्म इत् मलवर्जितः परपुमान् अपि। उपायशालिभिः क्षीरेषु आज्यमिव त्वं सङ्घातात् वेदवचनैः युक्त्या च सुविविच्य विजानासि चेत् विमुक्तो भवेः।

व्याख्या - तत्, त्वम् इति पदयोः क्रमात् ईश्वरः जीवः (जीव एव जीवकः) इति वाच्यार्थौ उक्तौ। लक्ष्यार्थौ च मायाविनिर्मुक्तं, परित्यक्तमायासम्बन्धं, चैतन्यं ब्रह्म, मलरहितः परमपुरुषः, उपाधिसङ्घातविवर्जितः जीवश्च भवतः। क्षीरेषु (क्षीरे, क्षीरविकारेषु – दध्नि, नवनीते च) क्षीरविकारसङ्घाते आज्यं विलीनमस्ति। उपायशालिभिः क्षीरं क्वथयित्वा शीतीकृत्य आतञ्चनं कृत्वा दधित्वमापाद्य तस्मान्मथनेन नवनीतं निष्कृष्य विलाप्य च आज्यं निस्सार्यते एवं शुद्धब्रह्मणि, मायोपहिते चैतन्ये, ईश्वरे, साक्षिचैतन्ये कूटस्थचैतन्ये च यच्चैतन्यमस्ति तदेव स्वस्मिन् अस्ति; तच्च सर्वोपाधिविनिर्मुक्तं शुद्धचैतन्यमेवेति गुरूपदिष्टैः तत्त्वमस्यादिभिर्महावाक्यैः युक्त्या च सम्यगवधारयसि चेत् दुःखदात् संसारबन्धात् त्वं सर्वथा विमुक्तो भवेः। न च पुनरपि संसारबन्धो भवेदिति भीतिः कार्या। यतः क्षीरे, आतञ्चिते क्षीरे, दधनि, नवनीते च आज्यं संसक्तं वर्तते। क्रमशः

क्षीराद् दधि, दध्नो नवनीतं, तत आज्यमिति विकारपरम्परा। परं व्युत्क्रमेण दध्नः न क्षीरसिद्धिः। नैव च आज्यादितरेषाम्।। एवं यस्य गुरूपदिष्टवाक्यश्रवणात्, मननात्, निदिध्यासवाच्च शुद्धचैतन्यमेवाहम् इति द्रढीयानवगमो जातः तस्य पुनः उपाधिवशात् संसारबन्धस्य कथापि न सम्भवेत्।

अत्र क्षीरेषु इति पदस्य क्षीरे दधनि नवनीते च इत्यर्थः। क्षीरं च क्षीरं च क्षीरं च क्षीराणीति। द्वितीयादीनां क्षीरशब्दानां लक्षणया क्षीरविकारभूतदध्याद्यर्थः बोध्यः। (५९)

६०.

तच्च विवेचनं कथं कर्तव्यमित्याह।

विवेचनं वच्मि शवोपमानं शरीरमात्मा न हि भौतिकत्वात्।
प्राणः परात्मा न हि राजसत्वान्नासादृतेः[६४] स्वस्य विनिर्गतोऽयम्।। ६०।।

अन्वयः - विवेचनं वच्मि । शवोपमानं शरीरं न हि आत्मा। भौतिकत्वात्। प्राणः न हि परात्मा। राजसत्वात्। स्वस्य नासादृतेः अयं विनिर्गतः।

व्याख्या - उपाधिसङ्घातात् कथम् आत्मनो विवेचनं कार्यम् इति चेद्वक्ष्यामीति। इदं शवसदृशं शरीरम् आत्मा भवितुं नार्हति। यतो हीदं भूतमयम्। शरीरं हि अन्नमयम्। यथा उक्तं पञ्चदश्याम्, "पितृभुक्तान्नजाद्वीर्याज्जातोऽन्नेनैव वर्धते। देहः सोऽन्नमयो नात्मा प्राक् चोर्ध्वं तदभानतः।। (३.३)" इति। प्राणोऽपि परात्मा भवितुं नार्हति। यतो ह्ययं रजोगुणविकारः। राजसत्वादेव यथा भस्त्रिकया स्वान्तर्भागे गृहीत्वा त्यज्यते वायुः तथा अयं प्राणः नासादृतेः नासारूपायाः दृतेः, भस्त्रिकायाः विनिर्गतो भवति। अयम् इन्द्रियाणां प्रवर्तकः राजसः। किञ्च चैतन्यवर्जितः। तस्मान्नात्मा भवितुमर्हति। (६०)

अत्र चतुर्थपादे नासादृतेः इत्यस्य स्थाने नासाद्रुते इति मुद्रितपुस्तके पाठः। सः अयुक्त इव भाति।

६१.

मनआदिकोशेभ्योऽपि भिन्नः आत्मा इति दर्शयति।

मनोऽपि नात्मा करणत्वतो धीः कर्तृत्वतः सत्वविकारहेतोः।
नैवायमानन्दमयः परात्मा स्वाज्ञानवृत्तौ प्रतिबिम्बितत्वात्।। ६१।।

64. ***RSV 1***, ***RSV 2*** and ***GN*** read as नासाद्रुते. ***Vera*** reads नासौ दृतिः. However नासादृतेः sounds correct.

अन्वयः - करणत्वतः मनोऽपि नात्मा। धीः (अपि नात्मा) कर्तृत्वतः सत्वविकारहेतोः (च)। स्वाज्ञाननिवृत्तौ प्रतिबिम्बितत्वात् आनन्दमयोऽपि नैव परात्मा।

व्याख्या - मनः अन्तःकरणं भवति हि। करणत्वाख्यो धर्मोऽस्तीत्यत एन तन्नात्मा। विज्ञानमयकोशः धीः इत्यच्यते। सोऽपि नात्मा। कस्मात्? कर्तृत्वधर्मविशिष्टत्वात्। आनन्दमयकोशश्च अज्ञानवृत्तौ प्रतिबिम्बितः। तस्मादेव, प्रतिबिम्बितत्वादेव, परात्मा भवितुं नार्हति सः। तदेतदेव पञ्चदशीग्रन्थे एवमुक्तम्-

"कर्तृत्वकरणत्वाभ्यां विक्रियेतान्तरिन्द्रियम्।
विभानमनसी अन्तर्बहिश्चैते परस्परम्।।
काचिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक्।
पुण्यभोगे, भोगशान्तौ निद्रारूपेण लीयते।
कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम्।
बिम्बभूतो य आनन्द आत्मासौ सर्वदा स्थितः।।" इति। (६१)

६२.

एवं, पञ्चकोशाद् भिन्नमात्मस्वरुपम् इति ज्ञात्वा आत्मनो याथात्म्यं चावगम्य मुक्तो भवेरित्याह। नैवायमानन्दमयः परात्मा स्वाज्ञानवृत्तौ प्रतिबिम्बितत्वात्।। ६१।।

सच्चित्सुखं सकलमद्वयमेकमाद्य-
मात्मानमच्युतमखण्डनभःस्वरूपम्।
ज्ञात्वाऽहमित्यनृतदुःखजडस्वरूपात्
त्वं पञ्चकोशकुहरात् परिमुक्तिमेहि।। ६२।।

अन्वयः - सच्चित्सुखं सकलम् अद्वयम् एकमाद्यम् अच्युतम् अखण्डनभःस्वरूपम् आत्मानम् अहम् इति ज्ञात्वा त्वम् अनृतदुःखजडस्वरूपात् पञ्चकोशकुहरात् परिमुक्तिम् एहि।

व्याख्या - सच्चिदानन्दस्वरूपं नित्यनिरतिशयशाश्वतानन्दं निजस्वरुपं ज्ञात्वा पञ्चकोशकुहरात् परिमुक्तिमेहि इति शिष्यं कारुण्यवारान्निधिर्गुरुराह। नाहं पञ्चकोशबद्धः इति ज्ञात्वा, यद्धि सत्स्वरूपं, चित्स्वरूपं सुखस्वरूपं च पूर्णम् (अद्वयम्), अत एव अद्वितीयम् अखण्डचिदानन्दस्वरूपं, यस्मान्न कदापि च्युतिः तत्तादृशं भवति आत्मनो वास्तवं स्वरूपम् इति ज्ञात्वा पञ्चकोशपञ्जरात् मुक्तिमेहीति। अनृतदुःखजडस्वरूपात् पञ्चकोशपञ्जरात् अत्यन्तं विलक्षणं

निजस्वरूपमिति। सच्चित्सुखस्वरूपो ह्यात्मा। सदिति अनृतव्यावृत्तिः। चिदिति जाड्यव्यावृत्तिः। सुखमिति दुःखव्यावृत्तिश्च। (६२)

६३.

शिष्यः यदा पञ्च कोशानतिक्रम्य स्वस्वरूपं द्रष्टुं यतते तदा स शून्यमेव पश्यति। किमहं कालाञ्जनतुल्यं नभः इति पृच्छति च गुरुम्।

कोशेषु पञ्चसु धुतेष्वहमद्य पश्चात्
शून्यं विनैव न हि किञ्चिदवैमि नाथ।
[65]कालाञ्जनोपममहं तम एव चासं
साधो वदेति परिपृच्छति सोऽप्युवाच ।। ६३।।

अन्वयः - नाथ, पञ्चसु कोशेषु धुतेषु पश्चात् अहं शून्यं विना न एव किञ्चिदद्य अवैमि हि। कालाञ्जनोपमं तमः एवाहमासं च। साधो (किमेतदेवम् ?) वद इति (शिष्ये) पृच्छति सः (गुरुः) अपि उवाच।

व्याख्या - हे नाथ भवदुक्तरीत्या अन्नमयादीनेकैकानपि कोशान् नेदं नेदमित्यतिक्रम्य यदाहं स्थितः, कोशेषु पञ्चस्वपि नाहमिति परित्यक्तेषु शून्यं विना न किञ्चिदहमवगच्छामि। अहं कृष्णाञ्जनसमानम् अन्धं तमः एवासमिति दृष्टं मया। किमेतत् पुञ्जीभूतं तमो वा मदीयं स्वरूपम् इति शिष्ये पृच्छति गुरुः वक्ष्यमाणक्रमेण उवाचेति। (६३)

६४.

स्वानुभूतिरेव प्रमाणम् इति दर्शयत्याचार्यः। आत्मा न तमःस्वरूपः। यथा 'दशमस्त्वमसि' इत्युदाहरणे दशमः स्वमदृष्ट्वा स्वस्य स्थाने शून्यं दृष्ट्वा बभ्राम; तदनु पान्थेन स्वयं स्वं द्रष्टुमुपदिष्टः अपश्यदात्मानं तथा त्वमपि सावधानं स्वमुपधारय इति उपदिशत्याचार्यः।

सङ्ख्याय मोहेन नवैव पूर्वं भ्रान्त्या[66] स्वमज्ञाय चिरं परोक्त्या।
शून्यं ततो वा दशमो हि[67] जानंस्त्वमेव सर्वं परिवेत्सि विद्वन्।। ६४।।

अन्वयः - दशमः, पूर्वं मोहेन नवैव सङ्ख्याय, भ्रान्त्या स्वमज्ञाय, चिरं परोक्त्या ततः शून्यं (स्वं) हि जानन् (यथा) वा (अतिष्ठत् तथा) त्वमेव हे विद्वन् सर्वं परिवेत्सि।

---

65. Vera reads the quarter as कालाञ्जनोपममहं तम एव वा स्याम्.

66. ***Vera*** reads as भ्रान्त्वा.

67. ***GN*** and ***Vera*** read as ह्यजानत्.

व्याख्या - पूर्वत्र प्रस्तुते 'दशमस्त्वमसि' इत्युदाहरणे दशमः, प्राक्, नवैव जानन्, आत्मानमपहाय सङ्ख्याय, भ्रमवशाद् आत्मानमविगणय्य, चिरं दुःखितः अभवत्; सः पान्थेन गणनं कुरु इत्यादिष्टः नव जनान् सङ्ख्याय स्थितः। तदानीं दशमस्त्वमसि इति पान्थेन उक्ते सति सः यत्र स्वस्थाने शून्यमपश्यत् तत्रैव सन्तमात्मानं पर्यपश्यत्, स्वयं च दृष्ट्वा विगतदुःखोऽभवत्, तथा हे विद्वन्, ज्ञानस्वरुप, त्वमेव स्वयं स्वं परिवेत्सि इति गुरुराह। (६४)

६५.

त्वमेव स्वयं स्वं परिवेत्सि इति किल उक्तम्। तत् समर्थयति सर्वसाक्षी आत्मा इति दर्शयन्। पूर्वोक्तमेव तत्तत्त्वं द्रढयति -

जाग्रत्स्वप्नसुषुप्तयो[68] बहुतराः कालास्त्रयो[69] भूयशः
के वा सन्ति गता भवाम्बुनिलये कल्लोलवर्गा इव।
सर्वांस्तानपि [70]सर्वदृक्किल भवान् द्रष्टैव नो संशयः
कण्ठेकालपदाम्बुजद्वयमहं स्पृष्ट्वा वदाम्युच्चकैः।। ६५।।

अन्वयः - भवाम्बुनिलये कल्लोलवर्गा इव जाग्रत्स्वप्नसुषुप्तयः भूयशः त्रयः बहुतराः कालाः एवं के वा (भावाः) गताः सन्ति तान् सर्वान् अपि सर्वदृग् भवान् द्रष्टा एव। संशयः न उ। अहं कण्ठेकालपदाम्बुजद्वयं स्पृष्ट्वा उच्चकैः वदामि।

व्याख्या - संसारसागरे कल्लोलसदृशाः ये वा के वा भावाः, यथा जाग्रदाद्यवस्थाः भूतभविष्यद्वर्तमानभेदभिन्नाः कलाकाष्ठादिकालावयवविशेषाः बहुविधाः उतवा देशकालावस्थादिषु भेदकाः गताः अनुभूताः सन्ति। तान् सर्वान् त्वमपश्यः। पश्यन्नसि। द्रक्ष्यसि च। यतः भवान् सर्वदृक्। सर्वसाक्षी। न भवान् दृश्यम्। केवलं द्रष्टैव भवान्। ज्ञाता एव भवान् । न ज्ञेयम्। अत एव स्वयं द्रष्टुं समर्थश्च। अहमेतत् सत्यं ब्रवीमि। यः कण्ठेकालः सनकादिशिष्योपदेशार्थं वटतरोर्मूले दक्षिणामूर्तिरूपेण विराजते तस्य ज्ञानमूर्तेः पदाम्बुजद्वन्द्वं स्पृष्ट्वा शपथं करोमीति। (६५)

६६.

आत्मा हि स्वानुभूत्येकसिद्धः। तद्दर्शनाय दृगन्तरं नावश्यकमिति द्रढयति।

---

68. ***Vera*** reads wrongly as जाग्रत्स्वप्नसुषुप्तऽयो.

69. ***RSV 2*** wrongly reads कालस्त्रयो.

70. ***RSV 2*** wrongly reads सर्वहिक्किलभवान्द्रष्टैव.

पश्यन्तं निखिलं पदार्थनिचयं मां केन पश्यामि ने-
त्याख्यासि[७१] स्वयमुद्यतस्य महसो नैवास्ति तेजोऽन्तरम्[७२]।
स्वाज्ञानाद्दशमस्य विभ्रमजुषः पश्चात्स्वयं जानतः
स्वं मुक्त्वाऽस्ति ततः परो न हि वद स्वस्यावबोधोदये[७३]।। ६६।।

अन्वयः - निखिलं पदार्थनिचयं पश्यन्तं मां केन न पश्यामि इति आख्यासि? स्वयम् उद्यतस्य महसः तेजोऽन्तरं नास्ति एव। स्वाज्ञानात् विभ्रमजुषः दशमस्य पश्चात् स्वयं जानतः स्वस्य अवबोधोदये स्वं मुक्त्वा ततः परः नास्ति हि? वद।

व्याख्या -"अहं सर्वं पदार्थजातं पश्यामि। तेनैव प्रकारेण कस्मान्मां द्रष्टुं न शक्नोमि?" इति पृच्छसि चेत् चिन्तय। स्वयंप्रकाशकस्य दीपस्य प्रकाशनार्थं अन्यत् ज्योतिः आवश्यकं किम्? नावश्यकं किल। पूर्वोक्ते 'दशमस्त्वमसि' इत्युदाहरणे दशमः, भ्रान्तिवशात् आत्मानम् अविगणय्य, पश्चात् आप्तोक्त्या स्वयं स्वम् अजानात्। तस्य स्वदर्शनार्थं स्वमन्तरेण नान्यत् किञ्चिदपेक्षितमासीत्। स्वयं प्रकाशमानस्य आत्मनः ज्ञानार्थं ज्ञापकं किमपि नावश्यकम्। (६६)

६७.

आत्मा स्वयं ज्ञानस्वरूपः तद्बोधनार्थम् अन्यत् ज्ञापकं नावश्यकमिति स्पष्टयति।

ज्ञानस्यापि ज्ञापकं ज्ञानमस्तीत्याख्यातॄणां दुर्धियां साऽनवस्था।
नाज्ञातस्त्वं ज्ञात एवासि न त्वं ज्ञातारं त्वां[७४] स्वानुभूत्यैव विद्धि।। ६७।।

अन्वयः - ज्ञानस्यापि ज्ञापकं ज्ञानमस्ति इति आख्यातॄणां सा अनवस्था (स्यात्)। त्वं न अज्ञातः। नैवासि ज्ञातः। ज्ञातारं त्वां स्वानुभूत्या एव विद्धि।

व्याख्या - आत्मा ज्ञानस्वरूपः। ज्ञानं च स्वयं प्रकाशते। तत्प्रकाशनार्थम् अन्यद् ज्ञानमावश्यकमिति केचन वदन्ति। स न स्वयं प्रकाशते इति। कुतर्करसिकानां तेषाम् अनवस्था दुर्वारा भवेत्। ज्ञानस्य ज्ञापकं ज्ञानान्तरम् आवश्यकं चेत् तद् द्वितीयं ज्ञानं केन ज्ञायेत? तत्प्रकाशनार्थम् अन्यत्, तृतीयं ज्ञानमपेक्षितं स्यात्। तत्प्रकाशनार्थम् अन्यत् चतुर्थम् इत्येवंरीत्या अनवस्था आपद्येत। त्वं, नाम

---

71. ***Vera*** reads as नेत्याख्याहि.

72. ***Vera*** reads as तेजोऽन्तरा.

73. ***Vera*** reads as स्वस्वावबोधोदये. ***RSV2*** and ***GN*** read as वदस्वास्यावबोधोदये.

74. ***Vera*** reads as स्वं.

जीवः, सदा ज्ञात एव। न कदापि अज्ञातः। अहमहमिति बोधः सदा स्फुरन्नस्ति किल। अथवा त्वं कदापि न ज्ञातः। अर्थात् ज्ञानस्वरूपः कदापि ज्ञानस्य विषयो भवितुमर्हतीति। तत् स्वयं ज्ञानम्। स्वयं प्रकाशते। तस्य ज्ञानविषयत्वं नास्तीति। तस्मात् ज्ञातारम् आत्मानं (ज्ञानस्वरूपं) त्वं स्वानुभवेन वेत्तुमर्हसीति। (६७)

६८.

ज्ञानत्वेन ज्ञेयत्वेन वा यद्यद् भासते तत्सर्वं (अथवा सर्वमिदं) बोधस्वरूपमेवेति दर्शयति।

पिष्टस्येव कृतस्य शर्करिकया यद्विद्यते तद्गतं
माधुर्यं सकलं तदेव विदितं नैसर्गिकं शार्करम्।
तच्चेदन्त्विति भासते यदखिलं तज्ज्ञानमेव[75]स्वयं
सर्वोपाधिभिरान्तरं विरहितं त्वं विद्धि बोधं परम्।। ६८।।

अन्वयः - शर्करिकया कृतस्य पिष्टस्य यत् माधुर्यं विद्यते सकलं तद् तद्गतमेव नैसर्गिकं शार्करं विदितम्। तद्, इदम् इति च यद् भासते तदखिलं तु ज्ञानमेव। त्वं स्वयं सर्वोपाधिभिर्विरहितम् आन्तरं परं बोधं विद्धि।

व्याख्या - यथा शर्करिकया, गुडादिना, कृतस्य पिष्टस्य यत् प्रत्यंशं माधुर्यं तद् वस्तुतः शर्करिकाया एव नैसर्गिकं माधुर्यं, तद्वत् अनुभूयमाने अस्मिन् जगति, तदिति इदमिति च यद् भासते तदखिलं ज्ञानमेव। सर्वोपाधिभिर्विरहितम् आन्तरं बोधं त्वं स्वयं जानीहि इति।

तदिति ज्ञातृत्वेन यद् भासते यच्च इदमिति ज्ञेयत्वेन प्रकाशते तदुभयमपि, निखिलमिदं पदार्थजातं वस्तुतः ज्ञानमेव। सर्वैरुपाधिभिर्विरहितम् आन्तरं यद् बोधस्वरूपं तत्स्वयं वेदितव्यम् इति। (६८)

६९.

दशमस्त्वमसीति बोधनार्थं सामान्यतः तत्त्वमसिवाक्यार्थ स्वरूपं निरुपितम्। इदानीं विशेषतस्तन्निरुप्यते।

अयं [76]भवांस्त्वम्पदलक्ष्यमेव ब्रह्माद्वयं तत्पदलक्ष्यमेव।
अन्तान्वितौ जीवपरौ च वाच्यौ नैक्यं तयोर्भेदवतोः कदाऽपि।। ६९।।

---

75. ***RSV 1*, *RSV 2*** read as त्वज्ञानमेव. ***GN*** and ***Vera*** read as तज्ज्ञानमेव.

76. ***RSV 1*, *RSV 2*** and ***GN*** read as भवांस्त्वत्पदलक्ष्यमेव. ***Vera*** reads as भवांस्त्वम्पदलक्ष्यमेव.

अन्वयः - त्वम्पदलक्ष्यम् अयं भवानेव। तत्पदलक्ष्यं च अद्वयं ब्रह्म। वाच्यौ च अन्तान्वितौ जीवपरौ। भेदवतोः तयोः कदापि न ऐक्यम्।

व्याख्या - त्वंपदस्य लक्ष्यार्थः भवानेव; अर्थात्, प्रष्टैव (जीव एव); कूटस्थचैतन्यमेव। तत्पदस्य च लक्ष्यार्थः शुद्धमद्वयं ब्रह्म। अनयोः पदयोः वाच्यार्थौ च उपाधिविशिष्टौ तावेव। त्वंपदस्य वाच्यार्थः मायया उपाध्या अवच्छिन्नः जीवः। तत्पदस्य च अविद्यया उपाधिना अवच्छिन्नः ईश्वरः। तयोः जीवेश्वरयोः वस्तुतो भिन्नयोः कदापि एकता न सम्भवति।

एवं भिन्नयोरनयोः पदार्थयोरैक्यं लक्षणया बोध्यते। कथं बोध्यते इति, ऐक्यं च तयोः कथमिति अग्रे वक्ष्यते। (६९)

७०.

जीवेश्वरयोः व्यावहारिकीं महतीं भिदां दर्शयति।

कीदृग्भूता भिदेति प्रवदसि यदि तां वच्म्यहं जीवशंभ्वो-
[77]राख्यारूपोरुभेदैस्तनुभिरुरुतराभिः प्रकाशैः प्रबोधैः।
शक्त्या सिद्ध्या क्रियाभिर्लघुविपुलतरोपाधिभिश्चैनयोर्वा
दूराद्दूरे स्थितत्वाद्धरणिगगनवन्नैकभावः कदाऽपि।। ७०।।

अन्वयः - जीवशम्भ्वोः कीदृग्भूता भिदा इति यदि प्रवदसि (तर्हि) तामहं वच्मि। आख्यारूपोरुभेदैः उरुतराभिः तनुभिः प्रकाशैः प्रबोधैः शक्त्या सिद्ध्या क्रियाभिः लघुविपुलतरोपाधिभिः गगनधरणिवद् दूराद् दूरे स्थितयोः एनयोः कदापि एकभावो न।

व्याख्या - जीवेश्वरयोः को भेदः इति पृच्छसि चेदहं कथयामि इति गुरुः तमाख्याति। तयोः आख्यायां भेदः अस्ति। स त्वेवम् - ईश्वरः हिरण्यगर्भो वैश्वानरः इत्याख्यायते। जीवश्च तैजस इति। रूपे च तयोः उरुभेदः अस्ति। महान् भेदः अस्ति। ईश्वरस्य उपास्यरूपम्। जीवस्य तु मानुषाद्युपासकरूपम्। शरीरेण चास्ति महान् भेदः। जीवस्य शरीरस्वीकारे अस्वातन्त्र्यम्। ईश्वरस्य च स्वातन्त्र्यम्। किञ्च लीलामात्रस्वीकृतशरीरस्य परमेश्वरस्य अनेकानि रूपाणि। जीवस्य बोधः पराधीनः, ईश्वरस्य तु निरावृतत्वात् स्वतन्त्रः। जीवस्य शक्तिः अस्वतन्त्रा। ईश्वरस्य तु स्वतन्त्रा। सिद्धयोऽपि तयोर्भिन्नाः। ईश्वरस्य

77. ***Vera*** reads the quarter as आख्यारूपोरुभेदैस्तनुभिरतितरां चावकाशैः प्रबोधैः.

लीलाकैवल्यमात्राः सृष्ट्यादिरूपाः क्रियाः। जीवस्य तु वासनावशात्पुण्यापुण्यमिश्राः। एवम् आकाशभूम्योर्यदन्तरं तन्महदन्तरं वर्तते जीवेश्वरयोः। न कदापि ऐक्यं तयोरिति। (७०)

७१.

तत्त्वमसीतिवाक्यार्थज्ञानाय लक्षणा आवश्यिकी इति सामान्यतो लक्षणास्वरूपमभिदधाति ।

मुख्यार्थस्य विरोधो[७८] यत्र भवेत्तत्र लक्षणा ग्राह्या।
तत्रैका जहती स्यादजहत्यपरोभयात्मिका च स्यात्।। ७१।।

अन्वयः - यत्र मुख्यार्थस्य विरोधः तत्र लक्षणा ग्राह्या भवेत्। तत्र एका जहती स्यात्। अपरा अजहती। (अन्या) उभयात्मिका च स्यात्।

व्याख्या - यत्र मुख्यार्थस्य, वाच्यार्थस्य विरोधः मानान्तरविरोधः तत्र लक्षणाख्या वृत्तिः ग्राह्या भवेत्। सा च त्रिविधा। जहती, अजहती, उभयात्मिका चेति। (७१)

७२.

सोदाहरणं निरूपयति।

गङ्गायामिति घोषो जहत्यजहतीह धावति[७९] शोणः।
उभयात्मिका तु सोऽयं द्विज[८०] इत्येताभिरेव न विरोधः।। ७२।।

अन्वयः - गङ्गायां घोषः इति जहती। इह शोणः धावति इति अजहती। सोऽयं द्विजः इति उभयात्मिका। एताभिरेव न विरोधः।

व्याख्या - गङ्गायां घोषः इति जहल्लक्षणायाः उदाहरणम्। इह शोणो धावतीति अजहल्लक्षणायाः। सोऽयं द्विजः इति उभयात्मिकायाः जहदजहल्लक्षणायाः उदाहरणम्। त्रिष्वपि एषु वाक्येषु मुख्यार्थस्य विरोधः लक्षणया परिहृतः। गङ्गायां घोष इत्यत्र प्रवाह एव मुख्यार्थः गङ्गाशब्दस्य। तस्मिन् घोषस्य आधारत्वं न सम्भवतीति विरोधः। प्रवाहरूपं मुख्यमर्थं परित्यज्य गङ्गातीररूपः अर्थः स्वीक्रियते। विरोधश्च परिहृतः। प्रवाहरुपो मुख्योऽर्थस्त्यक्त इति जहल्लक्षणा। शोणो धावतीत्यत्र शोणस्य गुणस्य धावनायोगाद् विरोधः।

78. ***Vera*** reads wrongly as विराधो.

79. ***Vera*** reads as धावति हि.

80. ***RSV 2*** wrongly reads द्विल.

स च शोणगुणमपरित्यज्य तद्गतः अश्वस्य स्वीकारात्परिहृतः। एवम् अजहल्लक्षणया विरोधपरिहारः। मुख्यार्थो न त्यक्तः इत्यजहल्लक्षणा। सोऽयं द्विज इत्यत्र स इति कालान्तरे अन्यत्र देशे दृष्टो द्विज उद्दिष्टः। अयमित्यनेन च एतद्देशकालावच्छिन्नो द्विजः। देशकालादीनां भेदकानां हानेन द्विजपिण्डमात्र-अहानेन च अभेदबोधो विरोधपरिहारश्च। एवमियं जहदजहल्लक्षणा। (७२)

७३.

जहदजहल्लक्षणाम्, अत्र विशिष्य उपयोगित्वेन, विशदयति।

सोऽयं द्विज इति वाक्ये तदिदम्भावेन यो विरोधोऽस्ति।
परिहृत्यैव तमेतं द्विजमात्रैकत्वमेतदविरोधः।। ७३।।

अन्वयः - सोऽयं द्विज इति वाक्ये तदिदम्भावेन यो विरोधः अस्ति तमेतं परिहृत्य एतद् द्विजमात्रत्वम् (स्वीक्रियते)। अविरोधः (स्फुरति च)।

व्याख्या - सोऽयं द्विज इति वाक्ये तच्छब्द-इदंशब्दाभ्यां भिन्नौ देशकालौ उच्येते। तयोः सामानाधिकरण्याभावाद् विरोधः। तौ देशकालौ परिहृत्य द्विजपिण्डमात्रत्वेन अत्यक्तेनांशेन परिहारः। (७३)

७४.

तत्त्वमसीतिवाक्यसमन्वयं दर्शयति।

[81]तत्त्वम्पदं ब्रह्मपदञ्च साक्षिणं नोपेक्ष्य किञ्चिद्भ्रममप्युपेक्ष्य[82]।
तद्धि त्वमेवासि सदा त्वमेव तद्ध्यसीति[83] वाक्यं परमाह पूर्णम्।। ७४।।

अन्वयः - ब्रह्मपदं तत्पदं साक्षिणं त्वंपदञ्च न उपेक्ष्य; किञ्चिदुपेक्ष्य, भ्रममपि उपेक्ष्य तत् त्वमेवासि हि; सदा त्वं तदेव ह्यसि इति पूर्णं वाक्यं परम् आह।

व्याख्या - ब्रह्मपदमित्यस्य ब्रह्मणः आस्पदम् इत्येवंरूपः अर्थः बोध्यः। अथवा ब्रह्म पद्यते ज्ञायते अनेन इति अखण्डसच्चिदानन्दस्य निरवच्छिन्नस्य निरवधिकस्य निर्गुणस्य सूचकः इत्यर्थो बोध्यः। तत्पदबोध्यं ब्रह्मरूपमर्थम् अनुज्झित्वा, एवमेव त्वंपदबोध्यं साक्षिचैतन्यरूपमर्थमपरित्यज्य, किञ्चिदुपेक्ष्य - अर्थात् अर्थभागं कञ्चित् त्यक्त्वा (उपाध्यादिभेदकजातं त्यक्त्वेत्यर्थः),

---

81. ***Vera*** reads as तत्त्वं परं ब्रह्म परञ्च.

82. ***RSV 2*** wrongly reads उपेक्ष्म.

83. ***RSV 1*** and ***RSV 2*** read as तद्यसीति. ***GN*** reads as तदसीति. ***Vera*** reads as असीति. It may be seen that all these readings are wrong.

भेदबोधकारणं भ्रममपि त्यक्त्वा, तत् निरुपाधिकं निरवच्छिन्नं शुद्धचैतन्यं यत् तदेवासि त्वम्। तत् त्वमेवासि च इति अभेददर्शनरूपः अर्थः बोध्यः। एवं भागत्यागलक्षणया (जहदजहल्लक्षणया), व्यावहारिकदशायां महान्तं भेदं वहतोः शुद्ध-साक्षिचैतन्ययोः अभेदः बोध्यते इति। (७४)

७५.

जीवेश्वरयोरैक्यबोधनाय पूर्वोक्तम् आकाशदृष्टान्तं स्मारयन्नाह घटाम्भसीति।

घटाम्भसि घनाम्भसि स्फुरति यद् द्विधा पुष्करं
मृषा भवति तद्द्वयं घटघनाभ्रमेकं[84] नभः।
चिदेकरसयोस्तथा परमसाक्षिणोरेकतां[85]
शिवोऽहमिति भावयन्ननुभवस्वरूपं[86] निजम्।। ७५।।

अन्वयः - घटाम्भसि घनाम्भसि (च) यत् पुष्करं द्विधा स्फुरति, तद् द्वयं मृषा भवति। घटघनाभ्रम् एकं (एव) नभः। चिदेकरसयोः परमसाक्षिणोः एकतां, निजम् अनुभवस्वरूपं (च) भावयन् शिवोऽहमिति भावयन् (आस्व)।

व्याख्या - घनजलाकाशत्वेन मेघजलाकाशत्वेन च यद् भिन्नमाकाशं प्रतिभातं तदुभयमपि न सत्यमाकाशम्। उभयमपि प्रतिबिम्बरूपम्। घटाम्भसि घनाम्भसि च यत् प्रतिबिम्बितं तद् बिम्बरूपं महाकाशं तु एकमेव। एवमेव, परमं यत् शुद्धचैतन्यं यच्च साक्षिचैतन्यम् एते उभे अपि एकमेव। परमसाक्षिरूपे उभे अपि वस्तुतः शुद्धचैतन्यमेव। परमस्य, साक्षिणश्च मिथो भेदो नास्ति। उभावपि चिदेकरसावेव। चित् एक एव रसो यस्येति। अर्थात् शुद्धबोधस्वरूपावुभौ। तयोः ईदृशीम् एकतां सम्यगवगम्य, अहमपि शिवः, स एव शुद्धबोधः इति भावयन्, शुद्धचैतन्यस्वरूपादभिन्नोऽहमिति भावयन् स्वानुभूतौ रमस्व इति गुरुः शिष्यमाह।

श्लोकेऽस्मिन् क्रियापदं न दृश्यते। द्राविडमूलग्रन्थे "चिवोकम् एन्ड्रिरुन्तिडाये" (civōgamenṟiruntiṭāyē) इत्येवं शिवोहम् इति सुखमास्व इति स्पष्टमभिहितम्। अन्तिमपादे भावयन्ननुभवस्वरूपम् इत्यस्य स्थाने भावयेरनुभवस्वरूपम् इति पाठः स्वीक्रियते चेद्भरम्। (७५)

---

84. Vera reads as घटघनस्थमेकं.

85. ***RSV 1***, ***RSV 2*** and ***GN*** read as एकतः. ***Vera*** reads as एकताम्.

86. भावयेरनुभवस्वरूपं would have been a better reading.

७६.

आचार्यस्य आदेशानुसारम् आचरितवतः शिष्यस्य ब्रह्मानुभूतिर्जातेत्याह –

स्वाचार्योक्तस्वतत्त्वप्रवणतरमनाः पञ्च कोशान् विहाय
त्यक्त्वा शून्यं निजान्तःस्फुरितमथ तथोपेक्ष्य किञ्चिन्नभावम्[87]।
कूटस्थब्रह्मभावावगतिविगलनाल्लीनवृत्तिर्महात्मा[88]
सत्यानन्दैकरूपं विमलतरमजं ब्रह्म पूर्णं ददर्श ।। ७६।।

अन्वयः - (सः) महात्मा स्वाचार्योक्तस्वतत्त्वप्रवणतरमनाः पञ्च कोशान् विहाय तथा निजान्तःस्फुरितं शून्यं त्यक्त्वा किञ्चिन्नभावम् (अपि) तथा उपेक्ष्य कूटस्थब्रह्मभावाव गतिविगलनात् लीनवृत्तिः सन् सत्यानन्दैकरूपम् अजं विमलतरं पूर्णं ब्रह्म ददर्श।

व्याख्या - आचार्येण यद् आत्मनः स्वरूपं यथातथं दर्शितं तस्मिन् संलग्नचेताः स महात्मा अन्नमयादीन् कोशान् नाहमिति परित्यज्य, तदपक्रमे अनुभूतं शून्यमपि नेदमिति त्यक्त्वा, भेदभावं सर्वथा परित्यज्य (किञ्चिन्नभावं - किञ्चित्प्रतियोगिकभेदभावं परित्यज्य) कूटस्थब्रह्मभावावगतिः या अस्ति तस्या अपि गळनात् निश्शेषसंलीनवृत्तिः सन् सत्यस्वरुपम् आनन्दस्वरूपं चिद्घनं ब्रह्मभावमवाप इति। (७६)

७७.

दीर्घकालं ब्रह्मरसमग्नो बभूवेत्याह -

अनुभवसुखतोये गाढमग्नः[89] सुपूर्णः
तनुमुखकरणानां संक्षयाद् बोधमात्रः।
स्वगुरुसविध एव प्राप्य निष्ठां महात्मा
परनभसि सुषुप्तो दीर्घकालं बभूव।। ७७।।

अन्वयः - (सः) महात्मा तनुमुखकरणानां संक्षयाद् बोधमात्रः अनुभवसुखतोये

---

87. ***RSV 1*** and ***RSV 2*** read as कञ्चिन्नभावम्. ***GN*** reads as कञ्चिज्ज्ञभावम्. ***Vera*** reads as कञ्चिद्ज्ञभावम्. We have retained the reading कञ्चिन्नभावम् keeping in conformity with the original Tamil text कोञ्चमाम् इरुप्पुं विट्ट् (*koñcamām iruppuṃ viṭṭu*)

88. ***GN*** wrongly reads as कूटस्थब्रह्मभावावगतिविगलनाल्लीनवृतिर्महात्मा. ***Vera*** wrongly reads as कूटस्थब्रह्मभावावगतिविगलाल्लीनवृत्तिर्महात्मा.

89. ***Vera*** reads as भासमग्नः

गाढमग्नः (अत एव) सुपूर्णः परनभसि निष्ठां प्राप्य स्वगुरुसविध एव दीर्घकालं सुषुप्तो बभूव।

व्याख्या - स महानुभावः शिष्यः शरीरादीनां करणानाञ्च संक्षयात्, तत्र अभिमानस्य सम्यक् क्षयाद्, बोधमात्रः सन्, चिद्रसः सन्, सुखानुभवे स्वानुभवसौख्ये गाढमग्नः, परमभूमतामापन्नः, पराकाशे निष्ठां प्राप्य स्वगुरुसमीपे एव दीर्घकालं संलीनो बभूव इति। (७७)

७८.

चिरकालात् प्रबुध्य शिष्यः गुरुं पप्रच्छेत्याह -

स्थित्वा चिराय परमाम्बररूपमात्रो
बुद्ध्वा [९०]पुनर्जगदिदं निजदेशिकञ्च।
च्योतत्सुखाम्बुनयनः शिरसा प्रणम्य
बद्धाञ्जलिः पुलकिताङ्ग इदं बभाषे।। ७८।।

अन्वयः - परमाम्बररूपमात्रः चिराय स्थित्वा पुनरिदं जगत् निजदेशिकञ्च बुद्ध्वा च्योतत्सुखाम्बुनयनः (सन्) शिरसा प्रणम्य बद्धाञ्जलिः (सन्) पुलकिताङ्गः इदं बभाषे।

व्याख्या - अखण्डबोधमात्रः चिरकालं स्थित्वा ततः स शिष्यः शनैः जगदिदं ज्ञातवान् स महात्मा। गुरुवरञ्च दृष्टवान्। विगळदानन्दाश्रुनयनः शिरसा गुरुं प्रणम्य पुलकिताङ्गः साञ्जलिबन्धं गुरुं बभाषे इति। (७८)

७९.

तद्वचःप्रकारमाह स्वामिन्निति।

स्वामिन्ममान्तःस्थितघोरवासनानिशाप्रणाशोदितचण्डभानो।
तुभ्यं नमोऽ[९१]स्मत्कृतजन्ममुक्तेः किं वा विदध्यामहमस्मि किं वा।। ७९।।

अन्वयः- स्वामिन् मम अन्तःस्थितघोरवासना निशाप्रणाशोदितचण्डभानो तुभ्यं नमः। अस्मत्कृतजन्ममुक्तेः किं वा अहं विदध्याम्? किं वा अस्मि?

व्याख्या - हे नाथ! मदीयहृदये यः अनादिवासनारूपः गाढान्धकार आसीत् तस्य प्रणशनाय प्रवृत्तप्रचण्डरश्मे भगवन्! तुभ्यं नमः। सर्वथा अहं

90. ***RSV 2*** wrongly reads पुनजगदिदं.

91. ***Vera*** reads as त्वत्कृतजन्ममुक्तेः.

सन्नतः। मम संसारबन्धस्य य उच्छेदः भवता कृतः तदर्थं किं वा अहं कुर्याम्? किं वा अहं भवेयम्? भवानाज्ञापयतु तत्तथैव अक्षरशः कर्तुं सन्नद्धोऽस्मीति शिष्यः हर्षातिरेकं कार्तज्ञ्यभारं च प्राकाशयत्। (७९)

८०.

अहैतुकदयासिन्धुर्गुरुः, "सदा सच्चिद्रूपो भव ; तदेवालं मह्यम्" इति कथयति।

इत्थं शिष्ये वदति स गुरुस्तुष्टचित्तः प्रपश्यन्
संस्थाप्याग्रे बहुलकृपया प्राह भूयो विनीतम्।
त्यक्त्वा बन्धत्रयमिदमसद्वासनातः प्रतीतं
सच्चिद्रूपो भवसि यदि मे क्लृप्त एवोपकारः।। ८०।।

अन्वयः - शिष्ये इत्थं वदति स तुष्टचित्तो गुरुः विनीतं (तम्) अग्रे संस्थाप्य बहुलकृपया प्रपश्यन् भूयः प्राह- "असद्वासनातः प्रतीतम् इदं बन्धत्रयं त्यक्त्वा सच्चिद्रूपो यदि भवसि (तर्हि) मम उपकारः क्लृप्त एव।"

व्याख्या - शिष्येण एवमुक्तः गुरुः सन्तुष्टचित्तः तम् अग्रे संस्थाप्य कृपापरिप्लुतेन दृष्टिविशेषेण अनुगृह्णन् भूय एवाह। असद्वासनावशाद् भासमानं वक्ष्यमाणस्वरूपं बन्धत्रयं विहाय यदि सच्चित्स्वरूपः भवसि। अनेनैव मे प्रत्युपकारः कृतः स्यात्। नान्यत् किञ्चित् काङ्क्षे इति। (८०)

८१.

एतच्छ्रुत्वा तत्त्वमस्यादिवाक्यार्थस्वानुभवादपि च्युतिः भवेत् किम् इति पृच्छति शिष्यः।

त्वमहमिति विहीनं व्योमवत्सर्वपूर्णं
स्वयमनुभवमात्रं न च्युतं स्यात् कदाऽपि।
इति वदति स शिष्ये प्राह भूयो गुरुक्त्या
स्फुरदपि निजरूपं न स्थितिं याति बन्धैः।। ८१।।

अन्वयः - त्वम् अहम् इति विहीनं व्योमवत् सर्वपूर्णं स्वयम् अनुभवमात्रं (एतत्) कदापि न च्युतं स्यात् (किल)? इति शिष्ये वदति स भूयः प्राह। गुरुक्त्या स्फुरदपि निजरूपं न स्थितिं याति। बन्धैः (हेतुभिः)।

व्याख्या - शिष्यस्यायं प्रश्नः। यदेतद् आकाशवत्सुपूर्णम् अनुभवैकवेद्यं स्वयम् अनुभूतं, यत्र अहं, त्वम् इत्यादिभेदाः न सन्ति, तत् किं कदापि विनष्टं

न स्यात् किल इति। गुरुः प्राह-"गुरूक्त्या स्फुरदपि निजरूपं स्थितिं न याति, तत्र प्रतिष्ठितं न भवति, कदाचित् नष्टमपि स्यादिति। तत्र प्रतिष्ठासिद्धौ वक्ष्यमाणस्वरूपाः बन्धाः प्रतिबन्धकाः इति। (८१)

८२.

के ते प्रतिबन्धकीभूता बन्धाः इत्याह -

अज्ञानसन्देहविपर्ययास्ते बन्धाश्चिराभ्यासवशात् प्रबोधम्।
घ्नन्त्येव[92] नित्यं श्रुतिचिन्तनाभ्यां ध्यानेन चैतान् विलयं नयस्व।। ८२।।

अन्वयः - अज्ञानसन्देहविपर्ययाः ते बन्धाः चिराभ्यासवशात् प्रबोधं घ्नन्त्येव। एतान् श्रुतिचिन्तनाभ्यां ध्यानेन च नित्यं विलयं नयस्व।

व्याख्या - अज्ञानं, सन्देहः, विपर्ययः इत्याख्याः ते बन्धाः। एते चिरकालाभ्यासवशात् प्रबोधं स्वानुभूतिं घ्नन्त्येव, नियमेन नाशयन्ति। तानेतान् नित्यं, नियमेन क्रियमाणैः श्रवणमनननिदिध्यासनैः नाशय इति गुरुः उपदिशति। श्रवणेन अज्ञानम्, मननेन सन्देहं, निदिध्यासनेन च विपर्ययम् इति च विवेकः। (८२)

८३.

बन्धानां शक्तिं दर्शयति -

बद्धोऽनलो[93] नैव दहेत्तृणाद्यं बोधस्तथाऽज्ञानमलं न हन्यात्।
बन्धप्रहाणाय चिरं समाश्रयेच्छ्रुतिञ्च चिन्तामपि तं समाधिम्।। ८३।।

अन्वयः - बद्धः अनलः तृणाद्यं न दहेदेव। तथा बोधः अज्ञानमलं न हन्यात्। बन्धप्रहाणाय श्रुतिं, चिन्तां तं समाधिं च अपि चिरं समाश्रयेत्।

व्याख्या - मणिमन्त्रादिना बद्धः निरुद्धशक्तिको वह्निः यथा तृणाद्यं दाह्यं वस्तु दग्धुं न शक्नोति तथा ज्ञानम्, अज्ञानमलं निहन्तुं न प्रभवति। तस्माद् अज्ञानादीनां त्रयाणां बन्धानां प्रहाणाय,उन्मूलनाय चिरं श्रवणमनननिदिध्यासान् समाश्रयेदिति। (८३)

८४.

बन्धानां स्वरूपमाह -

आवृत्य ब्रह्मभावं प्रभवति विदधद् भेदमज्ञानमेतत्
वाक्ये श्रीदेशिकोक्ते कलुषितमनसोऽप्रत्ययः संशयोऽसौ।

---

92. ***GN*** wrongly reads as घ्नन्त्यैव.

93. ***Vera*** reads as बद्धानलो.

सत्योऽसत्यप्रपञ्चो[94] वपुरिदमहमित्येष मोहोऽन्तरङ्गे[95]
प्राहुस्तं व्यत्ययाख्यं भ्रममिह सुधियस्त्याज्यमेतत् त्रयं हि।। ८४।।

अन्वयः - ब्रह्मभावं आवृत्य भेदं विदधद् एतदज्ञानं प्रभवति। कलुषितमनसः श्रीदेशिकोक्ते वाक्ये अप्रत्ययः असौ संशयः (भवति)। असत्यप्रपञ्चः सत्यः इति, इदं वपुः अहम् इति, अन्तरङ्गे (यः) एष मोहः तम् इह सुधियः व्यत्ययाख्यं भ्रमं प्राहुः। एतत् त्रयं त्याज्यं हि।

व्याख्या - ब्रह्मभावं तिरस्कृत्य भेदबुद्धिं जनयद् अज्ञानं बहु शक्तं भवति। गुरुवरस्य उपदेशवाक्ये कलुषितमनसः शिष्यस्य संशय एव, श्रद्धाराहित्यमेव, दृढविश्वासाभाव एव सन्देहाख्यो बन्धः। इदं मिथ्याभूतं जगत् सत्यमिति, शरीरमेवाहम् इत्यादिकः यो मोहः अन्तरङ्गे विजृम्भते तं मोहं व्यत्ययाख्यं, विपर्ययाख्यं बन्धं प्राहुः प्राज्ञाः। एतद् बन्धत्रितयं स्वानुभूतौ प्रतिबन्धकम्। अतः कथञ्चित् त्याज्यमेवेति। (८४)

८५.

श्रवणादीन् निरूपयति।

तत्त्वानुभूतिप्रयतिः[96] श्रुतिर्भवेद्युक्त्योह[97]मानन्दपदस्य चिन्तनम्।
एकाग्रता या[98] मनसो हि सन्ततं ध्यानं तदेवेति वदन्ति साधवः।। ८५।।

अन्वयः - तत्त्वानुभूतिप्रयतिः (एव) श्रुतिः भवेत्। आनन्दपदस्य युक्त्या ऊहं चिन्तनम् (इति), तथा मनसः या सन्ततम् एकाग्रता तदेव ध्यानम् इति (च) साधवः वदन्ति हि।

व्याख्या - तत्त्वानुभूतौ क्रियमाणः प्रयत्नः एव श्रुतिः श्रवणं भवेत्। युक्त्या आनन्दपदस्य, आनन्दस्वरूपस्य (पद्यते ज्ञायते इति पदं स्वरूपम्) ऊहमेव साधवः चिन्तनं मननं, वदन्ति। मनसो या सातत्योपहिता एकाग्रता तामेव साधवो ध्यानं च वदन्तीति। हीति प्रसिद्धौ। ध्यानमिति निदिध्यासनम्।

---

94. ***Vera*** wrongly reads as सत्याऽसत्यप्रपञ्चो.

95. ***RSV 1***, ***RSV 2*** and ***GN*** read as मोहान्तरङ्गे. ***Vera*** reads as मोहोऽन्तरङ्गे.

96. ***RSV 1***, ***RSV 2*** and ***GN*** read as तत्त्वानुभूतिर्प्रयतिः. ***Vera*** reads as तत्त्वानुभूतिप्रयतिः. This seems to be correct with the meaning तत्त्वानुभूतौ प्रर्यातिः, तत्त्वानुभूतौ क्रियमाणः प्रयत्नः एव श्रुतिः भवेदिति.

97. ***RSV 1***, ***RSV 2*** and ***GN*** read as युक्त्याऽहमानन्दपदस्य. ***Vera*** reads as युक्त्योऽहमानन्दपदस्य (प्रश्लेषसहितः). However we have accepted the reading युक्त्योहमानन्दपदस्य with the explanation युक्त्या आनन्दपदस्य आनन्दस्वरपस्य ऊहमेव, चिन्तनम्, मननम्, इति वदन्तीति।

98. All the previous editions have the wrong reading एकाग्रतायाः, as a single word.

अत्र प्रथमपादे आदिमपदस्य तत्वानुभूतिर्प्रयतिः इति पाठः आर्. एस्. वाध्यार् सम्पादनयोरुभयोः दत्तो दृश्यते। श्रीनिवासन् महोदयेनापि स एव पाठः स्वीकृतः। किन्तु सः अपपाठ एवेति भाति। तत्त्वानुभूतिप्रयतिः इत्येव युक्तः। तत्त्वानुभूतौ प्रयतिः, तत्त्वानुभूतौ क्रियमाणः प्रयत्नः एव श्रुतिः भवेदिति, श्रवणं भवेदिति ।

किञ्च युक्त्याऽहमानन्दपदस्य इति आर्. एस्. वाध्यार् वर्याणाम् उभयोरपि सम्पादनयोः पाठः। स एव पाठः श्रीनिवासन् महोदयेनापि आदृतः। जानकीशरण आचार्येण तु युक्त्योऽहमानन्दपदस्य इति (प्रश्लेषसहितः) पाठः स्वीकृतः। परं युक्त्योहमानन्दपदस्य इत्येव साधुः पाठ इति भाति। द्राविडमूलग्रन्थानुसारी च। युक्त्या आनन्दपदस्य आनन्दस्वरूपस्य ऊहमेव, चिन्तनम्, मननम् इति वदन्तीति।

एवमेव, एकाग्रताया इति एकपदत्वेन सर्वेषु प्राक्तनसम्पादनेषु पाठः। परम्, एकाग्रता या इति पदद्वयत्वेनैव द्रष्टव्यम् इति भाति। मनसः या सन्ततम् एकाग्रता सैव ध्यानम् इति वदन्तीति। (८५)

८६.

कियत्पर्यन्तं श्रवणाद्यभ्यासः कार्य इत्याह -

यावज्ज्ञात्रादिभेदस्त्वयि भवति भवेत्तावदभ्यासयोगः
पश्चान्मास्त्वेव किञ्चिद्गगनमिव परैर्भौतिकैर्नैव सक्तः।
ज्ञेयाकारैकमात्रे[९९] जगदिदमखिलं स्वप्नवद्वीक्षमाणो[१००]
वैदेहं[१०१] मुक्तिभावं[१०२] तदनु परिगतो दीव्यति स्वे महिम्नि।। ८६।।

अन्वयः - यावत् ज्ञात्रादिभेदः (त्वयि) भवति तावद् अभ्यासयोगः भवेत्। पश्चात् त्वयि ज्ञेयाकारैकमात्रे (सति) किञ्चिद् (अपि) मैवास्तु। गगनमिव परैः भौतिकैः नैव सक्तः (सन्) अखिलमिदं जगत् स्वप्नवद् वीक्षमाणः, तदनु वैदेहं मुक्तिभावं परिगतः स्वे महिम्नि दीव्यति।

व्याख्या - हे वत्स, ज्ञाता, ज्ञानं, ज्ञेयम् इति भेदः यावत् त्वयि भवति तावत्पर्यन्तं श्रवणमनननिदिध्यासनैः भाव्यम्। पश्चाद् यदा त्वं केवलज्ञेयस्वरूपः

99. **Vera** reads as ज्ञेयाकारैकमात्रो.

100. **Vera** reads wrongly as स्वप्नवद्दीक्षमाणो.

101. All the previous editions have the wrong reading वैदेहे.

102. **Vera** reads मुक्तिभावे. The editor has the text as वैदेहे मुक्तिभावे which does not agree with the commentary thereon given as वैदेहमुक्तिभावं परिगतः सत्यसति वा देहे स्वे महिम्नि दीव्यति महीयते.

विगळितज्ञात्रादिभेदः भवसि तदानीं किञ्चिदपि श्रवणादिकं मास्तु। नावश्यकमेव। यथा आकाशः मेघाद्यैः अन्यैर्भौतिकैः पदार्थैः असक्तः सन् निर्लेपः शुद्धः अवतिष्ठते तथा भवानपि निखिलं जगदिदं स्वप्नवद् वीक्षमाणः सर्वत्र असक्तः भवेत्। पश्चात् देहात्यये विदेहमुक्तिं प्राप्तः स्वे महिम्नि अखण्डानन्दभूम्नि दीव्यति, महीयते भवानिति। (८६)

८७.

अधिगतपरमार्थाः ज्ञानभाजः चतुर्विधा भवन्तीत्याह।

चत्वारो ज्ञानभाजो जगति हि गणिताः सर्वलोकैरुपास्याः
तेषामेवञ्चतुर्णां प्रथम इह भवेद् ब्रह्मविन्नामधेयः।
तत्पाश्चात्यो वरोऽन्यो[103] भवति स हि वरीयांस्ततोऽन्यो वरिष्ठो
वक्ष्यामि ब्रह्मवेत्तुर्गतिमपि च परेषां त्रयाणाञ्च भेदम्।। ८७।।

अन्वयः - जगति चत्वारो ज्ञानभाजः सर्वलोकैरुपास्याः गणिताः हि। इह तेषाम् एवं चतुर्णां प्रथमः ब्रह्मविन्नामधेयः भवेत्। तत्पाश्चात्यः वरः। अन्यः सः वरीयान् च भवति। ततः अन्यः वरिष्ठः। ब्रह्मवेत्तुः गतिं परेषां त्रयाणां भेदमपि च वक्ष्यामि।

व्याख्या - लोके ज्ञानिनः जीवन्मुक्ताः चतुर्विधाः सर्वलोकैरुपास्यत्वेन परिगणिताः भवन्ति हि। "तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः"(मुण्डकोपनिषत् ३.१.१०) इति श्रुतिः। चतुर्विधानामेतेषां जीवन्मुक्तानां प्रथमः ब्रह्मविदिति प्रसिद्धः। द्वितीयश्च ब्रह्मविद्वरः। अन्यस्तृतीयः ब्रह्मविद्वरीयान्। चतुर्थश्च ब्रह्मविद्वरिष्ठः। ब्रह्मविदः गतिं व्यवहारं स्वरूपं तथा अन्येषां त्रयाणां भेदं च कथयिष्यामि इति गुरुरवादीत्। (८७)

८८.

ब्रह्मविदो लक्षणमाह।

धीरा ब्रह्मविदः प्रशान्तमनसो बोधात्पुरा यत् स्थितं
तत्सर्वं परकार्यवद्विदधते नत्यक्तवर्णाश्रमाः।
सम्यग्बुद्धनिजस्वरूपमुदिता नोज्झन्ति नैजां स्थितिं
लोकानुग्रहतत्पराश्च विचरन्त्यानन्दपूर्णाशयाः।। ८८।।

103. ***RSV 1*** and ***RSV 2*** read as तत्पश्चात्सोऽपरोऽन्यो. ***GN*** reads as तत्पश्चात्योऽवरोऽन्यो. ***Vera*** reads as तत्पाश्चात्यो वरोऽन्यो.

अन्वयः - प्रशान्तमनसो धीराः ब्रह्मविदः बोधात् पुरा यत् स्थितं तत्सर्वं परकार्यवद् विदधते। लोकानुग्रहतत्पराः नत्यक्तवर्णाश्रमाः चरन्ति। सम्यग्बुद्धनिजस्वरूपमुदिताः नैजां स्थितिं नोज्झन्ति । आनन्दपूर्णाशयाः विचरन्ति च।

व्याख्या - तत्र ब्रह्मविदः धीराः भवन्ति। अविक्रिया ध्यानशीला ब्रह्मणि रता भवन्ति। तथापि पूर्णज्ञानाधिगमात् प्राग् यद्यदाचरितं तत्सर्वं कुर्वन्ति। किन्तु यथा जनाः परेषां कार्यं कुर्वन्ति तद्वद् उदासीनाः कुर्वन्ति। लोकानुग्रहे तत्परतया वर्णाश्रमधर्मान् यथावद् आचरन्ति। यथाह भगवान् "लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि" इति। किन्तु नैजं अखण्डानन्दस्वरूपं सम्यग् विज्ञाय तल्लीनतया आनन्दतुन्दिलाः तत्पदं न त्यजन्ति च। (८८)

८९.

तत्स्वरूपमेव कथयति -

कामादयो हृदि यदा क्षणतो व्रजेयुः
सक्ता न पुष्करपलाशवदत्र लोके।
उद्योगिनोऽपि जडमूकसमाश्चरन्ति
मौनान्विताश्च सुधियोऽपि विमुक्तदेहाः।। ८९।।

अन्वयः - हृदि यदा कामादयः क्षणतो व्रजेयुः न सक्ताः (भवन्ति)। अत्र लोके उद्योगिनोऽपि न पुष्करपलाशवत् चरन्ति। (अमी) विमुक्तदेहाः सुधियोऽपि मौनान्विताः जडमूकसमाः भवन्ति च।

व्याख्या - ब्रह्मविदः वर्ण्यन्ते। यदि कदाचित् कामादयः, कामक्रोधलोभमोहमदमात्सर्यरूपाः षडरयः हृदि व्रजेयुः तदा तेष्वसक्ता भवन्त्येते। लोकेऽपि उद्योगिनः तत्तद्व्यवहारेषु क्रियमाणप्रवृत्तयः दृश्यन्ते। किन्तु पुष्करपलाशवत् नळिनीदळगतजलवत् कुत्रापि असक्ताः चरन्ति। सम्यगधिगतज्ञेयत्वादेव जनैः लौकिकैः सह अव्यवहरन्तः मौने लीनाः पामरवत् जडमूकसदृशाश्च लोके चरन्ति। एते परं विमुक्तदेहाभिमानिनः। (८९)

९०.

बाह्यमाचारव्यवहारादिकं ब्रह्मविदां लिङ्गं न भवतीति दर्शयति।

आरब्धानां कर्मणां नैकभावा-
त्तेषामेता[१०४] वृत्तयो नैकभेदाः।
वाणिज्यं वा ते [१०५]तपो निष्ठितं वा
भिक्षाचर्यं कुर्वते वाऽथ राज्यम् ।। ९० ।।

अन्वयः - आरब्धानां कर्मणां नैकभावात् तेषां वृत्तयः नैकभेदाः एताः। ते वाणिज्यं वा कुर्वते। निष्ठितं तपो वा। भिक्षाचर्यम् अथ राज्यं वा कुर्वते।

व्याख्या - प्रारब्धकर्मफलानाम् अनेकत्वात्, विचित्रत्वात्, ब्रह्मविदां वृत्तयोऽपि नैकविधाः। विचित्राः वृत्तयः भवन्ति। तथा च केचन ब्रह्मविदः जीवन्मुक्ताः वाणिज्यं कुर्वन्ति। अपरे केचन परिनिष्ठितं तपश्चरन्ति। किञ्चापरे केचिद् भिक्षामटन्ति। राज्यं वा शासति। अतः बाह्यानाचारान् वृत्तीर्वा दृष्ट्वा ब्रह्मवित्त्वं ज्ञातुं न शक्यते इति। (९०)

९१.

ब्रह्मविदः द्वन्द्वातीताः सर्वत्र समबुद्धयश्च भवन्तीति दर्शयति-

स्मरन्ति न गतं तथा मनसि भावि दृष्टेः पुरः
स्थितं त्वनुभवन्त्यमी गगनतः प्ररोहे[१०६] सति।
रवौ शिशिरदीधितावपि शवे पुनर्जीविते
गतागतधियोज्झिता अपि च तुर्यभूमिं[१०७] गताः।। ९१ ।।

अन्वयः - अमी गतं तथा भावि मनसि न स्मरन्ति। दृष्टेः पुरः स्थितं तु अनुभवन्ति। रवौ शिशिरदीधितौ (जाते चेदपि), गगनतः प्ररोहे सति अपि, शवे पुनर्जीविते अपि गतागतधिया उज्झिताः तुर्यभूमिं गताः भवन्ति।

व्याख्या - एते ब्रह्मविदः भूतं, अनुभूतं विषयजातं न स्मरन्ति। न वा भाविनं विषयजातमधिकृत्य विलोडयन्ति। यद्यत् दृष्टिपथम्, अनुभवपदवीमवतरति कर्मवशात् तत्तदनुभवन्ति। स चानुभवः समलोष्टाश्मकाञ्चनवद् भवति। सर्वत्र समदृशो भवन्त्यमी। चण्डरश्मौ आदित्ये शीतकिरणो भूत्वा आकाशात् प्ररोहवत्पतति

104. ***Vera*** reads as तेषां तेषां.

105. ***Vera*** reads as तपोऽनुष्ठितिं.

106. ***Vera*** reads wrongly as पुरोहे.

107. ***GN*** omits च inadvertently. ***Vera*** reads wrongly as अपि चतुर्थभूमिं. The editor fails to see that the commentary has the reading तुर्यभूमिं.

चेदपि, अर्थात् यदि सूर्यः शीतळकिरणः सन् आकाशात् प्ररोहवद् अपतिष्यत् तथापि न तेषां विस्मयः अभविष्यदिति। अयं सारः - असत्यभूते अस्मिन् प्रपञ्चे इदं भवितुमर्हति इदं भवितुं नार्हतीति भेदः कथं वा भवेत् सत्यदर्शिनो ब्रह्मविदः इति। शवः यदि पुनर्जीववेत्तथापि गतागतधिया वियुक्ता भवन्ति। इदं गतं, इदम् अनागतम्, इदं भाव्यम् इदं तु असम्भाव्यम्, इदं शुभम्, इदमशुभम् इत्यादिद्वन्द्वबुद्धिरहिताः सन्तः तुर्यभूमिं तुरीयामवस्थां प्रतिपन्नाः सुखं चरन्तीति। (९१)

९२.

ब्रह्मविद्वरादीनां स्वरूपमाह -

त्रयाणामाद्यौ द्वावथ दृढसमाधिञ्च कुरुतः
शरीरार्थोत्थानो वर इति तयोश्चाद्य[१०८] उदितः।
वरीयानुद्बुद्धः परकृतविबोधेन समये
वरिष्ठोऽनुत्थानो भवति परतोऽपि स्वत इह।। ९२ ।।

अन्वयः - अथ त्रयाणां च आद्यौ द्वौ दृढसमाधिं कुरुतः। तयोराद्यः, वरः, शरीरार्थोत्थानः इति च उदितः। परकृतविबोधेन समये उद्बुद्धः (भवति) वरीयान्। परतः स्वतः अपि अनुत्थानः इह वरिष्ठो भवति।

व्याख्या - एतावद् ब्रह्मविदमधिकृत्योक्तम्। शिष्टानां त्रयाणां स्वरूपव्यवहारादिकमुच्यते अनेन। त्रयाणाम् आद्यौ द्वौ दृढसमाधिं कुरुतः। अर्थात् ब्रह्मविद्वरस्य ब्रह्मविद्वरीयसश्च समाध्यवस्था तु समाना। परं तयोरयं भेदः - आद्यः, ब्रह्मविद्वरः शरीरार्थं समाधेः स्वयमुत्थितो भवति। दैहिकानां आहार-जिहासादीनां करणार्थं समाधेः परप्रेरणां विनैव उत्थितो भवतीति। ब्रह्मविद्वरीयांस्तु शरीरार्थाय व्यवहारायापि परैः कृतेन बोधनेनैव उत्थितो भवति, न स्वयम्। ग्रहग्रस्तवत् उन्मत्तवत् च दृश्यते सः। ब्रह्मविद्वरिष्ठस्तु सदा समाध्यवस्थायामेव भवति। परप्रेरणयापि समाधेः नोत्थितो भवति। (९२)

९३.

यद्यपि चतुर्णां ब्रह्मविदादीनां मुक्तौ साम्यं, ब्रह्मविद्भिन्नानां शिष्टानां त्रयाणां समाधियोगो विशेषः। तस्य फलं च प्रारब्धकर्मफलध्वंसः दृष्टदुःखाभावश्चेति स्पष्टयति।

---

108. ***RSV 1*** and ***RSV 2*** read wrongly as तयोश्चद्या उदितः. ***GN*** and ***Vera*** read as तयोश्चाद्य उदितः.

नानाविधानामपि मुक्तिभाजां समाधियोगस्य फलं तु किञ्चित्।
बृहद्विदोऽस्त्येव हि दृष्टदुःखं तेषां त्रयाणां न तदस्ति भेदः।। ९३।।

अन्वयः - मुक्तिभाजाम् अपि नानाविधानां समाधियोगस्य फलं तु किञ्चित्। बृहद्विदः दृष्टदुःखम् अस्त्येव। तेषां त्रयाणां तन्नास्ति हि (इति) भेदः।

व्याख्या - चत्वारोऽप्येते मुक्तिं भजन्ते। मुक्तौ सर्वे समाः। किन्तु समाधियोगः परेषां त्रयाणामेव। समाधियोगस्य विशेषस्य प्रयोजनं किमिति चेत् दृष्टदुःखाभाव एव। दृष्टदुःखं नाम मायिकमनुभूयमानं प्रारब्धकर्मफलरूपं दुःखम्। ब्रह्मविदः तदस्ति। बृहद्विदिति शब्देन ब्रह्मविदेव उच्यते। (९३)

९४.

ब्रह्मविदः संसारेऽस्मिन् व्यवहरन्ति इत्युक्तम्। एवं चेत् इतरलौकिकवत् तेषामपि कर्मबन्धः स्यादेव। तत्कथं तेषां मुक्तिरिति संशयं छेत्तुमाह -

बुद्धब्रह्मस्वरूपा अपि जडमतिवत् कर्मभिर्भ्रान्तचित्ताः
संसक्ताश्चेदबोधक्षतिरपि च कुतो जन्महानिश्च तेषाम्।
इत्थञ्चेत् पृच्छसि त्वं सकलगतमपि व्योम सर्वैरसक्तं
यद्वत्तद्वद्विमुक्ता अपि च तदितरे क्ष्मादिवत् सक्तचित्ताः।। ९४।।

अन्वयः -'जडमतिवत् बुद्धब्रह्मस्वरूपा अपि कर्मभिर्भ्रान्तचित्ताः संसक्ताश्चेत् तेषाम् अबोधक्षतिः जन्महानिश्चापि कुतः च (स्यात्)' - इत्थं त्वं पृच्छसि चेत्, यद्वद् व्योम सकलगतमपि सर्वैरसक्तं, तद्वद् विमुक्ता अपि (असक्ताः)। अपि च तदितरे क्ष्मादिवत् सक्तचित्ताः।

व्याख्या - यथा संसारिणः कर्मभिर्भ्रान्तचित्ताः सांसारिके व्यवहारे संसक्ताः तथा ब्रह्मज्ञानिनः अपि संसक्ता भवन्ति चेत् कथं तेषाम् अबोधक्षतिः, अज्ञाननाशो भवेत्; तं च विना कथं जन्महानिः मोक्षो भवेदिति चेत् शृणु - आकाशं सर्वैरितरैरसक्तम्। किन्तु सर्वैः संसर्गः अस्त्येव। सत्यपि संसर्गे असक्तम्। तद्वत् ब्रह्मज्ञानी व्यवहारी अपि न संसक्तः। अन्ये तु जनाः संसारिणः क्ष्मादिवत्, पृथिव्यादिवत् सर्वत्र संसक्ता भवन्तीति विवेकः। (९४)

९५.

जीवन्मुक्तसमाराधनं परं श्रेयःसाधनमिति श्रुतयोऽपि वदन्तीत्याह -

ब्रह्मश्रीपतिशङ्कराः प्रतिदिनं संपूजिताः सत्तपोऽ-
नुष्ठानं सकलञ्च साधुचरितं तैरेव सम्यक् कृतम्।
जीवन्मुक्तपदारविन्दमपि ये संपूजयन्त्यादरा-
दित्याहुः श्रुतयो विदेहपरमां मुक्तिञ्च तेषां शृणु।। ९५।।

अन्वयः - ये जीवन्मुक्तपदारविन्दम् आदरात् सम्पूजयन्ति तैरेव ब्रह्मश्रीपतिशङ्कराः प्रतिदिनं संपूजिताः (स्युः)। सकलं सत्तपोऽनुष्ठानं साधुचरितं चापि तैरेव सम्यक् कृतम् (स्ताद्) इति श्रुतयः आहुः। तेषां विदेहपरमां मुक्तिञ्च शृणु।

व्याख्या - ये जनाः जीवन्मुक्तपदारविन्दम् आदरात् सम्पूजयन्ति तैः मूर्त्तित्रयपूजनं देवतापित्रतिथ्यादीनां इज्यादिरूपं सकलं सच्चरितं सत्तपोऽनुष्ठानं च सम्यक् कृतमेव स्यात्। करणीयतया श्रुत्यादिविहितं न किञ्चिदवशिष्यते इत्यर्थः। इदं च तत्वं श्रुतिभिर्गीतमपि। यथा "तं तं लोकं जयते तांश्च कामान् तस्मादात्मानं ह्यर्चयेत्" (मुण्डकोपनिषत् ३.१.१०) इति। एवं जीवन्मुक्तानाम् अवस्थां वर्णयित्वा तेषामेव विदेहमुक्तिः कथमिति अनुपदं वक्ष्यामीत्याह। (९५)

९६.

प्रतिज्ञातं विदेहमुक्तेः स्वरूपकथनम् आरभते।

तूलं दावहविर्भुजीव[109] सकलं प्राक् सञ्चितं बोधतः
तद्ज्ञानाग्निशिखावलीढमखिलं स्याद् भस्मसाद् ज्ञानतः।
ऊर्ध्वं कर्म यदस्ति तच्च निखिलं न शिलष्यते ज्ञानिनः
प्रारब्धं क्षयमेति भोगवशतः सेयं[110] त्रयाणां क्षतिः।। ९६।।

अन्वयः - बोधतः प्राक् सञ्चितं सकलं (यत्) कर्म तद् अखिलं दावहविर्भुजि तूलमिव ज्ञानाग्निशिखावलीढं भस्मसात् स्यात्। ज्ञानतः ऊर्ध्वं यदस्ति तन्निखिलं ज्ञानिनः न शिलष्यते च। प्रारब्धं च भोगवशतः क्षयमेति । त्रयाणां सेयं क्षतिः।

व्याख्या - तत्त्वज्ञानात् प्राग् यत् सञ्चितं कर्म तत्सर्वं ज्ञानाग्निना दग्धं भवति। यथा दावाग्नौ तूलं सर्वं झटिति भस्मसाद्भवति तथा ज्ञानाग्निज्वालया ग्रस्तं समस्तं सञ्चितं कर्मफलं स्यात्। आगामि कर्मफलं तु ज्ञानिनः न भवेदेव।

109. ***GN*** wrongly reads दवाहविर्भुजीव.
110. ***Vera*** reads as त्वेवम्.

तत्त्वज्ञानानन्तरं सर्वं कर्म असक्तः सन्नेव स करोति। ततः कर्मफलं न श्लिष्यते। न सक्तं भवति हि। यत् प्रारब्धं कर्मफलमस्ति तच्च भोगेन नश्यतीति सञ्चितागामिप्रारब्धरूपाणां त्रयाणां कर्मणां नाशः भवति। (९६)

९७.

प्रारब्धभोगकाले क्रियमाणस्य कर्मणः फलं जन्मान्तरस्य कारणं भवेदित्याशङ्कां परिहरति -

मुक्तानां भोगकाले प्रविहितमपि यत् कर्म जन्मान्तराय
स्यान्नैवं तत्तथा[111] त्वं शृणु मम वदतस्तत्प्रकारं मनीषिन्।
दोषारोपं मुनीनामपि विदधति ये ते लभन्तेऽशुभानि[112]
प्रीतिं ये योगभाजां विदधति निखिलं पुण्यमायान्ति तेऽपि।। ९७।।

अन्वयः - हे मनीषिन् भोगकाले प्रविहितं यत्कर्म तत् मुक्तानां जन्मान्तराय (यथा) न स्यात्तथा तत्प्रकारं वदतः मम (वचः) त्वं शृणु। ये मुनीनां दोषारोपं विदधति ते अशुभानि लभन्ते। एवं ये (अपि) योगभाजां प्रीतिं विदधति ते निखिलं पुण्यमपि आयान्ति।

व्याख्या - ये जीवन्मुक्ताः तैः प्रारब्धकर्मणः, भोगकाले कृतस्य कर्मणः, फलं जन्मान्तराय न कल्पते। तत्कथमिति वदामि। शृणु। ये जनाः जीवन्मुक्तानां मुनीनां लौकिकवद् व्यवहरतां व्यवहृतौ दोषारोपं कुर्वन्ति तान् प्राप्नुवन्ति, जीवन्मुक्तकृतानाम् अशुभकर्मणां फलानि। ये च जनाः योगभाजां, जीवन्मुक्तानां मुनीनां, शुश्रूषादिना प्रीतिं कुर्वन्ति ते तेषां निखिलमपि पुण्यफलं प्राप्नुवन्तीति। एवं सुकृतदुष्कृतकर्मणोरुभयोरपि फलक्षये विदेहमुक्तिर्भवतीति। (९७)

९८.

जीवन्मुक्तस्य शरीरनाशः कथं भवतीत्याह -

[113]संवित्पावकमेत्य नश्यति पुराऽविद्याशरीरं वपुः
स्थूलं कालवशात् पतेदथ पुनः सूक्ष्मं शरीरं क्रमात्।
तप्तायःपतिताम्बुवत्[114] सुविमले पूर्णे तुरीये पदे
नित्यानन्दचिदात्मके परतरे[115] लीनं भवेच्छाश्वते।। ९८।।

111. ***Vera*** reads as तद्यथा.
112. ***RSV 1, RSV 2*** and ***Vera*** read as शुभानि. ***GN*** reads as अशुभानि.
113. ***Vera*** reads as संवित्पावकदग्धमेव हि पुरा.
114. ***GN*** and ***Vera*** read wrongly as तप्तायः पतिताम्बुवत्।
115. ***RSV 1*** and ***RSV 2*** read as परतरं.

अन्वयः - अविद्याशरीरं संवित्पावकमेत्य पुरा नश्यति । स्थूलं वपुः पुनःसंवित्पावकमेत्य नश्यति पुराविद्याशरीरं वपुः कालवशात् पतेत्। अथ सूक्ष्मं शरीरं नित्यानन्दचिदात्मके शाश्वते सुविमले परतरे तुरीये पूर्णे पदे तप्तायःपतिताम्बुवत् क्रमात् लीनं भवेत्।

व्याख्या - अज्ञानरूपं शरीरं ज्ञानाग्नौ नष्टं भवति। स्थूलशरीरं प्रारब्धकर्मभोगेन कालवशात् पतति। नश्यति। अथ सूक्ष्मं शरीरं सच्चिदानन्दे शाश्वते निर्मले तुरीये पूर्णे पदे परतरे ब्रह्मणि क्रमाद् विलीनं भवति। यथा तप्तायःपतितं जलं क्रमेण लीनं भवति तथा सूक्ष्मशरीरम् अनाकारे निरवधौ अखण्डबोधे निलीनं भवतीति। (९८)

९९.

तमेव देहनाशं निरूपयति।

कुम्भे नष्टे सति गगनवद्देहनाशे प्रपन्ने
मुक्ताः पूर्वं विगतसकलोपाधयस्तुर्यभूताः।
नान्तर्बाह्या[११६] न तु परिमिताः कोटिमध्यादि[११७]शून्या-
श्चेतोदूरा गगनविमलाः शान्तदीपा इव स्युः।। ९९।।

अन्वयः - देहनाशे प्रपन्ने पूर्वं मुक्ताः ते कुम्भे नष्टे सति गगनवत् विगतसकलोपाधयः तुर्यभूताः नान्तर्बाह्याः न तु परिमिताः कोटिमध्यादिशून्यः चेतोदूराः गगनविमलाः शान्तदीपाः इव स्युः।

व्याख्या - पूर्वमेव मुक्तास्ते नष्टे देहे, घटनाशे तदन्तर्वर्त्याकाशवत् महाकाशे निलीनाः उपाधिविनिर्मुक्ताः तदवस्थाः एव स्युः। तुर्यभूतानां ब्रह्मभावमापन्नानां तेषाम्, अन्तः, बहिः, आदिः,कोटिः मध्यः, अन्तः इत्याद्याः परिमितयो न भवेयुः। अत एव ते चेतसां दूरदूरे वर्तमानाः गगनवन्निर्मलाः सूक्ष्माश्च शान्तदीपाः इव स्युः इति। (९९)

१००.

एवं विदेहमुक्तिमभिधाय, त्वमपि सदा ब्रह्मणि अद्वितीये लीनो भव इत्युपदिशति शिष्यम्।

116. ***Vera*** reads as नैवाद्यन्ताः.

117. ***RSV 1*** and ***RSV 2*** wrongly read as कोटिमध्यातिशून्याः.

सर्वत्र वत्स गगने सति कूपखातात्
सन्दृश्यते खलु यथैव तथा सुपूर्णम्।
ब्रह्मापि सद्गुरुगिरा प्रतिभासते हि
सोऽहं सदैक[११८] इति तिष्ठ सुपूर्णभूमा।। १००।।

अन्वयः - हे वत्स सर्वत्र सति गगने कूपखातात् (नूतनमिव गगनं) यथा सन्दृश्यते खलु, तथैव सद्गुरुगिरा सुपूर्णं ब्रह्म अपि प्रतिभासते हि। सदा सोऽहमिति एक एव सुपूर्णभूमा तिष्ठ।

व्याख्या - गगनं सर्वत्र सदेव। कूपखनने तथा नूतनघटनिर्माणे च कूपाकाशोऽयं, घटाकाशोऽयं इति नूतनमिव प्रतीयते तथा सद्गुरुपदेशेन ब्रह्मैव सता शिष्येण ब्रह्मत्वं नूतनतया आपन्न इव पूर्णं ब्रह्मास्मि इत्यनुभूयते इत्येव। ज्ञानात् प्रागपि, ततः परमपि, विद्यमानम् एकं पूर्णं व्यापि वस्तु एकमेव इति ज्ञात्वा तस्मिन्नेव भूम्नि आनन्दरूपे ब्रह्मणि आतिष्ठ इति शिष्यमुपदिशति अपारकरुणासिन्धुः गुरुः। (१००)

१०१.

एवम् अध्यारोपापवादन्यायेन भानमेव सत्यं जगन्मिथ्येति प्रदर्श्य प्रकरणमुपसंहरन् स्वस्वरूपे सन्तिष्ठस्वेति शिष्यमादिशत्याचार्यः।

रज्जौ सर्पवदर्करश्मिजलवत् स्थाणौ नरभ्रान्तिवत्
स्वप्नालोकितलोकवच्च गगने[११९] प्रोद्यन्महाग्रामवत्।
वन्ध्यानन्दनवन्मृषा हि विदितः सर्वो जगद्विभ्रमः
सत्यं ज्ञानमहो ममोपरि शपे त्वं त्वाञ्च मा विस्मर।। १०१।।

अन्वयः - सर्वो जगद्विभ्रमः रज्जौ सर्पवत्, अर्करश्मिजलवत्, स्थाणौ नरभ्रान्तिवत्, स्वप्नालोकितलोकवत्, गगने प्रोद्यन्महाग्रामवत् , वन्ध्यानन्दनवत् च मृषा (इति) विदितः हि। (एवमेव) ज्ञानमेव सत्यम् (इति च विदितं हि)। अहो! त्वं त्वां मा विस्मर ममोपरि शपे।

व्याख्या - जगदाख्यः विभ्रमः मिथ्यैव। यथा रज्जौ दृष्टः सर्पः, यथा वा सूर्यरश्मौ दृष्टं जलं, यथा स्थाणौ दृष्टो नरः, यथा स्वप्ने दृष्टो लोकः, यथा च

118. *Vera* reads as सदैकम्.
119. *Vera* reads as गगनप्रोद्यन्महाग्रामवत्.

आकाशे प्रोद्यन् महाग्रामश्चेति सर्वं मिथ्या तथा पुरो दृश्यमानमिदं जगत् मिथ्यैव। विभ्रम एवायम्। सत्यं वस्तु ज्ञानमेव। बोध एव चैतन्याभिन्नं वस्तु। तच्च नित्यं व्यापि एकमेव। सम्प्रति आनन्दपूर्णात् स्वस्वरूपाद् अप्रच्युतः अप्रमत्तः सन् सुखी तिष्ठ इति अनुगृह्णाति। ममोपरि शपे। अप्रमत्तो भव इत्यादिशति च।

इति तत्त्वप्रदीपः।।

।। सन्देहप्रशमनम् ।।

प्रकरणान्तरं प्रारभमाणः दक्षिणामूर्तिवन्दनं विधत्ते ग्रन्थकारः श्रीशङ्कुकविः।

[120]यस्याङ्घ्रिपद्मविगलन्मकरन्दसारो
जीवेश्वरैक्यदृढताकृतिवज्रलेपः।
न्यग्रोधमूलनिलयाय नमः परस्मै
धाम्ने स्वमौनपरिबोधिततत्त्वभूम्ने।। १।।[121]

अन्वयः - यस्य अङ्घ्रिपद्मविगलन्मकरन्दसारः जीवेश्वरैक्यदृढताकृतिवज्रलेपः (भवति) तस्मै स्वमौनपरिबोधिततत्त्वभूम्ने न्यग्रोधमूलनिलयाय परस्मै धाम्ने नमः।

व्याख्या - वटतरोर्मूले मौनव्याख्यया परं तत्त्वमुपदिशन् विराजमानो यो गुरुः ईश्वराभिन्नः यश्च आत्माभिन्नः तस्मै शुद्धचैतन्यरूपाय दक्षिणामूर्तये नम इति। दक्षिणामूर्तेः गुरुवरस्य पादपङ्कजयोर्गळन् यो मकरन्दसारः, पुष्परसस्रुतिः, सः वज्रलेप इवाचरति सुदृढतां सम्पादयति। कस्य? ऐक्यबोधस्य – जीवेश्वरयोः, जीवात्मपरमात्मनोः यदैक्यं, यो भेदाभावः तत्सम्प्रत्ययस्य। अर्थात् गुरोरनुग्रहेणैव ऐक्यावगमः सुदृढो भवति। दार्ढ्यसम्पादने वज्रलेप इवाचरति गुर्वनुग्रह इति। तस्य गुरोः स्वरूपं शुद्धचैतन्यमेव। तच्च निजं (गुरोः शिष्यस्य च) स्वरूपं मौनेन बोधयति शिष्यानिति। वाचामगोचरतया तत्तत्वस्य। (१)

२.

परे तत्त्वे ज्ञाते सत्यपि तस्य दृढता, स्थूणानिखननवत् सन्देहप्रशमनेनैव भवतीति सन्देहप्रशमनाख्यं प्रकरणान्तरं प्रवक्ष्ये इति प्रतिजानीते ग्रन्थकारः।

गृहाधारस्तम्भेऽप्यवटनिहिते तस्य परितो
दृढस्थित्यै भूयो निखननमिवात्रापि गुरुतः।
परे तत्त्वे ज्ञाते निभृतमनुभूतिं द्रढयितुं[122]
प्रवक्ष्ये सन्देहप्रशमनसमाख्यं प्रकरणम्।। २।।

120. ***Vera*** reads as यत्पादपद्मविगळन्मकरन्दसारो.

121. ***Vera*** reads this verse among the four preliminary verses given at the beginning of the *Tattvapradīpaprakaraṇa*.

122. ***RSV 1*** and ***RSV 2*** read as द्रढयितुं. ***GN*** and ***Vera*** read as दृढयितुं.

अन्वयः - गृहाधारस्तम्भे अवटनिहिते तस्य दृढस्थित्यै भूयः (तं) परितः निखननं इव (यथा क्रियते तथा) अत्रापि गुरुतः परे तत्त्वे ज्ञाते (सत्यपि) अनुभूतिं निभृतं द्रढयितुं सन्देहप्रशमनसमाख्यं प्रकरणं प्रवक्ष्ये।

व्याख्या - गृहनिर्माणवेळायाम् आधारस्तम्भे स्थाणौ अवटे निहितेऽपि सम्यक् स्थापितेऽपि पुनर्द्रढीकरणाय तस्य परितः निखननं ताडनम् इत्यादिकं यथा क्रियते तद्वद् गुरूपदेशेन परे तत्त्वे अवगतेऽपि तां तत्त्वानुभूतिं द्रढयितुं सन्देहप्रशमनमिति समाख्या यस्य तत्प्रकरणं प्रवक्ष्ये इति। (२)

३.

ज्ञातनिजस्वरूपानन्दोऽपि शिष्यः गुरुसेवातत्परः तत्पदं नात्यजदिति प्राह -

अत्यन्तं परिशुद्धशीतहृदयो बोधे निमग्नः स्वके
कीशन्यायवदेव देशिकवरं[123] शिष्यः सिषेवे दृढम्।
अध्यारोपमथापवादमपि यः प्रोच्याऽस्य[124] कारुण्यतः
स्वानन्दे[125] विगुणे चिरं निजपदे ह्यस्थापयत् स्वं सुखम्।। ३।।

अन्वयः - स्वके बोधे निमग्नः अत्यन्तं परिशुद्धशीतहृदयः शिष्यः(तं) देशिकवरं, यः अस्य अध्यारोपम् अथ अपवादमपि कारुण्यतः प्रोच्य स्वानन्दे विगुणे निजपदे चिरं स्वम् (एव) सुखं ह्यस्थापयत् (तं), कीशन्यावत् एव दृढं सिषेवे।

व्याख्या - शुद्धचैतन्ये निमग्नोऽपि साक्षात्कृतनिजानन्द शीतळिमोऽपि स शिष्यः गुरुपदं दृढं सिषेवे, नात्यजत्। यो हि देशिकः महाभूतान्यारभ्य सूक्ष्मशरीरोत्पत्त्यादिकं प्रदर्श्य अध्यारोपापवादन्यायेन भूरिकारुण्यवेगाद् हेतोः निर्गुणे परमानन्दसान्द्रे निजस्वरूपे आत्मानं समस्थापयत् तस्य पदमिति। मर्कटकिशोरन्यायेन शिष्यः गुरुपदमत्यजन् समाललम्बे इति। (३)

४.

कारुण्याब्धिर्गुरुः शिष्यं पुनः पृच्छति - किं त्वं छिन्नसंशयः साक्षिमात्रः निजस्वरूपे तिष्ठसीति।

---

123. ***RSV 1*** and ***RSV 2*** read as देशिकवरम्. ***GN*** and ***Vera*** read as देशिकपदम्.

124. All the previous editions read प्रोक्त्वास्य. Interestingly the editor of ***Vera***, in a footnote points out that the usage is wrong. The commentary has the reading प्रोच्यास्य. Still, inadvertently he has retained the wrong reading.

125. ***Vera*** reads as स्वस्थाने.

[126]छायावदेनं तमनुव्रजन्तं श्रीदेशिकेन्द्रोऽवददादरेण।
त्वं साक्षिमात्रोऽसि मनः स्वरूपे निःसंशयं तिष्ठति[127] तद्वदस्व।। ४।।

अन्वयः - तमेनं छायावदनुव्रजन्तं श्रीदेशिकेन्द्रः आदरेणावदत् — त्वं किं साक्षिमात्रोऽसि? (किं ते) मनः निस्संशयं स्वरूपे तिष्ठति ? तद् वदस्व।

व्याख्या - गुरुवरः छायेव आत्मानमनुसरन्तं शिष्यं स्नेहेन अपृच्छत्। कि त्वं साक्षिमात्रः अतिष्ठः? किं ते मनः, हृदयं, सन्देहं चाञ्चल्यञ्च विहाय स्वरूपे प्रत्यतिष्ठदिति। (४)

५.

भवत्कृपया निस्संशयोऽहं कृतकृत्यः इति विनयं प्रकटीकरोति शिष्यः।

इत्येवं भाषमाणं निजगुरुमथ तं संप्रणम्याह[128] शिष्यो
[129]जन्मारण्येऽतिमोहात् कटुतिमिरयुते भेदसंज्ञाः पिशाचाः।
[130]युष्मत्कारुण्यशैलोत्थितमहदुपदेशाब्जबन्धोर्मयूखे-
ष्वादीप्रेष्वन्तरङ्गे मम कथमुदयं प्राप्तवन्तो भवेयुः।। ५ ।।

अन्वयः - अथ शिष्यः इत्येवं भाषमाणं निजगुरुं सम्प्रणम्य आह - मम अन्तरङ्गे युष्मत्कारुण्यशैलोत्थित महदुपदेशाब्जबन्धोः मयूखेषु आदीप्रेषु (सत्सु) अतिमोहात् कटुतिमिरयुते जन्मारण्ये भेदसंज्ञाः पिशाचाः कथमुदयं प्राप्तवन्तो भवेयुः ?

व्याख्या - एवं स्वानुभूतिं पृच्छन्तं कारुण्यमूर्तिं देशिकेन्द्रं सम्प्रणम्य शिष्यः समादधाति। मम अन्तरङ्गे भवदुपदेशसूर्यः ज्वलन् तिष्ठति। तस्य रश्मिषु आदीप्रेषु सत्सु संसारारण्ये गाढाज्ञानात् निबिडान्धकारे भेदाख्याः विकल्पाख्याः विशयस्वरूपा वा पिशाचाः कथमुत्पद्येरन्निति। अन्तरङ्गे शीतळिम्ना पिण्डीभूतं गुरुकारुण्यमेव उदयगिरिः राजते। ततः उत्थितः गुरूपदेश एवाब्जबन्धुः अर्कः राराज्यते। तस्य उपदेशसूर्यस्य प्रचण्डेषु रश्मिषु समन्ताद्दीप्तेषु सत्सु कथं वा संसारारण्ये अत्यन्तरूढाज्ञानात् गाढे तमसि सन्देहरूपः पिशाचाः उत्तिष्ठेयुरिति। गाढे तमसि पिशाचानां उत्थितावकाशो

---

126. ***Vera*** reads as च्छायावदेनं.

127. ***RSV 1, RSV 2*** and ***GN*** read as तिष्ठसि. ***Vera*** read as तिष्ठति.

128. ***Vera*** reads as स प्रणम्याथ शिष्यः.

129. ***Vera*** reads as जन्मारण्येऽतिमोहोद्भटतिमिरयुते.

130. ***Vera*** reads as युष्मत्कारुण्यशैलोत्थितभवदुपदेशाब्जबन्धोर्मयूखेषु.

महानस्त्येव। परं मम मनसि गुरूपदेशसूर्यः प्रकाशते। अतः तत्र सन्देहपिशाचा नैव उत्तिष्ठेयुरिति। अज्ञानं तमोरूपम् उपदेशप्रचण्डभानुना उत्सादितम्। अत एव भेदसंज्ञा नक्तञ्चराः नोदियुः। (५)

६.

यद्यपि निस्संशयोऽहं साक्षिमात्रः स्वस्वरूपे परमानन्दे लग्नः तथापि विज्ञानस्य द्रढीकरणाय किञ्चित् मम विज्ञाप्यमस्तीति शिष्यः सविनयं दृष्टान्तप्रदर्शनपूर्वकं निवेदयति।

मन्त्रज्ञेन गते[131] पिशाचनिवहे भूयोऽप्यनिष्पत्तये
यन्त्रं साधु विलिख्य यद्वदभयं लोके[132] विधत्ते गुरो।
तद्वत्त्वद्वचनामृतैरपि[133] गते संमोहवर्गेऽखिले
विज्ञाप्यं मम किञ्चिदस्ति भगवन् विज्ञानवृद्ध्यै चिरम्।। ६।।

अन्वयः - पिशाचनिवहे मन्त्रज्ञेन गतेऽपि भूयः अनिष्पत्तये यद्वत् साधु यन्त्रं विलिख्य लोके (जनः) अभयं विधत्ते तद्वद् (हे) गुरो त्वद्वचनामृतैः अखिले सम्मोहवर्गे गतेऽपि हे भगवन् मम चिरं विज्ञानवृद्ध्यै किञ्चिद् विज्ञाप्यमस्ति।

व्याख्या - मन्त्रज्ञेन, मान्त्रिकेन, पिशाचनिवहे समुत्सारिते अपि लोके जनः साधु यन्त्रं (सुदर्शनादिकं) विलिख्य अभयम् अभयरक्षां करोति तद्वत् त्वद्वचनैः संशयच्छेदिभिरुपदेशवाक्यैरेव अज्ञानसञ्चये समस्तेऽपि निरस्ते सत्यपि मम चिरं विज्ञानवृद्ध्यै किञ्चिद्विज्ञाप्यमस्ति इति। जिज्ञासा काचिच्छमयितव्या इति। तत्प्रचिख्यापयिषा अस्तीति।

मन्त्रज्ञेन गते इत्यत्र गमिते इत्यर्थो विवक्षितः। अन्तर्भावितण्यन्ततया ग्रहीतव्यः। (६)

७.

तामेव जिज्ञासां प्रकाशयति।

विद्ध्यागमेन[134] परतत्त्वमिति [135]स्ववाचा-
मत्यन्तदूरमिति चाह भवान् परत्र।

---

131. ***Vera*** reads as युते.

132. ***Vera*** reads as लोको.

133. ***RSV 1***, ***RSV 2***, and ***GN*** read तद्वत्त्वद्वदनामृतैरपि. ***Vera*** reads तद्वत्त्वद्वचनामृतैरपि.

134. ***RSV 1***, ***RSV 2***, and ***GN*** read as विद्यागमेन. ***Vera*** reads as विध्यागमेन. Interestingly, the commentary has this explanation: आगमेन विद्धि. The editor has failed to notice.

135. ***RSV 1***, and ***RSV 2*** read as स्ववाचाम्. ***GN*** reads as स्म वाचाम्. ***Vera*** reads as स्मवाचाम्.

वेद्यं हृदेति नितरां मनसोऽप्यवेद्य-
मित्यन्यतो विशययुग्ममपाकुरु त्वम्।। ७ ।।

अन्वयः - भवान् (एकत्र) आगमेन परतत्त्वं विद्धि इत्याह। परत्र (तत्) स्ववाचाम् अत्यन्तदूरमिति (आह)। (तत्) हृदा वेद्यम् (इत्येकतः) अन्यतश्च मनसोऽपि नितराम् अवेद्यम् इति च। त्वम् (एतद्) विशययुग्मम् अपाकुरु।

व्याख्या - भवच्छब्देन गुरुपरम्परा, श्रुतिवाक्यानि च विवक्षितानि। न स्वीयो गुरुः। यतः अनेन वक्ष्यमाणप्रकारेण नोक्तम्। परमं तत्त्वं, तत्त्वमस्यादिभिर्महावाक्यैः ज्ञेयमित्येकत्र उक्तम्। अन्यत्र च "यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह।" इति अवाङ्मनसगोचरं तत्त्वमित्युक्तम्। परस्परविरोधः विजृम्भते किलेति। आगमैः महावाक्यैः शब्दप्रमाणेन जानीहि इत्येकत्र। परत्र तु अवाग्विषयं ब्रह्मेति। एवमेव हृदयेन परतत्त्वं वेद्यमित्येकत्र गदति श्रुतिः। यथा "हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति।" (तैत्तिरीय आरणयकम् १०.१.३.२) इति। अन्यत्र च मनसा अप्राप्यम्, अगम्यं तत्तत्त्वमिति सैव श्रुतिराह। अत्रापि विरोधः स्फुटं प्रकाशते। एतत्संशयद्वयं कृपया निरस्यतु भवानिति प्रार्थयति शिष्यः। (७)

८.

आद्यं संशयं दूरीकुर्वन्नाह गुरुः -

अन्यैः प्रमाणैस्त्रिभिरप्यवेद्यं जातिक्रियाभूतगुणाद्यभावात्।
अगोचरं वाच इतीरितं मे वेदप्रमाणेन सुवेद्यमेव।। ८।।

अन्वयः - अन्यैः त्रिभिः प्रमाणैः अपि अवेद्यं (परं तत्त्वं) जातिक्रियाभूतगुणाद्यभावात् वाचः अगोचरम् इति मे ईरितम्। (किन्तु) वेदप्रमाणेन (तत्) सुवेद्यमेव ।

व्याख्या - प्रत्यक्षम् अनुमानम्, उपमानम् इति त्रिभिः प्रमाणैः अवेद्यं ब्रह्म वाचामगोचरं भवति। यतो हि - शब्दप्रमाणेन किं वेद्यते? प्रवृत्तिनिमित्तं वेद्यते। जातिः, क्रिया, भूतगुणः इत्यादि। जात्यादिकं तु ब्रह्मणि नास्तीति शब्दप्रमाणेन, वाचा, न वेद्यमेव ब्रह्म। (कथं पुनः विरोधपरिहारः? उच्यते।) अथ पुनः वेदप्रमाणेन सुवेद्यं तद्ब्रह्म। वेदो नाम प्रमाणान्तर-अगम्यमर्थं यो वेदयति स किल। तादृशेन प्रमासाधनेन सुप्रमेयमेव ब्रह्मेति। (८)

९.

वाचामगोचरं परतत्त्वमिति, वेदान्तवाक्यैरवसेयमिति उभयमपि वाक्यं यथार्थमित्याह -

वाचां सुदूरमिति या परतत्त्वमाह
सैव श्रुतिर्वदति वाग्विषयं हि वस्तु।
किं वा प्रमाणमिति चेद्वचनद्वयेऽपि
सत्यं द्वयञ्च न मृषैव कदाऽपि वेदः।। ९ ।।

अन्वयः - या श्रुतिः परतत्त्वं वाचां सुदूरमित्याह सैव, वाग्विषयं हि वस्तु इति वदति। वचनद्वयेऽपि किं वा प्रमाणम् इति चेत् द्वयं च सत्यम्। वेदः कदापि न मृषा।

व्याख्या - वाचां, वस्त्वन्तरप्रतिपादकानां लौकिकवाचां, अगम्यमेव परतत्त्वमिति श्रुतिराह। सैव श्रुतिः वाग्विषयं भवति वस्तु, उपनिषद्वाचां तदेव परतत्त्वं विषय इत्यप्याह। अनयोः विरुद्धयोर्वाक्ययोः किं प्रमाण्, अर्थात् कतरत् प्रमा, कतरच्च अप्रमा इति पृच्छ्यते चेद्वदामि। उभयमपि प्रमैव, सत्यमेव इति। अयमाशयः। अनयोर्वाक्ययोः मिथो विरोधो नास्त्येव। उपनिषद्वाक्यं न लौकिकवाक्यसदृशम् इत्यतः। उपनिषदन्तर्गतानां महावाक्यानां प्रवृत्तिप्रकारः, अत्र विशेषश्च अनुपदं वक्ष्यते। (९)

१०.

श्रुतिः येन प्रकारेण, महावाक्यैः अद्वैतं वागतीतं ब्रह्म साक्षादनुक्त्वा वेदयति तत्प्रकारमाह -

पृष्टा [१३६]नृभिर्दयितमबला नेति चान्यान्निरस्य
स्वप्राणेशं विनतवदना दर्शयामास मौनात्।
यद्वत्तद्वच्छ्रुतिरपि सती नामरूपे निरस्य
ब्रह्माद्वैतं वदति परमं मौनवृत्त्या न साक्षात्।। १०।।

अन्वयः - नृभिः दयितं पृष्टा सती अबला अन्यान् नेति निरस्य स्वप्राणेशं विनतवदना यद्वत् मौनात् दर्शयामास च तद्वत् सती श्रुतिरपि नामरूपे निरस्य परमम् अद्वैतं ब्रह्म मौनवृत्त्या वदति, न साक्षात्।

136. ***RSV 1*** and ***RSV 2*** read as पृष्टा नृभिः. For keeping conformity with the meter, नृभिः (though grammatically incorrect) would have been ideal. ***GN*** and ***Vera*** read as पृष्टालीभिः.

व्याख्या - जनसम्मर्दे को वा तव दयितः इति पृष्टा कुलवधूः इतरान् नायं, नायमिति वाचा निषेधन्ती यदा परैः अयं वा इति स्वप्राणेशमधिकृत्य अङ्गुलीनिर्देशेन पृष्टा अयमेव इति साक्षान्न वदति, किन्तु अवनतवदना सती मौनेन प्रकाशयति। तद्वत् श्रुतिः महावाक्यैः साक्षादकथयन्ती (कथयितुमशक्यत्वात्) लक्षणया परतत्त्वं वेदयतीति। (१०)

११.

एवं प्रथमं संशयं छित्वा द्वितीयं छेत्तुं प्रक्रमते।

इत्थं विहाय प्रथमञ्च संशयं शृणु त्वमन्यस्य निरासवाक्यम्।
सर्वेन्द्रियाणां पतिरन्तरङ्गं बुद्ध्यादिभेदेन चलत्यजस्रम्।। ११।।

अन्वयः - प्रथमं संशयम् इत्थं विहाय त्वम् अन्यस्य संशयस्य निरासवाक्यं शृणु च। सर्वेन्द्रियाणां पतिः अन्तरङ्गं बुद्ध्यादिभेदेन अजस्रं चलति।

व्याख्या - प्रथमः संशयो निरस्तः। द्वितीयस्य निरसनप्रकारं शृणोतु। सर्वेन्द्रियाणां पतिः, प्रधानभूतं भवति अन्तरङ्गम्, अन्तःकरणम्। तच्च बुद्धिरुपं मनोरूपं च भवतीति पूर्वस्मिन् प्रकरणे प्रदर्शितम् "आसीन्मनश्च धिषणा च समष्टिसत्वाद्" इति। तत्र बुद्धिः कर्तृत्वेन अहंवृत्तिरुपा। मनश्च करणत्वेन इदंवृत्तिरूपम्। एवं बुद्धिरुपेण मनोरुपेण च अन्तःकरणं सदा चलदस्तीति। (११)

१२.

अथ चिदाभासमपि प्रदर्श्य मनोदर्शनस्य द्वैविध्यं वक्तुमाह - आदर्शान्तरिति।

आदर्शान्तरिव त्वदीयवदनं छायैव बुद्धौ चिते-
श्चिद्वद्भाति तदध्वनैव विषयान् गृह्णात्यशेषान्मनः।
चैतन्यं न हि केवलञ्च हृदयं जानाति किञ्चिद्यतो
वृत्तिज्ञानमिदं वदन्ति कवयश्चैतन्ययुक्तं मनः।। १२।।

अन्वयः - आदर्शान्तः त्वदीयवदनम् इव बुद्धौ चितेः छाया एव चिद्वद्भाति। मनः तदध्वनैव अशेषान् विषयान् गृह्णाति। यतः न हि केवलं चैतन्यं, हृदयं च किञ्चिद् जानाति। कवयः चैतन्ययुक्तम् इदं मन एव वृत्तिज्ञानमिति वदन्ति।

व्याख्या - दर्पणे यथा तव वदनस्य छाया दृश्यते तद्वद् बुद्धौ चितेः, चितः, अर्थात् चैतन्यस्य या छाया, प्रतिबिम्बो, दृश्यते सैव चिदाभासः इत्युच्यते। वस्तुतः मनः चिदाभासद्वारैव विषयानशेषान् जानाति। यतः निरपेक्षं चैतन्यं निरपेक्षं मनो वा किञ्चिद् ज्ञातुं न प्रभवति। इदं चैतन्ययुक्तं चिदाभाससंवलितं

मनः एव वृत्तिज्ञानमिति मनीषिणः वदन्ति। (१२)

१३.

मनसः विषयग्रहणप्रकारं दर्शयति।

तप्तस्ताम्ररसोऽग्निना परिणमत्यश्वादिरूपं यथा
चेतोवृत्तिरियं तथा घटपटाद्याकारिणी जायते।
आभासोऽपि चितः प्रकाशयति तान् सर्वान् [१३७]घटादींस्तथा
द्रष्टुं वस्तु तमोगतं च नयनं दीपं जनो वाञ्छति।। १३।।

अन्वयः - अग्निना तप्तः ताम्ररसः अश्वादिरूपं यथा परिणमति तथा इदं चेतोवृत्तिः घटपटाद्याकारिणी जायते। चितः आभासः तान् घटादीन् सर्वान् प्रकाशयति। जनः तमोगतं वस्तु द्रष्टुं नयनं दीपं च वाञ्छति।

व्याख्या - यथा मूषायां सिक्तः अग्नितप्तः ताम्रादिलोहरसः दीप-पात्र्यादिरूपेण परिणमति, अश्वादिरूपेण च परिणमति, तथा मनोवृत्तिरपि घटपटाद्याकारिणी जायते। चिदाभासः तान् घटपटादीन् सर्वान् प्रकाशयति। एवं घटपटादिविषयग्रहः भवति। यथा तमोगतं वस्तु द्रष्टुं जनः दीपं नयनं च वाञ्छति तथा अत्रापि घटपटादिज्ञाने नयनस्थानीया मनोवृत्तिः, तथा दीपस्थानीयः चिदाभासोऽप्यावश्यकः। (१३)

१४.

घटपटादिज्ञाने नयनं दीप इति द्वयमावश्यकम्। किन्तु परमपदं वीक्षितुं ज्ञातुं चिदाभासो नावश्यक इत्याह।

दीपश्चक्षुरिति द्वयञ्च तिमिरे वस्त्वर्थ्यते[१३८] वीक्षितुं
चक्षुर्मात्रमपेक्ष्यते दिनकरं द्रष्टुञ्च सर्वैर्जनैः।
लोकं विस्तरभाजमीक्षितुमियं वृत्तिः फलञ्चोभयं
प्रार्थ्यं तत्परमं पदं स्वविषयीकर्तुं हि वृत्तिस्त्वलम्।। १४।।

अन्वयः - तिमिरे वस्तु वीक्षितुं दीपः चक्षुः इति द्वयञ्च सर्वैर्जनैरर्थ्यते। दिनकरं द्रष्टुं च चक्षुर्मात्रम् अपेक्ष्यते। (एवं) विस्तरभाजं लोकं वीक्षितुम् इयं वृत्तिः फलञ्चेति उभयं प्रार्थ्यम्। (परं) तु परमं तत् पदं स्वविषयीकर्तुं वृत्तिः अलं हि।

137. ***Vera*** reads as पटादीन् वपुः.

138. ***RSV 1***, ***RSV 2*** , and ***GN*** read as वस्त्वर्थतः. ***Vera*** reads as वस्त्वर्थ्यते.

व्याख्या - तमसि घटादिकं द्रष्टुं दीपः चक्षुः इति द्वयमप्यावश्यकम्। किन्तु प्रकाशस्वरूपं सूर्यं द्रष्टुं चक्षुरेवालम्। एवमेव नानारूपम् इदं जगद् द्रष्टुं वृत्तिः, प्रतिबिम्बनस्य फलं चिदाभासश्चेति उभयमावश्यकम्। किन्तु य आनन्दः, या चितिर्नित्यमन्तर्ज्वलति, तत् परमं पदं द्रष्टुं अन्यत् चैतन्यं चिदाभासरूपं नावश्यकमिति। (१४)

१५.

एवं लौकिकदर्शनस्य परतत्त्वदर्शनस्य च भेदं प्रदर्श्य कथं मनसोऽप्यगम्यं वस्तु मनसा द्रष्टुमादिश्यते इति द्वितीयं संशयं निरस्यति वृत्तेः फलस्येति।

वृत्तेः फलस्य विकृतिं हृदयं वदन्ति
ब्रह्मातिथिर्हि मनसः फलवर्जितस्य।
युक्तं फलेन न हि पश्यति वस्तु चित्तं
ज्ञात्वाऽर्थमीदृश इति प्रतियाहि शान्तिम्।। १५।।

अन्वयः - वृत्तेः फलस्य (च) विकृतिं हृदयं वदन्ति। फलवर्जितस्य मनसः अतिथिर्हि ब्रह्म। फलेन युक्तं चित्तं वस्तु न हि पश्यति। अर्थम् ईदृशः इति ज्ञात्वा शान्तिं प्रतियाहि।

व्याख्या - वृत्तेः अन्तःकरणवृत्तेः, फलस्य चिदाभासस्य च विकृतिं, तादात्म्यरूपं सम्बन्धमेव हृदयमिति, मन इति अभिज्ञा वदन्ति। ब्रह्म तु ईदृशस्य चैतन्याभासयुक्तस्य मनसः न विषयः। सर्वमन्यद्वस्तुजातं, चिदाभासयुक्तमेव मनः पश्यति। परमं पदं तु द्रष्टुं चिदाभासयुक्तं मनः न प्रभवति। चिदाभासवर्जितेन मनसा एव ब्रह्म द्रष्टुं शक्यते। एवम् अवाङ्मनसगोचरं ब्रह्म मनसा ज्ञेयमिति विरुद्धवद्भासमानस्य श्रुत्यादेशद्वयस्य अर्थः ईदृग्रूप इति ज्ञात्वा शान्तजिज्ञासः सुखी भवेति गुरुराह। (१५)

१६.

अजस्रं चलत्यन्तरङ्गमिति पूर्वमुक्तम्। कथं तन्निश्चलं कर्तुं शक्यते इति शिष्यः पुनः पृच्छति।

इत्थं वाचं दधाने पुनरपि स गुरौ प्राह शिष्योऽमलात्मन्
मुक्त्वा चाञ्चल्यदोषं वरनभसि मनश्चेद्विलीनं समाधिः।

डोलालोलस्वभावं सदथ निमिषतोऽभ्येति नानास्वरूपम्
यच्चित्तं तन्निवातस्थललसितमहादीपतुल्यं कथं स्यात्।। १६।।

अन्वयः - अथ गुरौ इत्थं वाचं दधाने स शिष्यः पुनरपि प्राह। हे अमलात्मन्, चाञ्चल्यदोषं मुक्त्वा मनः वरनभसि निलीनं चेत्समाधिः। यत् डोलालोलस्वभावं सत् निमिषतः नानास्वरूपम् अभ्येति तच्चित्तं कथं निवातस्थललसितमहादीपतुल्यं स्यात् (इति)।

व्याख्या - शिष्यः पुनः पृच्छति। वरनभसि चिदाकाशे निलीनं निश्चलं मन एव समाधिः इत्यभियुक्ता वदन्ति। मनस्तु लोलस्वभावं आन्दोळिकेव सदा चलदस्ति। मनः अनुनिमिषं अनेकान् विषयान् गत्वा तत्तत्स्वरूपं गृह्णाति, तद्यथोच्यते "घटात्पटमुपायाति पटाच्छकटमुत्कटम्। चित्तमर्थेषु चरति पादपेष्विव मर्कटः।।" इति। ईदृशं चित्तं कथं निवातस्थले स्थितस्य दीपस्य ज्वालेव निश्चलं कर्तुं शक्यते इति प्रश्नः। (१६)

१७.

सत्वप्रधानस्य मनसः निश्चलीकरणं विवक्षुः भूमिकात्वेन मनसः त्रिगुणात्मकत्वं प्रतिपादयति।

श्रुत्वेत्थं पुनराह शिष्यवचनं श्रीमानसौ देशिकः
हृत्सङ्कल्पविकल्पवत् त्रिगुणकं न्यूनं सदेकाधिकम्।
दैवीं सम्पदमेति सत्वसहितञ्चेन्मानसं वासनाः
युक्तञ्चेद्रजसासुरीरपि तमोयुक्तन्तु दुःसंपदः।। १७।।

अन्वयः - इत्थं शिष्यवचनं श्रुत्वा श्रीमानसौ देशिकः पुनराह। सङ्कल्पविकल्पवत् त्रिगुणकं हृत् न्यूनं सत् एकाधिकम्। मानसं सत्वसहितं चेत् दैवीं सम्पदमेति। रजसा युक्तं अपि आसुरीः वासनाः एति। तमोयुक्तं चेत् दुस्सम्पदः तु एति।

व्याख्या - शिष्यस्य प्रश्नं श्रुत्वा गुरुः पुनराह। मानसं सङ्कल्पविकल्पात्मकम्। त्रिगुणयुक्तञ्च। सत्वरजस्तमोरूपः त्रयो गुणाः। तेषु सदा एकस्य गुणस्य आधिक्यं स्यात्। गुणद्वयमितरत्तु न्यूनम्। सत्वगुणे अधिके मनः दैवीं सम्पदमेति। रजसः आधिक्ये आसुरीः वासनाः अभ्युपैति। तमसः आधिक्ये दुष्टाः सम्पदः एतीति। हृदिति मन एवोच्यते इति द्रष्टव्यम्। (१७)

१८.

मनसः निसर्गतः सत्वप्राधान्यं भवतीत्यतः तस्य निश्चलत्वसम्पादनं क्रमात्कर्तुं शक्यमेवेति दर्शयति।

स्वरूपं सत्त्वाख्यो गुण इह हृदो द्वावथ परौ
समायातौ त्यागादुपशमनमभ्येष्यत इमौ।
स्थिरे सत्वे नष्टा घनपरिणतिश्चञ्चलदशा
मनः स्वच्छाकाशप्रतिममथ तिष्ठेत्परपदे।। १८।।

अन्वयः - इह हृदः स्वरूपं सत्वाख्यो गुणः। अथ परौ द्वौ समायातौ। त्यागात् इमौ उपशमनम् अभ्येष्यतः। सत्वे स्थिरे (सति) घनपरिणतिः चञ्चलदशा नष्टा स्यात्। अथ मनः स्वच्छाकाशप्रतिमं परपदे तिष्ठेत्।

व्याख्या - हृदः मनसः सत्वाख्यो गुण एव स्वरुपम्। अर्थात् स्वभावतः सत्वप्रधानं हि मनः। तदुक्तं "आसीन्मनश्च धिषणा च समष्टिसत्वाद्" (तत्त्वप्रदीपप्रकरणं ३०) इति। परौ द्वौ गुणौ समायातौ। आयातत्वादेव त्यक्तुं शक्यते। त्यागादुपशान्तौ भवेताम्। "तमो द्वाभ्यां रजः सत्वात् सत्वं सत्वेन नश्यति। तस्मात्सर्वमवष्टभ्य स्वाध्यासापनयं कुरु।।" (विवेकचूडामणिः २७८) इत्युक्तं हि। सत्वे प्रवृद्धे मनसः अनवरतपरिणमनस्वभावः नष्टो भवेन्निश्चयेन। अथ च परपदे निलीनं भवेत्। स्वच्छाकाशतुल्यं निर्मलं भवेदिति। (१८)

१९.

तदानीं मनः निश्चलं निर्विकल्पञ्च भवेदिति दर्शयति।

आदर्शे निष्कलङ्के भवति यदि परो दर्पणो निष्कलङ्क-
स्तौ द्वौ लब्ध्वैकभावं सुचिरमपि तथा निर्विकल्पौ भवेताम्।
मानैर्ज्ञातुं सुदूरे गगनवदभितो व्यापके सच्चिदब्धौ
लीनं चेतो यदि स्यात्क्वचन जगदिदं लोलता वा क्व शङ्का।। १९।।

अन्वयः - निष्कलङ्के आदर्शे भवति यदि परो निष्कलङ्को दर्पणः भवति (तर्हि) तौ द्वौ एकभावं लब्ध्वा सुचिरमपि निर्विकल्पौ भवेताम्। तथा चेतः यदि गगनवद् अभितो व्यापके सच्चिदब्धौ क्वचन लीनं स्याच्चेत् तदा मानैरिदं जगत् ज्ञातुं सुदूरे। क्व वा लोलता? (क्व) शङ्का ?

व्याख्या - निर्मले कस्मिंश्चिद् दर्पणे अपरो निर्मलो दर्पणः भवति चेत्तत्र

प्रतिबिम्बितुं न किमपि भवेत्। तेन च सुचिरं तथैव स्थितयोरपि तयोः तादवस्थ्यमेव। अर्थात् तौ द्वावपि निर्विकल्पौ निर्विशेषौ भवेताम्। एवमेव सर्वत्र व्याप्ते गगनवत् निर्मले सच्चिदब्धौ चेतो लीनं चेत् नानाविकल्पात्मकम् इदं जगत् कथं वा भवेत्? कथं वा मनसः चाञ्चल्यम् ? शङ्कालेशस्याप्यवकाशो नास्तीति। (१९)

२०.

चेतः सच्चिदब्धौ लीनं चेत् जीवन्मुक्तस्य कथं प्रारब्धभोगः इति शिष्यः पुनः पृच्छति।

ब्रह्मैकत्वं गतानामिह जगति सतामावपुःपातमेषां[139]
स्यात् प्रारब्धस्य भोगः कथमिति[140] भविता चेन्मनो नैव नश्येत्।
नष्टं चेतो यदि स्याद् भवति नहि मनाग्भोगगन्धः स्फुरेच्चेत्
चेतोमुक्ता न हि स्युर्मम विशयमिमं छिन्धि विद्वन् सुखाप्त्यै।। २०।।

अन्वयः - इह जगति ब्रह्मैकत्वं गतानाम् सताम् एषाम् आवपुःपातं प्रारब्धस्य भोगः भविता स्यात् चेत् कथमिति मनः नैव नश्येत्? यदि चेतः नष्टं स्यात् भोगबन्धः मनाग् (अपि) न। (यदि पुनः मनः) स्फुरेच्चेत् (ते ब्रह्मविदः) न हि चेतोमुक्ताः स्युः। हे विद्वन् मम सुखाप्त्यै इमं विशयं छिन्धि।

व्याख्या - ब्रह्मभावं गतानां जीवन्मुक्तानामेषां शरीरपातपर्यन्तं प्रारब्धकर्मणां भोगः भवति; भोगेनैव प्रारब्धस्य कर्मफलस्य नाशः इत्युक्तम्। एवञ्चेत् तेषां मनो नैव नश्येत्। मनो विना भोगस्य असिद्धत्वात्। तेन किम् इति चेत्, मनः सच्चिदब्धौ लीनं भवेत् जीवन्मुक्तानाम् इत्युक्तं किल? मनो लीनमेव नष्टमेव इत्युच्यते चेत् कथं वा भोगः प्रारब्धकर्मणो नाशश्च ? मनो न विनष्टं चेत् जीवन्मुक्तत्वं कथमिति परस्परविरोधः इति। अयं संशयः मां दुनोति। मम सुखाय कृपया तं छिन्धि इति। (२०)

२१.

मनोनाशो द्विविधो भवति - सरूपनाशः, अरूपनाशश्चेति; तत्र जीवन्मुक्तानां सरूपनाशः, विदेहमुक्तानाञ्च अरूपनाशश्चेति दर्शयति।

इत्थं पृष्टवते जगाद स [141]गुरुर्द्वेधा मनःसंक्षयो
जीवन्मुक्तियुजां सरूप इति चारूपो विदेहात्मनाम्।

---

139. ***Vera*** wrongly reads as सतामावपुः पातमेषां (with space in between).

140. ***Vera*** reads as कथमिह.

141. ***Vera*** reads as पुनर्द्वेधा.

[142]सन्त्यज्यैव रजस्तमश्च हृदयं सत्वात्मकञ्चेत्सरु-
पो नाशः स तु लिङ्गदेहविलये [143]सत्वक्षयोऽरूपकः।। २१।।

अन्वयः - स गुरुः इत्थं पृष्टवते जगाद। मनःसंक्षयो द्वेधा। जीवन्मुक्तियुजां सरूपः इति। विदेहात्मनाम् अरूपः (इति) च। हृदयं रजस्तमश्च सन्त्यज्य एव सत्वात्मकं (भवति) चेत् सरूपो नाशः। लिङ्गदेहविलये तु सः सत्वक्षयः अरूपकः।

व्याख्या - मनोनाशो द्विविधो भवति। जीवन्मुक्तानां मनोनाशः सरूपाख्यः। विदेहमुक्तानां च अरूपकः इति। मनस्तु स्वभावतः सत्वप्रधानं भवतीत्युक्तमेव। तत्र आगन्तुकयोः रजस्तमसोः त्यागे मनः सत्वात्मकं भवति। स च सरूपो मनोनाशः। अरूपो नाशस्तु सूक्ष्मशरीरस्य समग्रस्य विलये, नाशे भवति। तस्मिन् सत्वस्यापि क्षयो भवतीति। (२१)

२२.

अरूपनाशे मनसः चित्तत्वमेव नष्टं भवतीत्युच्यते।

शुद्धं[144] सत्त्वं स्वरूपं किल यदि रजसा याति साकं तमश्चेत्
चित्ताख्यं[145] नैव जातं त्वनुभवति गतं भावि काङ्क्षेन्न मुक्तः।
अम्लानः कर्तृताया विगलितहृदयोऽकर्तृभावेन तुष्टः
साक्षी सर्वेन्द्रियाणामपि विषयपरो नैव लिप्येत विद्वान्।। २२।।

अन्वयः - यदि रजसा साकं तमः याति चेत् शुद्धं सत्वं स्वरूपं भवति किल। चित्ताख्यं नैव। मुक्तः जातं तु अनुभवति। (न) गतम्। भावि काङ्क्षेत्। कर्तृताया विगलितहृदयः अम्लानः अकर्तृभावेन तुष्टः सर्वेन्द्रियाणां साक्षी विषयपरः अपि विद्वान् नैव लिप्येत।

व्याख्या - मनसः अरूपनाशे शुद्धसत्वत्वात् मनः मननरूपं स्वं कर्म न करोतीत्यतः जीवन्मुक्तः साक्षिरूपेण भुङ्क्ते, न पुनः भोक्तृरूपेण इति दर्शयति। मनस्तः रजोगुणेन साकं तमोगुणः अपयाति चेत् तस्य स्वरूपं शुद्धं सत्वमेव

142. ***Vera*** reads as उज्झित्वैव.

143. ***RSV 1*** and ***RSV 2*** read as सत्यक्षयोऽरूपकः. ***GN*** reads as सत्वक्षयोऽरूपकः. ***Vera*** reads as सत्वक्षयो रूपकः

144. ***RSV 1*** and ***RSV 2*** read as शुद्धं सत्वं स्वरूपं . ***GN*** and ***Vera*** read as चित्तं सत्वस्वरूपं. We have retained the ***RSV*** reading (शुद्धं सत्वं स्वरूपं) as it suits more in the context.

145. ***RSV 1*** and ***RSV 2*** read as चित्ताख्यं. ***GN*** and ***Vera*** read as चित्ताख्या. We have retained the ***RSV*** reading चित्ताख्यं (चित्तमित्याख्या यस्य तत्).

भवेत्। तदानीं तस्य चित्तत्वमेव विनष्टम्। ततश्च मनः चित्ताख्यं नैव भवेत्। चेततेः संज्ञानस्य नाशात्। शुद्धं सत्वं न चेतते। एवञ्च जीवन्मुक्तः यद्यत् जातं, वर्तमानं, तत्तत् निर्लिप्तः अनुभवति। गतं न स्मरति। भावि न काङ्क्षति। विगळितमनस्कः कर्तृताया रहितः अकर्तृभावेन नितरां तुष्टः सर्वेन्द्रियसाक्षी भवति। केवलं साक्षी एव। न भोक्ता। इन्द्रियाणि विषयपराणि। जीवन्मुक्तः अपि विषयपरः इव दृश्यते। किन्तु सः विषयैर्न लिप्यते। (२२)

२३.

जीवन्मुक्तः असक्तः सन् विषयेषु व्यवहरति इत्युक्तम्। असङ्गश्चेत् कथं व्यवहारः? व्यवहरति चेत् कथं समाधिः ? इति शिष्यः पृच्छति।

व्यापारे सत्समाधिर्यदि भवति तदा स्याद्विकल्पोऽपि भूयान्
चेतोलौल्यं प्रयायाच्चलति यदि मनो लक्ष्यदार्ढ्यं न हि स्यात्।
इत्थं वक्तोपमानं शृणु परपुरुषे सक्तचित्ता हि नारी
तत्तत्कार्याणि कुर्वत्यपि सुरतसुखं नैव मुञ्चेत्कथञ्चित्।। २३।।

अन्वयः - यदि व्यापारे सत्समाधिर्भवति तदा भूयान् विकल्पोऽपि स्यात्। चेतः लौल्यं प्रयायात्। यदि मनश्चलति लक्ष्यदार्ढ्यं न स्याद् हि। इत्थं वक्ता त्वम् उपमानं शृणु। परपुरुषे सक्तचित्ता नारी तत्तत्कार्याणि कुर्वत्यपि सुरतसुखं कथञ्चिदपि नैव मुञ्चेत् हि।

व्याख्या - जीवन्मुक्तः असक्तः सन् विषयेषु व्यापृणोति इत्युक्तं किल। एवञ्चेत् समाधिर्न भवेत्। यतः विषयव्यापारे भूयान् विकल्पः भवेत्। विकल्पश्चेत् मनश्चञ्चलं स्यात्। मनसश्चाञ्चल्ये कथं समाधिः इति। कथं विरुद्धयोः समावेशः इति शिष्यः पृच्छति। गुरुः दृष्टान्तमेकं प्रदर्श्य समाधत्ते। परपुरुषसङ्गसुखं यया योषिता अचिरादनुभूतं सा तत्तत्कार्याणि स्वीयानि कर्तव्यानि कुर्वत्यपि सततं सुरतसुखं स्मरत्येव। एवमेव व्यापारवानपि जीवन्मुक्तः समाधौ तिष्ठति। यथोक्तं योगवासिष्ठे "परव्यसनिनी नारी व्यग्रापि गृहकर्मणि। तदेवास्वादयत्यन्तः परसङ्गरसायनम्।। एवं तत्त्वे परे बुद्धे धीरो विश्रान्तिमागतः। तदेवास्वादयत्यन्तः बहिर्व्यवहरन्नपि।। (५.७४.८३,८३)" इति। (२३)

२४.

त्यक्तदेहाभिमानस्य कर्तृत्वभावान्मुक्तस्य कथं वा भोगः? भोगं विना कथं वा प्रारब्धनाशः, तद्द्वारा विदेहमुक्तिश्च कथं भवेदिति शिष्यः पुनः पृच्छति।

देहाहन्तोज्झितस्य [146]व्यपगतमलवद्भावनस्याप्यकर्तु-
र्ब्रह्माकारस्य भोगः कथमिव[147] भविता यद्यकर्ता त्वभोगः।
शोकव्रातादिवज्रायितवचन[148] गुरो संशयांश्छिन्धि [149]चेदि
त्याख्यास्ये [150]तेऽत्र येऽस्मिञ्जगति बहुमतास्ते महाकर्तृमुख्याः।। २४।।

अन्वयः - देहाहन्तोज्झितस्य व्यपगतमलवद्भावनस्य ब्रह्माकारस्य अपि अकर्तुः कथमिव भोगः भविता? यदि अकर्ता (तर्हि) अभोगः। हे शोकव्रातादिवज्रायितवचन गुरो (नः) संशयान् छिन्धि इति (पृच्छसि) चेत् अत्र ते आख्यास्ये। ये महाकर्तृमुख्याः भवन्ति ते अस्मिन् जगति बहुमताः।

व्याख्या - जीवन्मुक्तः ब्रह्माकारः भवति हि। तेन देहाभिमानस्त्यक्तः। निर्मलः सः। मलवानहम्, अज्ञानी अहम्, इति बोधोऽपि तस्मादपगतः। एवं निरस्तकर्तृभावस्य कथं प्रारब्धकर्मफलभोगः, अकर्त्रा कथं कर्मफलं भुज्यते इतीमं मम संशयं हे गुरो! शीतळैरुपदेशवाक्यैः अस्मान् वीतदुःखान् कुर्वन् हे कारुण्यमूर्ते, छिन्धि इति शिष्यः पृच्छति। तदा आचार्यः उत्तरयति। महाकर्तृप्रधानाः त्रयः, त्रिप्रकाराः, जीवन्मुक्ता भवन्ति। महाकर्ता, महाभोगी, महात्यागी इति त्रयः। अथवा एते त्रयो भावाः जीवन्मुक्तेषु दृश्यन्ते। ये महान्तः एतैर्भावैर्युक्ताः ते अस्मिन् लोके बहुमानार्हाः भवन्तीति। (२४)

२५.

तत्र महाकर्तृलक्षणमाह -

यद्वच्चुम्बकभूधरस्य पुरतोऽकर्तुर्ह्ययश्चेष्टते
किञ्चाकारयितुश्च विश्वमपि मे सर्वं पुरश्चेष्टते।
देहादिन्द्रियवृत्तितोऽन्तरतमां वृत्तिं च पश्यन् स्वयं
भाम्यादित्यवदित्यहं वदति यः सोऽयं महाकर्तृकः।। २५।।

अन्वयः - यद्वद् अकर्तुः अकारयितुश्च चुम्बकभूधरस्य पुरतः अयः चेष्टते तद्वत् अकर्तुः अकारयितुश्च मे पुरः सर्वं विश्वं चेष्टते हि। देहाद् इन्द्रियवृत्तितः

146. ***RSV 1*** and ***RSV 2*** read as व्यपगतमलसद्भावनस्य.

147. ***Vera*** reads as कथमिह.

148. ***Vera*** reads wrongly as क्लेशव्रातादिवज्रायितवचनगुरो.

149. ***Vera*** reads वेदित्याख्यास्ये.

150. ***Vera*** reads as ते त्रयोऽमी.

अन्तरतमां वृत्तिं पश्यन्, अहम् आदित्यवत् स्वयं भामि इति यो वदति, सोऽयं महाकर्तृकः।

व्याख्या - चुम्बकभूधरः अयस्कान्तपर्वतः न किञ्चित् करोति न च कारयति किञ्चित्। किन्तु तस्य पुरः अयः चेष्टते। एवमेव "अहमपि अकर्ता अकारयिता। नाहमेतत्सर्वं करोमि। न चाहं किञ्चित् कारयामि। मम पुरः सर्वमिदं विश्वं चेष्टते।" इति दृढं चिन्तयन् यः देहात्, इन्द्रियेभ्यः वृत्तितः, अन्तःकरणवृत्तेश्च अन्तरतमा प्रत्यक्तमा या वृत्तिः ताम् आत्ममात्रगोचरां पश्यन् (तस्या अपि भिन्नः सन्) "अहमादित्यवत् स्वयं प्रकाशे" इति योऽभिजानाति स एव महाकर्तृकः। (२५)

२६.

महाभोगवतः महात्यागवतश्च लक्षणमाह।

षण्णां न्यूनाधिकसमतया संस्थितानां रसानां
भुङ्क्तेऽजानन् विपिनशिखिवद्यो महाभोगवान् सः।
अस्तोकं वा लघु गुरु निजं दुःखमन्यत्सुखं वा
यायाद्यो नो[151] मणिरिव महात्यागवान्मुक्तिरेषाम्।। २६।।

अन्वयः - न्यूनाधिकसमतया संस्थितानां षण्णां रसानां अजानन् यः विपिनशिखिवद् भुङ्क्ते सः महाभोगवान् । अस्तोकं, लघु, गुरु, निजं वा अन्यद् वा सुखं दुःखं वा यः मणिरिव नो यायात् स महात्यागवान्।

व्याख्या - मधुरादयः ये षड् रसाः न्यूनत्वेन आधिक्येन साम्येन वा संस्थिताः तेषां नैयून्यादिभेदं विशेषं वा अजानन् यः दावाग्निवद् इदं शुचि वा अशुचि वा, इदं पथ्यं वा अपथ्यं वा, इति अविचारयन्, यथा दावाग्निः सर्वं वस्तुजातं दहति तथा यः भुङ्क्ते अनुभवति सः न अभोगी। किन्तु स एव महाभोगी।

एवं यः सुखादीननुभवान् अनुभवन्नेव न प्राप्नोति - इदं लघु इदं गुरु, इदं मदीयम् इदं तदीयम् इत्यादिभेदं विना असङ्गः योऽनुभवति स तान् सर्वान् न प्राप्नोति। तेष्वसक्त एवानुभवतीत्यतः ते तं न प्राप्नुवन्ति - सः महात्यागी। यथा मणिदर्पणे प्रतिबिम्बितं वस्तुजातं तत्र प्रविष्टमिव भाति, किन्तु वस्तुतः न

151. ***RSV 1***, ***RSV 2*** , and ***GN*** read as यायाद्योनो. ***Vera*** reads as यायाद्यो नो.

किमपि तत्र प्रविशति। तद्वत् महात्यागिनम्, येन सर्वमपि त्यक्तम्, तं न कोऽप्यनुभवः प्राप्नोति।

एतेषां महाकर्तृ-महाभोगि-महात्यागिनाम् एव मुक्तिः। अर्थात् ये महाकर्तृकाः महाभोगवन्तः महात्यगिनो वा त एव जीवन्मुक्ताः। (२६)

२७.

विषयेषु व्यवहरन् जीवन्मुक्तः कथं कर्म न करोतीति वक्तुं शक्यते इति पुनः पृच्छति शिष्यः -

कर्मारब्धं कथमनुभवन् देहवान् सन् विमुक्तः?
कर्मासक्तान् भुवि वशयितुं कर्म कर्ता कथं वा?
कुर्वन् कर्माण्यपि न[152] विदधच्चेति वक्तुं कथं वा
शक्यं[153]? शङ्कातृणकणशुचे श्रीगुरो शंस मे त्वम्।। २७।।

अन्वयः - देहवान् सन् विमुक्तः कर्मारब्धम् अनुभवन्, भुवि कर्मासक्तान् वशयितुं कर्म कर्ता वा कर्माणि कुर्वन् अपि कथं वा, न विदधत् च इति वक्तुं कथं शक्यम्? हे शङ्कातृणकणशुचे श्रीगुरो त्वं मे शंस।

व्याख्या - जीवन्मुक्तः, मुक्तोऽपि प्रारब्धकर्मफलभोगाय किल देहं धारयति। सः हि प्रारब्धकर्मफलम् अनुभवन्, कर्मासक्तस्य लोकस्य अनुग्रहाय कर्मासक्तं लोकं कर्म कारयन्, तदर्थं कर्माणि कुर्वाणः किल चरति। तत्कथं "न करोति कर्माण्ययम्" इति कथयितुं शक्यते ? त्वं मे शंस इति शिष्यः सविनयं पृच्छति। संसारविपिनस्यापि सद्योदाहको भवति गुरुरिति आदरं प्रदर्शयन्, गुरुं सप्रश्रयं शङ्कातृणकणशुचे संशयतृणपुञ्जस्य दाहक इति सम्बोधयति शिष्यः। (२७)

२८.

एवं शिष्येण पृष्टो गुरुः समादधाति। त्रिविधाः मुमुक्षवो जनाः कर्माचरन्ति। परं, मुक्तः कर्म नाचरतीति।

एवं शिष्येण पृष्टो गुरुरपि कथयामास भूयो मनुष्या-
स्त्रेधा कर्माचरन्ति[154] प्रकृतिपरिगतास्त्वीषणाद्यैरुपेताः।

152. This न is left out in ***RSV 1*** and ***RSV 2*** .

153. ***Vera*** reads as शक्यः.

154. All the previous editions read कर्माचरन्ते. But as it is grammatically wrong we have replaced it by कर्माचरन्ति. There is no metrical incongruity.

तीव्राहन्ताममत्वे भुवि विदधति ये त्वैहिकामुष्मिकार्थं[155]
मुक्त्यै[156] विद्यां भजन्ते परमपदजुषां कर्मभिः किं फलं स्यात्।। २८।।

अन्वयः - एवं शिष्येण पृष्टो गुरुः भूयोऽपि कथयामास । त्रेधा मनुष्याः ऐहिकामुष्मिकार्थं कर्म आचरन्ति। प्रकृतिपरिगताः तु ईषणाद्यैरुपेताः, ये तु तीव्राहन्ताममत्वे विदधति (ते च) इति। एते एव मुक्त्यै विद्यां भजन्ते। परमपदजुषां कर्मभिः किं फलं स्यात्?

व्याख्या - त्रिविधाः जनाः कर्म कुर्वन्ति। तत्र केचन प्रकृतिपरिगताः प्रारम्भदशायां वर्तमानाः। त एव पुत्रैषणा, वित्तैषणा, दारैषणा इति एषणात्रितयवन्तः। अन्ये केचन अहन्तया ममतया च कर्म कुर्वन्ति। अथवा अहन्ताममते एव तेषां कर्मकरणे हेतुः इति कृत्वा अहन्तामेव ते कुर्वन्ति, ममतामेव ते कुर्वन्ति इत्युच्यते। एवं तीव्राहन्तया कर्मिणः, अथ च ममतया कर्मिणः इति द्विप्रकाराः। ते अपि ऐहिकम् आमुष्मिकं वा सर्वं कर्मफलं परित्यज्य मुक्त्यै विद्यामेव आश्रयन्ते। तत्साधनानि कर्माणि कुर्वन्ति।

एवं त्रयः कर्मिणः - प्राकृताः, ऐहिकामुष्मिककामनावन्तः, मुमुक्षवश्चेति।

ये तावत् एताः तिस्रः अवस्थाः अपि क्रान्त्वा परमपदजुषः अधिगतपरमार्थाः सन्ति तेषां कर्मणा किं प्रयोजनम्? ते अकर्मिण एवेति। (२८)

२९.

अधिगतपरमार्थानामपि श्रवणमननादिकम् आवश्यकं किमिति पृच्छति शिष्यः।

उक्तं श्रीगुरुनाथ सम्यगधुना त्यक्तैहिकामुष्मिकाः
[157]विद्याकामनया सदा प्रविदधत्यभ्यासयोगं चिरम्।
तस्मिन्नप्यकृतप्रयत्नविधयो वाञ्छन्ति किं वाऽऽशिषः
कस्मात्तैः श्रवणादयो हृदयनैश्चल्याय नापेक्षिताः।। २९।।

अन्वयः - श्रीगुरुनाथ त्यक्तैहिकामुष्मिकाः विद्याकामनया सदा अभ्यासयोगं चिरं प्रिवदधति तस्मिन्नपि अकृतप्रयत्नविधयः आशिषः किं वाञ्छन्ति इति अधुना (एव) सम्यगुक्तम्। तैः हृदयनैश्चल्याय श्रवणादयः कस्मात् न अपेक्षिताः?

---

155. ***Vera*** reads as आमुष्मिकार्था.

156. ***Vera*** reads as मुक्तयै.

157. ***Vera*** has a different reading for the second and third quarters as तत्त्वज्ञानसमार्जनाय सुतरां कुर्वन्ति यत्नं परम्। संलब्धात्मसमाधयो न विदधत्यभ्यासयोगं चिरं.

व्याख्या - ऐहिकम् आमुष्मिकं वा कामनाविशेषम् उद्दिश्यैव कर्मिणः कर्म कुर्वन्ति। ये त्यक्त-ऐहिक-आमुष्मिक-कामनाः ते विद्यायै चिरकालम् अभ्यासयोगं कुर्वन्ति। तस्मिन्नपि अभ्यासयोगेऽपि केचित् न प्रयतन्ते। ते न किञ्चिदपि कुर्वन्ति। ते हि आशिषः का अपि न वाञ्छन्ति। तस्मादेव किमपि न कुर्वन्तीत्युक्तं गुरुनाथेन। शिष्यः पुनः पृच्छति - ये निरस्तसमस्तकर्माणः तैः हृदयनैश्चल्याय मनोदार्ढ्याय, क्षवणादयः, श्रवणमनननिदिध्यासनानि करणीयानि वा न वेति। (२९)

३०.

अधिगतपरमार्थस्य श्रवणादिकं नापेक्षितमित्युत्तरयति गुरुः।

एवञ्चेच्छृणु वत्स वच्म्यविदितस्वात्मस्वरूपा जनाः
शृण्वन्तूर्जितमानसाश्च[158] मननं कुर्वन्तु सन्देहिनः।
ध्यायन्त्वेव[159] विपर्ययाभिधमहाभूतैर्गृहीतान्तराः
ये चिद्व्योममया भवेयुरथ तैर्नापेक्ष्यते किञ्चन।। ३०।।

अन्वयः - एवं (पृच्छसि) चेद् वत्स शृणु। वच्मि। ये अविदितस्वात्मस्वरूपा जनाः ते शृण्वन्तु। ऊर्जितमानसाः सन्देहिनः च मननं कुर्वन्तु। विपर्ययाभिधमहाभूतैर्गृहीतान्तराः ध्यायन्तु एव। अथ ये चिद्व्योममया भवेयुः तैः किञ्चन नापेक्ष्यते।

व्याख्या - हे वत्स त्वमेवं पृच्छसि चेदहं वदामि शृणु इति गुरुः खण्डितमाह। ये आत्मस्वरूपं न जानन्ति तेषां श्रुतिवाक्यश्रवणम् आवश्यकम्। ये च सन्देहिनः, सङ्कल्पविकल्पात्मकेन मनसा सन्दिहानाः, मनसः ऊर्जितत्वेनैव प्रबलसन्देहाः ते कामं मननं कुर्वन्तु। करणीयमेव तैः। एवमेव श्रवणमननाभ्यां तत्त्वमवधार्य, तदनन्तरं ये तदा तदा विपरीतभावनया पीड्यमानाः, विपर्ययभूतग्रस्ताः, तेषां निदिध्यासनमत्यन्तमपेक्षितम्। परन्तु ये परं तत्त्वमधिगम्य चिदाकाशे निलीनहृदयाः भूमानमानन्दं स्वरूपतयावगम्य स्थिताः तेषां श्रवणादिकं किमपि नावश्यकमिति। (३०)

३१.

यथा जागरणं स्वाप्नव्यवहारनिवर्तकं तथा तत्त्वज्ञानम् अज्ञाननिवर्तकं भवतीत्युक्तम्। एवञ्च तत्त्वज्ञानिनः संसारव्यवहृतिः न भवेत्। तत्त्वपरायणा अपि व्यवहृतिमन्तश्चेत्

---

158. ***Vera*** reads as शृण्वन्त्यादृतमानसाश्च.

159. ***Vera*** reads as ध्यायन्त्येव.

विकृतिः ब्रह्मापि बाधते किम् इति मे सन्देहः इति पृच्छति शिष्यः।

स्वामिन्! तत्त्वपरायणा[160] अपि बुधा[161] अज्ञानिवन्नित्यदा
कुर्वे वच्मि ददामि यामि निवसाम्यायामि चेत्यादिकम्।
कार्यं ते[162] कथमावहन्ति विगतं ब्रूषेऽनृतं तेष्वलं
ब्राह्मी नो विकृतिः कदाऽपि[163] भगवन्नेषाऽनुगृह्णीष्व माम्।। ३१।।

अन्वयः - स्वामिन् ते तत्त्वपरायणा बुधा अपि अज्ञानिवत् नित्यदा कुर्वे वच्मि ददामि यामि निवसामि आयामि इत्यादिकं च कार्यं कथमावहन्ति? तेषु अनृतं अलं विगतं ब्रूषे। एषा विकृतिः कदापि ब्राह्मी नो इत्यपि (ब्रूषे)। भगवन् माम् अनुगृह्णीष्व।

व्याख्या - तत्त्वज्ञानिनः अपि अज्ञवत् सांसारिकं व्यवहारं कुर्वन्ति चेत् सांसारिको व्यवहारः, नामरूपादिभेदः, विकारः अस्त्येव किल तेषाम्। भवता उच्यते तत्त्वज्ञानिषु अनृतम्, असत्यं, सांसारिको व्यवहारः, नामरूपादिविकारः इत्येतत्सर्वं नास्तीति। विकृतिः कदापि ब्राह्मी, ब्रह्मसम्बन्धिनी भवति वा इति मे सन्देहः कथमेतदवगच्छामि इति शिष्यस्य प्रश्नः। (३१)

३२.

यावत् चिदाभासस्य चिति लयः तावदियं व्यवहृतिर्भवेदेव। नैषा दोषायेत्युत्तरयति।

यातस्वप्नकथां[164] वदन्ति हि यथा तद्वासनातो जना-
[165]स्तद्ज्ञो वक्ति तथैव सम्यगनिशं जायेत नाभासकः।
आदेहक्षयमामनन्त्यपि[166] तथा देवो मनुष्योऽहमि-
त्याभासस्य लयावधि व्यवहृतिर्नाशं न गच्छेदियम्।। ३२।।

अन्वयः - जनाः यातस्वप्नकथां तद्वासनातो यथा वदन्ति हि तथा एव तज्ज्ञः अनिशं सम्यग् वक्ति। आभासकः न जायते। आदेहक्षयम् आभासस्य

---

160. ***Vera*** reads as सत्यपरायणाः.

161. ***RSV 1*** and ***RSV 2*** read as अविबुधाः. ***GN*** reads as अपिबुधाः . ***Vera*** reads as अपि बुधाः

162. ***RSV 1***, ***RSV 2*** , and ***GN*** read as कार्यन्ते. ***Vera*** reads as कार्यं ते.

163. ***RSV 1***, ***RSV 2*** , and ***GN*** read as कथापि. ***Vera*** reads as कदापि.

164. ***Vera*** wrongly reads as यातः स्वप्नकथां.

165. ***Vera*** reads as {तद्} अज्ञो.

166. ***Vera*** reads as आमनत्यपि.

लयावधि देवोहं, मनुष्योहम् इतीयं व्यवहृतिर्नाशं न गच्छेत् इत्यामनन्ति।

व्याख्या - जनः स्वप्नात्प्रबुध्य अनुभूतां स्वप्नकथां तद्वासनातः, एवं जातम् एवं दृष्टम् इत्यादिकं कथयति अनित्यमेतदिति जानन्नपि, एवं मृषाकथा जाता इति यथा वदति तथा एव तत्त्वज्ञानिनः सांसारिको व्यवहारः। एतेन सः यथार्थज्ञानी नास्ति, ज्ञान्याभास एवेति वक्तुं न शक्यते। सः सम्यग् जानाति "अहमसङ्गः, एतत्सर्वं मृषा" इति। तत्त्वज्ञानिनः एवंरूपा सांसारिकी व्यवहृतिः, आदेहपातम्, यावत् चिदाभासः चिति विलीनो भवति तावत्कालं नापयायादिति। (३२)

३३.

स्वप्नवत् सांसारिकं व्यवहारं पश्यतां मुक्तानां जनानां नानानुभवजातं दुःखं कथं न स्यात्? किञ्च ध्यानादिनिष्ठासु ये श्रद्धावन्तः तेऽपि कर्म कुर्वन्तीति कथम् अकर्तृत्वं तज्जन्यसुखञ्चेति पुनः पृच्छति शिष्यः।

तर्ह्याचार्येन्द्र दृश्यं सकलमपि मृषेत्येव निर्णीतिभाजां
नानाकार्यं न दुःखं कथमिह तनुयाद् ज्ञानसौख्यं कुतः स्यात्।
याते प्रापञ्चिकेऽर्थे सति परमशिवे शाश्वती स्याद्विनिष्ठा
नो सम्यङ् निष्ठितानां कथय कथमहो जायते कर्तृता वा।। ३३।।

अन्वयः - (एवं) तर्हि हे आचार्येन्द्र सकलमपि दृश्यं मृषेत्येव निर्णीतिभाजां (मुक्तानां) नानाकार्यं दुःखम् इह कथं न तनुयात्? ज्ञानसौख्यं कुतः स्यात्? प्रापञ्चिकेऽर्थे याते सति परमशिवे शाश्वती विनिष्ठा स्यात्। सम्यक् निष्ठितानां कथं वा कर्तृता नो जायेत (इति) कथय।

व्याख्या - शिष्यः शङ्कया आक्रान्तः पुनः पृच्छति। मुक्तानाम्, इदं पुरो दृश्यमानं जगत् मिथ्यैवेति निर्णयः अस्ति। तथापि स्वप्नवत् नानाकार्यं ते अनुभवन्त्येव। एवम् अनुभूयमानम् अनेकरूपं विकारजातमिदं कस्मात् तेषां दुःखं न वर्धयेत्? ज्ञानलभ्यं सौख्यं कथं तेषां जायेत? यतः स्वप्नव्यवहारवत् किञ्चित्कर्तृत्वं किञ्चित्सत्यत्वञ्च तैः व्यवहारे अनुभूयते किल इति सन्देहः। किञ्च यदा सांसारिको व्यवहारः सर्वोऽपि नष्टः तदानीं परचिति शाश्वती निष्ठा स्यात्। तदर्थं निष्ठायां श्रद्धावता भाव्यं मुक्तेन। मया इयं निष्ठा अधिगन्तव्या इति निश्चयः कार्यस्तेन। एवञ्चेत् कर्तृता कथं वा न स्यादिति प्रश्नः। (३३)

३४.

मुक्तस्य व्यवहारो न दोषाय। किञ्च ये निष्ठावन्तः ते आरुरुक्षवः योगिनः। ये आरूढयोगिनः तुर्ये ब्रह्मणि लीनाः तेषां कर्तृत्वं नास्त्येव इति समाधत्ते।

जानीहि व्यवहार एष सुधियामारम्भमात्रक्षयी
ध्यानं संव्यवहारकादि सकलं चित्तस्य कार्यं खलु।
तुर्यं ब्रह्म समाश्रिता विदधते कर्माणि कस्माद् बुधाः
आरूढा न भवन्ति ते प्रतिदिनं ध्यानादिनिष्ठाश्च ये।। ३४।।

अन्वयः - सुधियाम् एष व्यवहारः आरम्भमात्रक्षयी इति जानीहि। ध्यानं संव्यवहारकादि सकलं चित्तस्य कार्यं खलु। तुर्यं ब्रह्म समाश्रिताः बुधाः कस्मात् कर्माणि विदधते? ये प्रतिदिनं ध्यानादिनिष्ठाः ते आरूढाः न भवन्ति।

व्याख्या - मुक्तानामयं सांसारिको व्यवहारः आरम्भक्षणे एव क्षयमेति। तत्कृतफलं, वासना, पुनः कर्म इति कार्यपरम्परा नास्ति तस्य व्यवहारस्य। अतः सः दुःखानुभवं नोत्पादयेत्। किञ्च व्यवहारः, ध्यानं निष्ठा इत्येतत्सर्वं चित्तस्य कार्यम्। ये प्रबुधाः तुर्यं ब्रह्म समाश्रिताः तेषां चिदाभासो वा चित्तं वा न किञ्चिद् भवेत्। ते कर्म न विदध्युः। ये पुनः प्रतिदिनं ध्यानादिनिष्ठाम् अभ्यसन्ति ते न आरूढाः। केवलम् आरुरुक्षवः। तेषां कर्माणि निष्ठादीनि सन्त्येव। (३४)

३५.

योगारूढा अपि कदाचित् प्रारब्धवेगात् निष्ठावन्तो दृश्यन्ते इति कथयति।

आरूढाश्च महागुरो भुवि परे निष्किञ्चना नित्यदा
चित्तस्योपशमाय योगसरणेरभ्यासभाजः कुतः[१६७]।
इत्याकर्णय भूतलेऽत्र च यथा प्रारब्धवेगं तथा
मुक्तास्तेऽपि भवेयुरित्यभिहितं पूर्वं कुतो विस्मृतम्।। ३५।।

अन्वयः - हे महागुरो भुवि आरूढाश्च परे चित्तस्योपशमाय योगसरणेः नित्यदा अभ्यासभाजः कुतः (भवन्ति) इति (चेद्) आकर्णय। ते मुक्ताः यथा प्रारब्धवेगं तथा भूतले भवेयुः इति पूर्वमेव अभिहितम्। कुतो विस्मृतम्?

व्याख्या — "योगारूढाः अपि तुर्ये ब्रह्मणि स्थिताः अकिञ्चनाः अपि योगमार्गे अभ्यासभाजः दृश्यन्ते किल इति पृच्छसि चेत् शृणु। प्रारब्धमनुसृत्य अस्मिन् लोके

167. ***Vera*** reads as कथम्.

तेषां स्थितिर्भवेत्। एतत्तत्त्वं पूर्वमेव अभिहितम्। कस्माद् विस्मृतवानसि?" इति आचार्येन्द्रः स्मारयति। "योगारूढस्य तस्यैव शमः कारणमुच्यते।" इति भगवदुपदिष्टरीत्या योगारूढस्य शमे अभ्यासो दृश्यते। तच्च प्रारब्धानुसारेण भिन्नंभिन्नं भवति। अधुना किमपि न करोति सः। किन्तु कृतस्य कर्मणः फलं यदनुभवितुमारब्धं तत्क्षयपर्यन्तं प्रारब्धकृतवैचित्र्यं भवेदेव। तत्त्वप्रदीपपटले "बुद्धब्रह्मस्वरूपा" इत्यस्मिन् पद्ये "सकलगतमपि व्योम सर्वैरसक्तं इत्थोत् पृच्छसि त्वं सकलगतमपि व्योम सर्वैरसक्तं यद्वत्तद्बद्धिमुक्ता अपि" इत्यस्मिन् सन्दर्भे उक्तमेव। (३५)

३६.

सैषा मुक्तस्य व्यवहृतिः लोकोपकाराय कल्पते इत्याह।

साधो त्वं शृणु तत्त्वविद्व्यवहृतिर्लोकोपकारक्षमा
प्राप्तव्यं न हि विद्यते भुवि सतां दुःखं सुखं वा तया।
सर्वानुग्रहहेतवे वितनुते सृष्टिं परेशो मुदा
नैवाप्नोत्यपि पुण्यपापकणिकामीशस्तया लेपकः।। ३६।।

अन्वयः - हे साधो त्वं शृणु। तत्त्वविद्व्यवहृतिः लोकोपकारक्षमा। सतां, तया प्राप्तव्यं सुखं वा दुःखं वा भुवि न हि विद्यते। परेशः सर्वानुग्रहहेतवे मुदा सृष्टिं वितनुते। लेपकः ईशः पुण्यपापकणिकामपि नैवाप्नोति।

व्याख्या — तत्त्ववेत्तुः यः सांसारिकव्यवहारः तत्तस्य दुःखानुभवं नोत्पादयति। किञ्च लोकोपकाराय कल्पते च। तेन व्यवहारेण, मुक्तस्य हेयं वा उपादेयं वा किञ्चिदपि नास्ति। तस्य निदर्शनमिदम् - ईश्वरः निर्लिप्तः सन् परमसन्तोषेण सृष्टिं करोति। सः हि लेपको भवति, न पुनर्लिप्तः। लेपकः सः पुण्यकणिकां पापकणिकां वा नाप्नोति। (३६)

३७.

मुक्तः ईश्वरतुल्यः इत्युक्तम्। तत्कथमिति विशदयति।

ईशज्ञानगुरुस्वरूप भगवन्नीशेन[168] तुल्यः कथं
ज्ञानी चेदिति पृच्छसि[169] शृणु तथाऽहन्ताममत्वोज्झनात्।
तुल्यौ जीवपराविति प्रविदितौ प्रज्ञानसाम्यादयं
देवो जीवगणाश्च यच्च विदितं सर्वं तदेकात्मकम्।। ३७।।

168. ***GN*** and ***Vera*** read as ईशज्ञानगुरुस्वरूपभगवन्नीशेन (without space, as a single word)
169. In order to avoid metrical incongruity, पृच्छसे would have been ideal reading, though grammatically incorrect. All the previous editions read पृच्छसि.

अन्वयः - (हे) ईशज्ञानगुरुस्वरुप भगवन् ज्ञानी कथम् ईशेन तुल्यः (भवति) इति पृच्छसि चेत् शृणु। अहन्ताममत्वोज्झनात् जीवपरौ तुल्यौ प्रविदितौ। तथा प्रज्ञानसाम्याद् अयं देवः, जीवगणाः, यच्च विदितं तत्सर्वम् एकात्मकम्।

व्याख्या — गुरुः ईश्वर एव। स एव आत्मा। 'ईश्वरो गुरुरात्मेति मूर्तित्रयविभागिने' इत्याद्युक्तेः। तादृशं गुरुं शिष्यः पृच्छति। ईश्वरतुल्यः कथं भवेद् ज्ञानी इति। गुरुराह। जीवेन अहन्ता ममता च त्यक्ता चेद् जीवेश्वरयोः भेदः नास्ति। प्रज्ञानसाम्यात्। इदं साम्यं न केवलं जीवेश्वरयोः। किन्तु यद्यदस्ति विदितं तेषां समेषां भवति। ईश्वरः, सर्वे च जीवगणाः, सर्वमिदम् एकात्मकमेव। (३७)

३८.

यदि सर्वमिदमेकात्मकं तर्हि एकेन मुक्तेन सर्वेषां मुक्तिः कथं न भवतीति पृच्छति शिष्यः।

सर्वे जीवास्त्वयमिति गुरो प्रोक्तवानस्य मोक्षे
सर्वे मुक्तिं कथमतितरां[१७०] नो लभन्ते वदस्व।
सर्वे भिन्ना इति वदसि चेदस्य सार्वात्म्यहानिः
सर्वव्याख्याकुशल कथयस्वैतदप्यात्ममूर्ते।। ३८।।

अन्वयः - हे आत्ममूर्ते गुरो सर्वे जीवाः तु अयमिति प्रोक्तवान्। अस्य मोक्षे सर्वे मुक्तिम् अतितरां नो लभन्ते। वदस्व। सर्वे भिन्नाः इति वदसि चेत् अस्य सार्वात्म्यहानिः भवेत्। हे सर्वव्याख्याकुशल एतदपि कथयस्व।

व्याख्या — यद्ययं जीवः सर्वगतः एक एवेत्युच्यते तर्हि एकस्य मोक्षे सर्वे मुक्ता भवेयुः। सर्वे भिन्नाः कथं वा मुक्तिं भजेयुः इत्युच्यते चेत् सार्वात्म्यं हीयेत। एक एवात्मा सर्वेषामित्येतन्न युक्तं स्यात्। हे गुरो मम संशयमिमं छिन्धि इति। (३८)

३९.

औपाधिकं बहुत्वं जीवानामित्याह ।

अहन्तासाक्ष्येको विभुरपि परात्मा बहुविधा-
स्तथा जीवा अन्तःकरणबहुभावादहमिति।
जगत्येकश्चन्द्रस्सलिलशशिनोऽमी बहुविधा-
उपाधीनां भेदाद् घनकलशकूपादिपयसाम्।। ३९।।

170. ***Vera*** reads as कथमितितरान्नो.

अन्वयः - परात्मा विभुः अहन्तासाक्षी एकः। तथा अपि अन्तःकरणबहुभावाद् जीवाः अहमिति बहुविधाः। जगति एकः चन्द्रः। घनकलशकूपादिपयसाम् ,उपाधीनां भेदात् सलिलशशिनः अमी बहुविधाः।

व्याख्या - अहमिति बोधस्य साक्षी एक एव परात्मा सर्वव्यापी भवति। किन्तु अन्तःकरणोपाधिभेदाद् जीवाः बहुविधाः भवन्ति। यथा आकाशे विद्यमानस्य चन्द्रस्य बहुत्र विद्यमानेषु जलेषु प्रतिबिम्बितत्वाद् उपाधिभेदेन घनसलिलचन्द्रः, कलशसलिलचन्द्रः, कूपसलिलचन्द्रः इति बहुत्वं भाति तथा अत्रापि उपाधिभेदेन जीवानां भेदः इति। (३९)

४०.

तदेव विशदयति।

उपाधावेकस्मिन्नपि घटशरावादिषु पुन-
र्विनष्टे तच्चन्द्रः प्रकृतिमयते नापरशशी।
गते जीवोपाधौ परमशिवभावं स लभते
परे नोपाध्याढ्याः कथमपि लभन्ते निजपदम्।। ४०।।

अन्वयः - घटशरावादिषु एकस्मिन् उपाधौ विनष्टे पुनः तच्चन्द्रः प्रकृतिमयते। न अपरशशी। जीवोपाधौ गते सः परमशिवभावं लभते। उपाध्याढ्याः परे कथमपि निजपदं लभन्ते।

व्याख्या - घटकूपादिगतेषु सलिलेषु बहुषु उपाधिषु एकस्मिन्नुपाधौ नष्टे तद्गतप्रतिबिम्बचन्द्रः एव प्रकृतिचन्द्रे लीयते। न अन्यत्र प्रतिबिम्बिताः। एवमेव एकस्य जीवस्य अन्तःकरणोपाधौ नष्टे स एव जीवः परमपदं लभते। अन्ये, येषामुपाधयः न विनष्टाः ते, निजपदं न लभन्त एव। (४०)

४१.

मुक्तः ईश्वरतुल्य इत्युक्तम्। जीवेश्वरयोरैक्यं कथं भवेत्। ब्रह्मेशानादीनां जगत्सर्गस्थित्यादिके शक्तिः, सर्वज्ञता, इत्यादिसामर्थ्यमस्ति। मुक्ते एतत्सर्वं नास्ति किल इति सन्दिहानः शिष्यः पृच्छति।

ऐश्वर्यं पद्मजाताम्बुजनयनललाटेक्षणानां विमुक्तः
कस्मात् प्राप्नोति सर्गस्थितिलयकरणे तेऽपि शक्ताश्च पूर्णाः।

सर्वज्ञाः सिद्धिमन्तो गुरुवर [१७१]करुणावारिधेऽमुष्य किञ्चित्
सामर्थ्यं विद्यते न क्वचिदपि कथयाहं यथा विश्वसेयम्।। ४१।।

अन्वयः - विमुक्तः पद्मजाताम्बुजनयनललाटेक्षणानाम् ऐश्वर्यं कस्मात् प्राप्नोति? ते सर्गस्थितिलयकरणे अपि शक्ताः पूर्णाश्च। सर्वज्ञाः सिद्धिमन्तश्च। हे करुणावारिधे गुरुवर अमुष्य किञ्चित् सर्वज्ञाः सिद्धिमन्तो गुरुवरकरुणावारिधेऽमुष्य कितित्सामर्थ्यं क्वचिदपि न विद्यते । यथा अहं विश्वसेयं तथा कथय।

व्याख्या - शिष्यः पृच्छति। ज्ञानी ब्रह्मविष्णुमहेश्वराणाम् ऐश्वर्यं कथं प्राप्नुयात्? ते हि जगतां सृष्टौ स्थितौ संहारे च शक्ताः अणिमादिसिद्धिमन्तः सर्वज्ञाश्च। अमुष्य ज्ञानिनः एतासु सिद्धिषु एकस्यामपि सामर्थ्यं न विद्यते। कथमहं ज्ञानी ईश्वरश्च तुल्यौ इति विश्वसिमि इति। (४१)

४२.

सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिभेदे सत्यपि बोधस्वरूपत्वेन ऐक्यमेव ईश्वरज्ञानिनोरित्याह।

ग्रामायान्धूदकमलमलं चन्द्रिकावर्तिका सा[१७२]
दीपज्योतिः कलशसलिलं गेहमात्रोपयोगि[१७३]।
जीवेशानावपि शुभमते बोधमात्रावभिन्ना-
वुच्चैर्नीचैरिति हि विदितं मायिकैरेव दोषैः।। ४२।।

अन्वयः - कलशसलिलं दीपज्योतिः (च) गेहमात्रोपयोगि। अन्धूदकं ग्रामाय अलम्। सा चन्द्रिकावर्त्तिका च (ग्रामाय) अलं हि। हे शुभमते जीवेशानावपि बोधमात्रौ अभिन्नौ। उच्चैः नीचैः इति मायिकैः दोषैरेव विदितम्।

व्याख्या - एकमेव प्रकाशकं ज्योतिः, गेहे दीपज्योतिष्ट्वेन, ग्रामे चन्द्रिकावर्तिकात्वेन उपयोगि भवति। प्रकाशकत्वम् उभयोः समानम्। एवमेव गेहे कलशसलिलमलम्। ग्रामाय अन्धूदकं, कूपजलम् अलम्। जलाधारत्वेन कूपकलशयोः ऐक्यमेव। एवं, बोधस्वरूपत्वेन जीवेश्वरयोः ऐक्यमेव। उच्चैः नीचैः इति व्यवहारः मायाकृतः। ईश्वरः मायायां प्रतिबिम्बितं चैतन्यम्। ज्ञानी त्वेवं न। ईश्वरः सृष्ट्यादिकर्ता। ज्ञानी तु अकर्तृकः। (४२)

---

171. ***Vera*** wrongly reads as करुणां वारिधे.

172. ***Vera*** reads as च.

173. ***Vera*** wronly reads गेहमात्रोपयोगी.

४३.

यथा मर्त्येषु नृपः योगी इत्यादिभेदाः दृश्यन्ते तथा विष्ण्वादिषु अपि शक्तिकृतभेदो दृश्यते। एताः सिद्धयः सर्वाः मायिकाः। सिद्ध्यभावेऽपि ज्ञानी ईश्वराभिन्नः बोधस्वरूपत्वादिति दर्शयति।

मर्त्येष्वेतेषु योगी नृप इव च सुरेष्वेव विष्ण्वादिकास्ते
स्वाधीनीभूतमाया अधिगततपसः सर्वसिद्धीः प्रपन्नाः।
तत्सिद्धीनामभावादिह जगति नराः क्षुल्लका अप्यतीव
ब्रह्मज्ञानानुभावादयमिति त इति ह्यत्र भेदं न पश्येः।। ४३।।

अन्वयः - एतेषु मर्त्येषु योगी नृपः इव च सुरेषु ते विष्ण्वादिकाः एव स्वाधीनीभूतमायाः अधिगततपसः सर्वसिद्धीः प्रपन्नाः। तत्सिद्धीनामभावाद् इह जगति नराः ततः अतीव क्षुल्लकाः अपि ब्रह्मज्ञानानुभावाद् अयमिति ते इति अत्र भेदं न हि पश्येः।

व्याख्या - मर्त्येषु सर्वे न तुल्याः। केचन योगिनः। अपरे केचन नृपाः। केषुचन नृपत्वं वा योगित्वं वा अन्यो वा धर्मविशेषः न दृश्यते। एवं सुरेष्वपि विष्ण्वादयः केचन एव जितमायाः सिद्धिमन्तः तपस्विनश्च दृश्यन्ते। तदपेक्षया सिद्ध्यादिना तपसा शक्त्या वा लौकिकाः नराः निकृष्टाः स्युः। किन्तु ये ज्ञानिनो नराः, यैश्च केवलबोधस्वरूपोऽहम् इति सम्यगवबोधो जातः तेषां विष्ण्वादीनाञ्च, भेदो नास्ति ब्रह्मज्ञानानुभवेन अभेदकेन। अयं क्षुल्लको नरः, ते हि सिद्धिमन्तः जगदवनादिषु अधिकृताः, इति तेषु मिथो भेदो न द्रष्टव्यः इति। (४३)

४४.

ईश्वरीयाः अणिमादयः योगसिद्धयः कथं ज्ञानिनोऽपि भवन्तीति प्रश्नं समाधत्ते।

मुक्तिप्रदान मुनिनायकमानवेषु
ताः सिद्धयः प्रतिवसन्ति शिवस्य चैनाः।
आख्यासि[१७४] चेदिति वदामि परेशभक्त्या[१७५]
ताः प्राप्नुवन्त्यपि नरा इह योगसिद्धीः[१७६]।। ४४।।

अन्वयः - हे मुक्तिप्रदान ताः सिद्धयः मुनिनायकमानवेषु प्रतिवसन्ति। एनाः

---

174. ***RSV 1***, ***RSV 2***, and ***GN*** read as आख्याहि. ***Vera*** reads as आख्यासि.
175. ***RSV 1***, ***RSV 2***, and ***GN*** read as परेशशक्त्या. ***Vera*** reads as परेशभक्त्या.
176. ***RSV 1***, and ***RSV 2*** read as योगसिद्ध्या. ***GN*** and ***Vera*** reads as योगसिद्धीः.

शिवस्य आख्यासि। (कथम्) इति चेद्वदामि। इह नराः परेशभक्त्या योगसिद्धीः प्राप्नुवन्ति च ।

व्याख्या - हे ज्ञानस्वरूप मोक्षदायक गुरो! ताः सिद्धयः ईश्वरस्य भवन्ति। कथं मुनयः योगिनश्च मानवाः सन्तोऽपि ताः प्राप्नुवन्ति इति प्रश्नः। तपसा योगबलेन ईश्वरस्य अणिमादिसिद्धीः नराः प्राप्नुवन्तीति समाधानम्। (४४)

४५.

तपसा सिद्धीः लभन्ते चेत् समेषां ज्ञानिनां सिद्धयो भवितव्याः। परं, केषाञ्चन ज्ञानिनां सिद्धयः न दृश्यन्ते। तत् कथम् इति पृच्छति शिष्यः।

शिवाकार स्वामिन् प्रथिततपसः सिद्धिमतुलां
विमुक्तिं यातारो यदि[177] त इव सर्वे न दधति।
किमु ज्ञानं सिद्धिर्भवति किल तेष्वेव नितरा-
ममी चेदात्मज्ञाः कथमिह विभूतिर्न भविता।। ४५।।

अन्वयः - हे शिवाकार स्वामिन् ! प्रथिततपसः अतुलां सिद्धिं विमुक्तिं (च) यदि यातारः ते सर्वे किमु न दधति? तेष्वेव ज्ञानं सिद्धिः च नितरां भवति चेत् अमी आत्मज्ञाः किल। कथम् इह विभूतिः न भविता?

व्याख्या - हे अखण्डानन्दस्वरूप गुरो! तपसा विश्रुताः पूर्वे ऋषयः तपस्सिद्ध्या एव मुक्तिं योगसिद्धीश्च प्राप्नुवन्। एवञ्चेत् सर्वे तपस्विनः कस्मात् योगसिद्धीः न धारयन्ति? किञ्च ज्ञानिनोऽपि तपस्विनः । कस्मात्सर्वेषु ज्ञानिषु विभूतयः न दृश्यन्ते इति शिष्यः पृच्छति। (४५)

४६.

तपो द्विविधम्। एकं तावत्सिद्धिकरम्। अपरञ्च मुक्तिप्रदमिति समाधत्ते।

अकाम्यं काम्यञ्च द्वयमिति परेशाङ्घ्रिभजनं
विमुक्तिः पूर्वस्माद् भवति परतः सिद्धय इमाः।
फलञ्चैकैकस्मादपि भवति चैकैकमपि तद्
द्वयं कृत्वा प्राञ्चः फलयुगळमायान्त्यपि तथा ।। ४६।।

अन्वयः - परेशाङ्घ्रिभजनं अकाम्यं काम्यञ्च इति द्वयम्। पूर्वस्माद् विमुक्तिः भवति । परतः इमाः सिद्धयः। एकैकस्माद् अपि च एकैकं फलमपि भवति। प्राञ्चः तद् द्वयं कृत्वा फलयुगळमपि तथा आयान्ति।

177. ***Vera*** reads as यदित इव.

व्याख्या - ईश्वरभजनं द्विविधं भवति। अकाम्यं काम्यञ्चेति। तयोश्च यथाक्रमं मुक्तिः (अथवा ज्ञानं) सिद्धयश्च फलं भवति। पूर्वे केचन ऋषयः द्विविधामपि भक्तिं कृत्वा उभयमपि अविन्दन्। ये अकाम्यभक्तिमेव कुर्वन्ति तेषु सिद्धयो न दृश्यन्ते। (४६)

४७.

तदेव विशदयति। किञ्च सिद्धयः मोक्षाय नोपयुज्यन्ते इत्यभिदधाति च।

ज्ञानं केवलमेव मोक्षविधये [१७८]वत्सानघ श्रूयतां
सीतातातभगीरथप्रभृतयः संप्रार्थयन्ते न तु।
सिद्धीः काश्चन केचन द्वयमपि प्राप्योच्छ्रिता भूतले
कालक्षेपकृते हि[१७९] सिद्धय इमा नैव प्रबोधप्रदाः।। ४७।।

अन्वयः - हे वत्स अनघ श्रूयताम्। मोक्षविधये केवलं ज्ञानमेव। सीतातातभगीरथप्रभृतयः तु काश्चन (अपि) सिद्धीः न प्रार्थयन्ते। भूतले केचन द्वयमपि प्राप्य उच्छ्रिताः । इमाः सिद्धयः कालक्षेपकृते हि (भवन्ति)। नैव बोधप्रदाः।

व्याख्या - सिद्धयः शुद्धबोधस्वरूपस्थितये मोक्षाय प्रतिबन्धिकाः। जनकभगीरथप्रभृतयः पूर्वे ज्ञानिनः सिद्धीः नैच्छन्। केचन अपरे महान्तः ज्ञानेन सिद्धिभिश्च उन्नताः, विश्रुता आसन्। किन्तु सिद्धयः मोक्षे विघ्नकारिण्यः। केवलं कालक्षेपाय कल्पन्ते। ताः अखण्डबोधस्वरूपाय मोक्षाय नोपकुर्वन्ति। (४७)

४८.

सिद्धयः केवलं प्रारब्धजातमेवेति स्फुटयति।

कैवल्यं ज्ञानयोगाद्यदि भवति गुरो मोहमात्रप्रदात्रीः
कस्मात्सिद्धीर्जगति कतिचित् प्रार्थयन्ते विमुक्ताः।
कर्मारब्धं भजति विलयं भोगमात्रावसानं
यस्मात्तस्मादखिलविभवान् विद्धि चारब्धजातान्।। ४८।।

अन्वयः - गुरो! ज्ञानयोगाद् यदि कैवल्यं भवति, कस्मात् जगति कतिचित् मोहमात्रप्रदात्रीः सिद्धीः प्रार्थयन्ते? यस्माद् आरब्धं कर्म भोगमात्रावसानं विलयं

178. *Vera* reads as तत्साऽनघ.

179. *Vera* reads as च.

भजति तस्माद् अखिलविभवान् आरब्धजातान् विद्धि च।

व्याख्या - यदि ज्ञानादेव केवलात् कैवल्याख्यो मोक्षो भवति तर्हि मोहकरीः सिद्धीः कस्मात् केचन, ज्ञानिनः सन्तोऽपि सम्प्रार्थयन्ते? इति शिष्यः पृच्छति। गुरुः वदति – प्रारब्धं कर्म भोगेनैव क्षयमेति। सर्वा अपि सिद्धयः प्रारब्धजाता इत्यवेहीति। प्रारब्धायैव इत्यपि विवक्षितं भाति। (४८)

४९.

भोगेनैव कर्मनाशः इति चेत् ज्ञानाग्निः सर्वं सञ्चितं कर्म नाशयेदिति कथं? स्फुटं भासमानः परस्परविरोधः कथं परिहरणीयः इति प्रष्टुमुपक्रमते शिष्यः।

सहस्रश्रुत्युक्त्या विमलतरयुक्त्या च भगवन्
स्थिरीकर्तुं चित्तं मम गदितवाक्यामृत[१८०] गुरो।
प्रसादः प्राप्तोऽन्तर्भ्रमणमपि दूरे परिगतं
पुनः [१८१]पृच्छे घृष्ट्या न तु विहतिमायाति मुकुरः।। ४९।।

अन्वयः - भगवन् सहस्रश्रुत्युक्त्या विमलतरयुक्त्या च मम चित्तं स्थिरीकर्तुं गदितवाक्यामृत! हे गुरो ! अन्तः प्रसादः प्राप्तः। भ्रमणम् अपि दूरे परिगतम्। (तथापि) पुनरहं पृच्छे। मुकुरः घृष्ट्या विहतिं न त्वायाति।

व्याख्या - श्रुतिवाक्यैः विशदाभिर्युक्तिभिश्च चञ्चलं मम मनः भवता नियन्त्रितम्। स्वभावसिद्धं तस्य चाञ्चल्यमपगतम्। मम अन्तः आनन्दो जातः। मनसो भ्रमः भ्रमणं च दूरे गतम्। तथापि पुनरहं प्रष्टुमिच्छामि। यथा दर्पणः पुनःपुनर्घर्षणेन विमलतरो भवति, न चापि तस्य कापि हानिः, तथा पुनः पुनः प्रश्नेन न कापि हानिः प्रत्युत मनसो दार्ढ्यमेधत एव। तस्मादहं पृच्छामीति। (४९)

५०.

तदेव पृच्छति।

किं वा शास्त्रं वदति कुहनां नाथ कारुण्यसिन्धो
नाभुक्तं कर्म नश्येदिति वचनमिदं ज्ञानवह्न्येकनाश्यम्[१८२]।
सर्वं कर्मेत्यपरमपि मे संशयो वाक्ययुग्मे
क्षीणः कस्माद् भवति हि गुरो सम्यगाख्याहि भूयः।। ५०।।

180. ***Vera*** wrongly reads as गदति वाक्यामृत गुरो.

181. ***Vera*** wrongly reads as पृच्छेः.

182. ***Vera*** wrongly reads as ज्ञानवह्नेकनाश्यम्.

अन्वयः - हे कारुण्यसिन्धो शास्त्रं किं कुहनां वदति वा? न अभुक्तं कर्म नश्येदिति इदं (एकं) वचनम्। सर्वं कर्म ज्ञानवह्न्येकनाश्यम् इत्यपरमपि। वाक्ययुग्मे मम संशयः। कस्माद् हि (कर्मभरः) क्षीणः भवति इति हे नाथ सम्यगाख्याहि।

व्याख्या - अहैतुकदयासिन्धो श्रीगुरुनाथ ममायं संशयः। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।[१८३] इत्येकं शास्त्रवाक्यम्। अपरञ्च 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते'[१८४] इति। किं शास्त्रं मृषा वदेत्।? कथं वा कर्मनाशः भवेत्? इति पुनः सम्यगाख्याहीति प्रश्नः। (५०)

५१.

शास्त्रं तावदुभयमपि – प्रवृत्तिं निवृत्तिञ्च - उपदिशति; यथाधिकारं स्वीकरणीयम् इत्युपदिशति गुरुः।

एते जीवा असङ्ख्या अपि चरितममीषामसङ्ख्यं समीक्ष्य
श्रुत्या तत्तज्जनानां हृदयपरिणतिं स्वाधिकारं तथोक्तम्[१८५]।
पुष्पोत्पत्तेस्तु पश्चादपि फलजनिवत् पूर्वसिद्धान्त एवं
काण्डत्रय्या प्रवृत्तिस्तदनु च कथिता सा निवृत्तिः क्रमेण।। ५१।।

अन्वयः - एते जीवाः असङ्ख्याः। अमीषां चरितमपि असङ्ख्यम्। तत्तज्जनानां हृदयपरिणतिं स्वाधिकारं च समीक्ष्य श्रुत्या तथा उक्तम्। पुष्पोत्पत्तेः पश्चात् फलजनिवत्। काण्डत्रय्या पूर्वसिद्धान्तः प्रवृत्तिः तदनु क्रमेण सा निवृत्तिः इति कथिता।

व्याख्या - जीवात्मानः अनेके। तेषां कर्मगतिश्च विचित्रा। तत्तज्जनस्य कर्मगतिं परिणामं तत्तदधिकारञ्च समीक्ष्य श्रुत्या तथोक्तम्। अर्थात् उभयमप्युक्तम्। कर्मकाण्डः, उपासनाकाण्डः, ज्ञानकाण्डः इति काण्डत्रय्या पूर्वं प्रवृत्तिः तदनु च निवृत्तिरपि श्रुत्या कथिता। यथा पुष्पप्रादुर्भावं तद्विकासञ्च अनु फलजनिः भवति तथा श्रुत्या प्रथमं प्रवृत्तिधर्मं पूर्वसिद्धान्तत्वेन प्रतिपाद्य तदनु निवृत्तिधर्मः च कथितः। (५१)

---

183. This verse is seen in *Purāṇa*-s and *Smṛti*-s . cf. *Brahmavaivarttapurāṇa*, Prakṛtikhaṇḍa, Ch. 37, verse 17; *Nāradapurāṇa* 31-69b, 70b.

184. *Bhagavadgītā* 4.37

185. ***Vera*** reads as तथोक्तः.

५२.

कर्मकाण्डेन उपासनाकाण्डेन च उच्यमानं पूर्वपक्षत्वेन तुच्छमेव। असक्तस्य त्यक्तदेहाभिमानस्य कर्म, कर्तृत्वं वा नास्ति; सञ्चितकर्मापि क्षणेन विलयं यायादिति, बोधमार्ग एव श्रेयानिति च यत् सिद्धान्तत्वेन उक्तं तदेव श्रद्धेयमिति कथयति।

पापिष्ठानामवश्यं यदि नरकगतिर्भाविनी चेज्जनानां
प्रायश्चित्तैरनेकैर्बहुविधनियमैस्तन्निवृत्तिर्मृषा किम्?
कर्माण्यत्यन्तहीनान्यपि जननशतैः सञ्चितानि क्षणेन
ज्ञानाग्निर्भस्म कुर्यादिति मुदितमना यो विमुक्तिं प्रयायात्।। ५२।।

अन्वयः - पापिष्ठानां जनानां नरकगतिः यदि अवश्यं भाविनी चेत् अनेकैः प्रायश्चित्तैः बहुविधनियमैः तन्निवृत्तिः (भवेदिति एतत्) किम् मृषा? जननशतैः सञ्चितानि अत्यन्तहीनान्यपि कर्माणि ज्ञानाग्निः क्षणेन भस्म कुर्यादिति यः मुदितमनाः (भवति सः) विमुक्तिं प्रयायात्।

व्याख्या - श्रुतौ कर्मकाण्डेन एतदुक्तम् – ये घोराणि पापानि कुर्वते तेषाम् अवश्यं नरकवासो भवेदिति। उपासनाकाण्डेन उच्यते – प्रायश्चित्तैः, नियमैः, व्रतैः, उपासनादिभिश्च नरकनिवृत्तिर्भवेदिति। किमेतत् मृषा ? उत सत्यं वा? इत्येवं शिष्यस्य संशयः। तत्रोच्यते – एतत्सर्वं पूर्वपक्षत्वेन न्यक्करणीयम्। सिद्धान्तस्तु केवलेन ज्ञानेनैव विमुक्तिर्भवेदिति। तदुच्यते, यः ज्ञानी जन्मशतैः सञ्चितानि घोरपापकर्माणि सर्वाण्यपि ज्ञानाग्नौ दग्धानीति, नाहम् एतैः कर्मभिः लिप्ये इति, दृढं विश्वस्य मुदितो भवति; न बिभेति कर्मफलेभ्यः; सः निश्चयेन मुक्तो भवेदिति। (५२)

५३.

ज्ञानादेव मुक्तिश्चेत् कस्मात् पण्डिता अपि सुलभं ज्ञानमार्गं त्यक्त्वा घोरे कर्ममार्गे निपतन्तीति पृच्छति शिष्यः।

मत्स्वान्तैकमहालयस्थित गुरो बोधस्त्वयोक्तो महान्
जन्मान्तामयनाशनाय चतुरो ब्रह्मैकताप्रापकः।
इत्थं सत्यपि पण्डिताश्च निपुणा नादृत्य कस्मादिमं
कर्मान्धौ निपतन्ति भूरितिमिरे तत्कारणं ब्रूहि[१८६] मे।। ५३।।

186. *Vera* reads as शंस.

अन्वयः - मत्स्वान्तैकमहालयस्थित हे गुरो! त्वया उक्तो महान् बोधः जन्मान्तामयनाशनाय चतुरः ब्रह्मैकताप्रापकः च (भवति)। इत्थं सत्यपि इमं नादृत्य निपुणाः पण्डिताः (अपि) च भूरितिमिरे कर्मान्धौ कस्मात् निपतन्ति ? मे तत्कारणं ब्रूहि।

व्याख्या - मन्मनोमन्दिरे राजमान हे गुरो इति सादरं सम्बुध्य शिष्यः पृच्छति। त्वया उक्तो बोधमार्गः निश्चयेन जनिमृतिसंसृतिरोगशमनाय समर्थः। ब्रह्मैक्यबोधाय सुलभो मार्गः। एवं स्थितेऽपि निपुणाः पण्डिता अपि कर्माख्ये गहने गाढतमोगह्वरे कूपे कस्मान्निपतन्ति इति। (५३)

५४.

नियमितकरणाः ज्ञानिनः एव पण्डितपदवाच्याः । ते कर्मकूपे न पतन्ति। ते हि अक्षय्ये तस्मिन् पदे राराज्यन्ते इत्याह -

अक्षय्यं तत्पदं ये [१८७]नियमितकरणास्ते प्रपश्यन्ति नूनं
यद्वत्सञ्चारभाजां सति नयनयुगे नेक्षतां कूपपातः।
तद्वद्विक्षिप्तचित्ता अभिलषितमहाकामजालाः पतन्ते[१८८]
संसाराख्याम्बुराशौ परमपदलयं[१८९] नो लभन्ते कदाऽपि।। ५४।।

अन्वयः - ये नियमितकरणाः ते नूनम् अक्षय्यं तत्पदं प्रपश्यन्ति। यद्वत् नयनयुगे सत्यपि सञ्चारभाजां नेक्षतां कूपपातः तद्वत्. विक्षिप्तचित्ताः अभिलषितमहाकामजालाः संसाराख्याम्बुराशौ पतन्ते । कदाऽपि परमपदलयं न उ लभन्ते।

व्याख्या - ये पण्डिताः स्वानि करणानि नियम्य सदा अन्तःस्थे जाग्रति बोधे विलीनाः ते तद् अखण्डानन्दरूपं पदं नूनं पश्यन्त्येव। यद्वत् नयनयुगं निमील्य (सत्यपि दर्शनशक्तौ) पथि चरन्तः जनाः मनसा अन्यत्र अटन्तः मार्गे निम्नोन्नतादि न पश्यन्तः कूपादौ निपतन्ति तथा तथा विषयेषु विक्षिप्तचित्ताः तांस्तान् कामानभिलषन्तः, तदर्थं कर्म कुर्वन्तः जनिमृतिसागरे निपतन्ति। कदापि अखण्डानन्दपदं तत् न आप्नुवन्ति। नो लभन्ते इत्यत्र उकारः अवधारणार्थो बोध्यः। नैव लभन्ते इत्यर्थः। (५४)

---

187. ***RSV 1*** and ***RSV 2*** read as नियमितकरणास्ते. ***GN*** and ***Vera*** reads as नियमितमनसस्ते.
188. The reading is grammatically wrong. पतन्ति would have been better. Elongation in the recitation would avoid metrical incongruiy
189. ***Vera*** reads as परमशिवपदं.

५५.

जीवानां कर्मजाले भ्रमणम् ईश्वरेण कार्यते। ते अनीशाः किं कुर्युः? ईश्वर एव अपराध्यति इत्याशङ्कां प्रकटयति शिष्यः। गुरुराह - ईश्वरो नापराध्यति। जीवा एव स्वान् कर्मलोकान् सृजन्तीति।

कृत्यं साधु तथेतरच्च पशवः पत्यैव यत्कुर्वते
नुन्नाः सद्गुरुनाथ जातपशवः किं वापराद्धा इति।
आख्यास्ये शृणु सौम्य नैगमशिरस्तात्पर्यमार्गाविदः
सञ्जल्पन्त्यतिमूढचेतस इति भ्रान्तं विबुध्यस्व तत्।। ५५।।

अन्वयः - पशवः, साधु कृत्यं तथा इतरच्च, पत्या एव नुन्नाः कुर्वते। तत्र हे सद्गुरुनाथ जातपशवः किं वा अपराद्धाः इति ? आख्यास्ये। शृणु। नैगमशिरस्तात्पर्यमार्गाविदः अतिमूढचेतसः इति (एवं) भ्रान्तं सञ्जल्पन्ति। तद् विबुध्यस्व।

व्याख्या - अस्वतन्त्रा जीवाः ईश्वरेण प्रेरिता एव सद्, असद् वा, कर्म कुर्वन्ति। ते हि अवशाः ईश्वरेणैव सृष्टाश्च। तत्र तेषाम् अपराधो नास्ति किल इति शिष्यः पृच्छति। गुरुराह – ये श्रुतिशिरसाम्, उपनिषदां, तात्पर्यं न जानन्ति ते मूढाः एवं जल्पन्ति। वस्तुस्थितिः अन्या इति। (५५)

५६.

ईश्वरस्य सृष्टिरन्या; जीवस्य चान्या इति तयोर्भेदमाह।

उत्कृष्टस्य परस्य सृष्टिरनघा जीवस्य सृष्टिः परा
सामान्या[१९०] वियदादिसर्वजगतां विस्फूर्तिराद्या मता।
अन्याऽहङ्कृतिकामलोभविषयप्राग्भारसन्दूषिता
सृष्टिर्जीवकृतैव नेश्वरकृतेत्येवं भवान् तुष्यताम्।। ५६।।

अन्वयः - उत्कृष्टस्य परस्य सृष्टिरनघा जीवस्य सृष्टिः परा। आद्या वियदादिसर्वजगतां विस्फूर्तिः सामान्या मता। अन्या सृष्टिः अहङ्कृतिकामलोभविषयप्राग्भारसन्दूषिता। (इयं) सृष्टिः जीवकृता एव। न ईश्वरकृता (इति) भवान् तुष्यताम्।

---

190. ***Vera*** reads as सामान्याऽपि यदादिसर्वजगतां.

व्याख्या - ईश्वरस्य सृष्टिः निर्मला। जीवस्य सृष्टिः तु न तथा। ईश्वरसृष्टिः सामान्या। आकाशादयो महाभूताः तद्विकाराः सर्वेषां जगतां सामान्यभूताः सर्वेपि पदार्थाः ईश्वरेण सृज्यन्ते। जीवसृष्टिस्तु न निर्म्मला, दुष्टैव सा। अहङ्कृतिः, कामलोभादयो विषयाः, तत्कृता अनेके दोषाः च दूषयन्ति जीवसृष्टिम्। यस्यां सृष्टौ जीवाः परिभ्रमन्ति सा जीवसृष्टैव। न ईश्वरकृता। तेन ईश्वरेण प्रेरिता जीवाः कर्म्म कुर्वन्तीत्येतत् न वस्तुस्थितिमनुरुणद्धि। (५६)

५७.

जीवसृष्टेर्विमुक्तिरेव मुक्तिरित्यभिदधाति। ईश्वरसृष्टिर्मोक्षकारणम्, बन्धकारणं तु जीवसृष्टिरेव इति दर्शयति च।

नेतुर्ब्रह्मादिमूर्तेः सकलतनुभृतां सृष्टयो मुक्तिदात्र्यः
जीवानां सृष्टयस्ता जनिमृतिकलनादुःखरूपा भवन्ति।
नष्टेऽस्मिन् स्थावरादावपि जगति न कोऽप्याप्नुयादेव मुक्तिं
नष्टे कामादिदोषे कृतबहुलभयं जन्मदुःखं विनश्येत्।। ५७।।

अन्वयः - ब्रह्मादिमूर्तेः नेतुः सृष्टयः सकलतनुभृतां मुक्तिदात्र्यः। ताः जीवानां सृष्टयः जनिमृतिकलनादुःखरूपाः भवन्ति। अस्मिन् स्थावरादौ जगति नष्टे अपि न कोऽपि मुक्तिम् आप्नुयात्। कामादिदोषे नष्टे कृतबहुलभयं जन्मदुःखं विनश्येत् एव।

व्याख्या - नेतुः ईश्वरस्य पशुपतेः ब्रह्मादित्रिमूर्तिरुपस्य सृष्टिः सकलजीवानां मुक्तिदात्री। जीवानां सृष्टयस्तु जनिमृतिसंसृतिं कलयन्ति। तेन च दुःखरुपबन्धदात्र्यः। ईश्वरसृष्टे अस्मिन् स्थावरादिमति लोके लीनेऽपि न कोऽपि जीवः मुक्तिं लभते। किन्तु जीवसृष्टेः कारणभूतस्य कामादेर्नाशे विचित्रविपुलभयकारणं जन्मदुःखं विनश्येत्। जीवः बन्धमुक्तो भवेदिति। (५७)

५८.

ईश्वरो वा तत्सृष्टिर्वा बन्धस्य कारणं न भवतीति द्रढयति।

कल्पान्ते परमेश्वरस्य कलने नष्टेऽपि के वा गताः
मुक्तिं सत्यपि देशकालकलने जीवस्य मोहे गते।
वैराग्येण न केऽपि[191] सञ्चितलयात् प्राप्ता विमुक्तिं परां
पाशो मोहमयः पशोर्विरचितो नासौ भवेत्तत्पतेः[192]।। ५८।।

191. ***RSV 1***, ***RSV 2***, and ***GN*** read as लयेऽपि. ***Vera*** reads as नयेऽपि. However न केऽपि seems apt and the reading is corroborated by *Prabhā* commentary and the original Tamil text.

192. ***RSV 1***, ***RSV 2***, and ***GN*** read as भवेत्तत्पदे. ***Vera*** reads as भवेत्तत्पतेः which seems apt in the context.

अन्वयः - कल्पान्ते परमेश्वरस्य कलने नष्टे अपि के वा मुक्तिं गताः? देशकालकलने सत्यपि वैराग्येण जीवस्य मोहे गते सञ्चितलयात् केऽपि परांवैराग्येण लयेऽपि सातिलयात् प्राप्ता विमुक्तिं परां विमुक्तिं न प्राप्ताः? मोहमयः असौ विरचितः पाशः पशोः। तत्पतेः न।

व्याख्या - कल्पावसाने प्राकृतप्रळयसमये ईश्वरस्य सृष्टौ उपसंहृते के वा मुक्ताः भवन्ति? न कोऽपि मुक्तिं प्राप्नोति। प्रत्युत देशकालादौ सत्यपि इहैव केऽपि, केचन, वैराग्येण जीवस्य मोहे गते, जीवकृते मोहे नष्टे सञ्चितकर्मणः सद्योदाहात् परां विमुक्तिं न गताः किम्? गता एव। एतेन अन्वयव्यतिरेकाभ्यां ज्ञायते यत् मोहमयः पाशः पशुना, जीवेनैव विरचितः। न पुनः पशुपतेः, ईश्वरस्य इयं रचना इति। (५८)

५९.

बन्धस्य मोक्षस्य च कारणं जीव एव। आत्मनि आरोपितं कर्तृत्वं भोक्तृत्वं च बन्धकारणमित्यत्र श्रुतिं प्रमाणयति।

अश्वत्थे कृतनीडकौ च विहगौ द्वावेतयोरेकको
भुङ्क्ते तत्फलमाकलय्य [193]रुचिरं नान्योत्त्यसौ तत्सखा।
पश्यंस्तिष्ठति भोगभेदत[194] इमौ जीवेश्वरौ वैदिकी
वाणी वक्ति विभज्य मायिकगुणैर्विद्धि त्वमेतादृशौ।। ५९।।

अन्वयः - अश्वत्थे कृतनीडकौ द्वौ विहगौ। एतयोरेककः तत्फलं रुचिरमाकलय्य भुङ्क्ते च। अन्यः असौ तत्सखा नात्ति। पश्यंस्तिष्ठति। एतादृशौ इमौ जीवेश्वरौ भोगभेदतः मायिकगुणैः विभज्य विद्धि इति वैदिकी वाणी वक्ति।

व्याख्या - "द्वा सुपर्णा सयुजा सखाया" इतीदं प्रसिद्धम् उपनिषद्वाक्यम् उदाह्रियते। श्वः तिष्ठति वा न वेति सन्देहो यत्र सः अश्वत्थः। संसारवृक्षः। स च चलदळः। कामकर्मरूपवातेरितत्वात्। तस्मिन् द्वौ समानौ विहगौ तिष्ठतः। एकः तस्य वृक्षस्य फलं स्वादु इत्याकलय्य भुञ्जानस्तिष्ठति। अन्यः नात्ति। फलं न खादति। अनश्नन् सुखं पश्यन् तिष्ठति। एतादृशौ एव जीवेश्वरौ। आद्यः, जीवः भोक्ता। द्वितीयः, ईश्वरः अभोक्ता। मायिकगुणाः इमौ मिथो भिन्दन्ति इति विभज्य जानीहि इत्याह श्रुतिः इति। (५९)

193. ***Vera*** reads wrongly as रुचिमंनान्योत्त्यसौ.

194. ***Vera*** reads as भागभेदतः.

६०.

ये एतत्सर्वं पशुपतिकृतमिति मन्यन्ते ते बद्धा एव भवेयुः। ये च पशुकृतमिति विजानन्ति, ते मुक्ता भवन्ति; परमपदम् उपयान्तीत्याह।

अमत्वैतज्जीवप्रकलितमिदं[१९५] सर्वचरितं
विजानन्तः शंभोरिदमिति विमूढाश्च पतिताः।
पशूनां तद्वृत्तं[१९६] पशुविहितमेवेति मुदिताः
विभोर्नेति ज्ञानात्परमपदमायान्ति मुनयः।। ६०।।

अन्वयः - इदं सर्वचरितं जीवप्रकलितम् (इति) एतद् अमत्वा इदं शम्भोरिति विजानन्तः विमूढाः पतिताः च (भवन्ति)। पशूनां तद्वृत्तं पशुविहितमेव; विभोर्न इति ज्ञानात् मुदिता मुनयः परमपदम् आयान्ति।

व्याख्या - कामादिषड्वर्गकृतमिदं सर्वं जीवसृष्टमेव इत्येतद् अजानन्तः पशुपतेः ईश्वरस्य इयं सृष्टिरिति दृढं मन्वानाः मूढाः पतिता भवेयुः। पशोरिदं वृत्तं, जीवसृष्टमिदं, पशुविहितमेव। जीवेन स्वात्मनि कर्तृत्वं भोक्तृत्वञ्च आरोप्य स्वयंसृष्टमिति सम्यग् ये जानन्ति ते मुनयः तद्ज्ञानादेव बन्धमुक्ताः परमपदे मोदन्ते इति। (६०)

६१.

ईश्वरस्य सृष्टिः समाना चेत् कस्मात् सः कांश्चन अनुगृह्णाति, अन्यांश्च क्लेशयति इति शिष्यस्य सन्देहं निरस्यति।

साधो श्रीगुरुनाथ सर्वतनुभृत्सामान्यमेवेति चेद्
ईशः कांश्चन दुर्जनान्[१९७] कतिचन श्लाघ्यांश्च निर्माति किम्।
इत्थं पृच्छसि चेत्पितेव कृपया दुष्टांश्च शिष्टान् विभु-
[१९८]स्तानीशोऽवति दण्डनामपि विदुस्तस्य प्रसादं बुधाः।। ६१।।

अन्वयः - श्रीगुरुनाथ साधो सर्वतनुभृत्सामान्यमेवेति चेत् ईशः विभुः कांश्चन दुर्जनान्, कतिचन श्लाघ्यांश्च किम् निर्माति ? इत्थं पृच्छसि चेत् ईशः दुष्टान्

195. ***RSV 1***, ***RSV 2*** , and ***GN*** read as अमत्यैतज्जीवप्रकलितमिदं. We have followed the reading of ***Vera*** as अमत्वैतज्जीवप्रकलितमिदं.

196. ***Vera*** reads as तद्वृत्तं.

197. ***Vera*** reads as दुर्विधान्.

198. ***GN*** and 4 read as हन्तीशोऽवति.

शिष्टांश्च अपि तान् कृपया पितेव अवति। बुधाः तस्य दण्डनां प्रसादं विदुः।

व्याख्या - ईश्वरस्य सृष्टिः सामान्या सर्वभूतसामान्या इति पूर्वमुक्तम् (उत्कृष्टस्य परस्य इत्यादिपद्यं पश्यत)। एवञ्चेत् कथं प्रभुरपि सः कांश्चन दुष्टान्, कांश्चनान्यान् शिष्टांश्च सृजति इति यदि पृच्छसि अहं समाधास्ये इति वदति गुरुः। वस्तुतः ईश्वरः शिष्टान् वात्सल्याधिक्येन न अधिकमनुहृणाति। न वा दुष्टान् दण्डयति। यथा पिता दुष्टान् शिष्टांश्च सुतान् एकधैव रक्षति तथैव ईश्वरोऽपि। दुष्टान् दण्डनव्याजेन शिक्षयन् तेषु प्रसादमेव ईश्वरः प्रदर्शयति; न द्वेषं, न वा क्रोधम्, इति अभिज्ञाः मन्यन्ते। (६१)

६२.

क्लेशादिकं जीवकृतमेव न त्वीश्वरकृतमिति दर्शयति।

बन्धोत्तीर्ण महामते सुरतरुर्वह्निश्च भागीरथी
स्वाभ्याशं भजतां तु दैन्यमिहिकासन्तापदुःखं यथा।
आधूयावति तद्वदेव भगवान् पायान्निजान्नापरान्
तद्दोषा निखिलाः पशोरिति मुदा नित्यं भवान् वर्तताम्।।६२।।

अन्वयः - हे बन्धोत्तीर्ण महामते यथा सुरतरुः वह्निः भागीरथी च स्वाभ्याशं भजतां तु दैन्यमिहिकासन्तापदुःखम् आधूय अवति तद्वदेव भगवान् निजान् पायात्। अपरान् न। निखिलाः तद्दोषाः पशोः इति भवान् नित्यं मुदा वर्तताम्।

व्याख्या - हे मुक्तात्मन् विमलमते त्वम् एतद् ज्ञात्वा सुखमास्व। यथा कल्पवृक्षः अग्निः गङ्गा च आत्मानं प्रपन्नान्, यथाक्रमं दारिद्र्यात्, हिमशैत्यात्, संसारतापाच्च तत्तद्दुःखमपनीय रक्षति, नान्यान् तथा ईश्वरोऽपि प्रपन्नानेव रक्षति। ये न प्रपन्नाः तद्दोषाः सर्वे , तैरनुभूयमानं क्लेशजातं सर्वमपि जीवकृतमेव। न त्वीश्वरकृतमिति ज्ञात्वा मुदितस्त्वं सुखितमास्व इति गुरुराह। (६२)

६३.

शास्त्रोक्तेन ज्ञानेनैव मोक्ष इत्याह।

एकामुक्तिं[199] शृणु त्वं प्रथम इह पुमान् सर्वजीवोदयार्थम्[200]
यं चक्रे शास्त्रमार्गं तदनुसरणतः सर्वमीशेऽर्पयित्वा।

199. ***Vera*** reads as एका मुक्तिः.
200. ***RSV 1*** and ***RSV 2*** have the wrong reading सर्वजीवोदायर्थम्.

पश्चाच्छुद्धान्तरङ्गा गुरुवरसविधं प्राप्य वैराग्ययुक्ताः
ये ब्रह्मज्ञानभाजो न पुनरिह भवं यान्ति सिद्धान्त एषः।। ६३।।

अन्वयः - त्वम् एकाम् उक्तिं शृणु। प्रथमः पुमान् एकामुक्तिं शृणु त्वं प्रथम इह पुमान् सर्वजीवोदयार्थम्यं शास्त्रमार्गं सर्वजीवोदयार्थम् चक्रे तदनुसरणतः ये जनाः ईशे सर्वम् अर्पयित्वा पश्चाद् वैराग्ययुक्ताः गुरुवरसविधं प्राप्य शुद्धान्तरङ्गाः ब्रह्मज्ञानभाजो (भवन्ति), (ते) पुनरिह भवं न यान्ति एष एव सिद्धान्तः।

व्याख्या - निश्चितमर्थम् अहं ते ब्रवीमि; त्वं शृणु इति शिष्यवत्सलः गुरुः शिष्यमनुगृह्णाति। पुरुषोत्तमेन सर्वेषां जीवानां निःश्रेयसकृते यः शास्त्रमार्ग आदिष्टः तं मार्गमनुरुध्य ये जनाः वैराग्ययुक्ताः सन्तः आचार्यश्रेष्ठमभ्येत्य तदुक्तरीत्या विमलहृदयाः भूत्वा ब्रह्मैवाहम् इति ज्ञानं भजन्ते तेषां पुनर्भवभीतिर्नास्त्येव। ते अपुनर्भवं परमपदं यान्तीति एष एव सिद्धान्तः। (६३)

६४.

इदं ब्राह्मं ज्ञानं कोऽहंविचारलभ्यम् इत्याह।

ब्राह्मं विज्ञानमेतत् कथमिव भविता दीर्घक्लृप्ताद्विचारात्
सोऽयं कस्मादनादौ वपुषि कथमिदं कोऽहमित्यादरेण।
का वा संविज्जडं वा किमिदमिति जगच्चिज्जडग्रन्थयः काः
बन्धो मोक्षः कथं वेत्यनुदिनकलितं चिन्तनं स्याद्विचारः। ६४।।

अन्वयः - एतद् ब्राह्मं विज्ञानं कथमिव भविता ? दीर्घक्लृप्ताद्विचारात्। "कोऽहम्? सोऽयम् अनादौ वपुषि कस्माद् (बद्धः)? कथमिदम्? का वा संवित्? किं वा जडम्? जगच्चिज्जडग्रन्थयः काः? बन्धः कः? मोक्षः कः ?" इति अनुदिनकलितम् आदरेण चिन्तनं विचारः स्यात्।

व्याख्या - ब्रह्मविषयकं इदं निश्चयज्ञानं कथं भवेत्? वैदिकं मार्गं विहाय अन्यः सुलभो मार्गः अस्ति किम्? इति चेत् विचाराद् ध्रुवं ब्राह्मं ज्ञानं भवितेत्याह। सन्ततमविच्छिन्नाया दीर्घकालिकाया विचारधारायाः इदं ज्ञानं भविष्यति। विचारः किंविषयकः, कीदृशश्चेति चेत् उच्यते। कोऽहम्? अहंपदार्थः कः? अयं कस्माद् अनादौ अस्मिन् लिङ्गशरीरे बद्धः? को बोधस्वरूपः? जडं किम्? जगत्, चेतनः, जडः इत्येतेषां बन्धकं किम्? कुत्र ग्रहग्रन्थिः? बन्धश्च कीदृशः? अस्माद् बन्धात् कथं वा मोक्षः स्यात् इति श्रद्धापूर्वकम् अनवरतचिन्तनमेव विचारः इति। (६४)

६५.

जन्मान्तरसुकृतैरेव ज्ञानं भवेत् किल? किं विचारेण इति प्रश्नं समाधत्ते।

प्रयातभवसञ्चितैरपि च पुण्यपुञ्जैर्भवेत्
प्रबोध इति किं फलं निजविचारतश्चेच्छृणु।
गताशुचिरलं भवेच्छुचिरथेशपादार्पितैः
कृतैर्दृढविचारतस्तत उदेति बोधो हृदि[२०१] ।। ६५।।

अन्वयः - अथ प्रयातभवसञ्चितैः पुण्यपुञ्जैः अपि प्रबोधः भवेद् निजविचारतः किं फलम् (इति) चेत् शृणु। ईशपादार्पितैः कृतैः गताशुचिः अलं शुचिर्भवेत् च। ततः दृढविचारतः हृदि बोधः उदेति ।

व्याख्या - "त्वमेवं कदाचित् पृच्छेः। पूर्वजन्मार्जितैः पुण्यैरेव ब्रह्मज्ञानं भवेत् किल? न पुनर्विचारेणेति। तत्र वदामि। निष्कामकर्मभिः, ईश्वरार्पितचेतसा क्रियमाणैः कर्मभिः चित्तशुद्धिर्भवेत्। ततः शुद्धेन दृढेन च मनसा वैराग्येण कोऽहंविचारः करणीयः। दृढेन सातत्यादनपेतेन च कोऽहंविचारेणैव ज्ञानोदयः भवेद्" इति गुरुराह। (६५)

६६.

वैराग्यं, स्वर्गतिः, अणिमादिसिद्धयः , सालोक्यम् इत्यादि सर्वं दातुं कर्म शक्नोति तदेव कर्म कस्मात् ज्ञानमपि न दद्यात्? विचारेण किम्? इति शिष्यः पुनः पृच्छति।

वैराग्यं भक्तिपूर्वं त्रिदशपुरगतिं सत्तपश्चाणिमादिं
ध्यानं योगं सरूपाभिधमपि नितरां मोक्षमाचार्यवर्य[२०२] ।
यत्कर्मैव प्रदत्ते निजमभिलषितं कर्मणा साध्यते किं
बोधः संमोहनाशो न हि भवति फलं किं विचारेण भूमन्।। ६६।।

अन्वयः - हे भूमन् आचार्यवर्य! यत् कर्म भक्तिपूर्वं वैराग्यं, त्रिदशपुरगतिं, सत्तपः, अणिमादिं, ध्यानं, योगं, सरूपाभिधं मोक्षमपि इति निजमभिलषितं (सर्वं) नितरां प्रदत्ते (तेन) कर्मणा संमोहनाशो बोधः च किं न साध्यते? विचारेण किं फलं भवति?

---

201. ***RSV 1***, and ***RSV 2*** read as बोधोदयः. ***GN*** and ***Vera*** reads as बोधो हृदि.
202. ***Vera*** wrongly reads as मोक्षमाचार्यवर्यम्.

व्याख्या - कर्मणा निजम् अभिलषितं सर्वं विन्दते पुमान्। यथा वैराग्यम्, भक्तिः, स्वर्गः, सत्तपः, अणिमादिसिद्धयः, सालोक्यादिसरूपमोक्षम् .इत्यादि सर्वं कर्म ददाति। तदेव कर्म कस्माद् ज्ञानमपि न दद्यात्? विचारेण किं विशिष्टं फलमाप्यते इति सन्देहः। (६६)

६७.

विचारेणैव ज्ञानं लभ्यते, न कर्मणा इति समाधत्ते।

वेषप्रच्छन्नगात्रा जगति कतिपये चेष्टितैः स्वस्वभावैः
शीलैस्तेषां प्रवृत्या सुचिरपरिचयैः शक्यरुपाः प्रबोद्धुम्।
[२०३]सञ्चारैर्धावनैर्वा व्रतपरिचरणैः कर्मभिश्चातितीव्रैः
[२०४]उच्चैस्तम्भाधिरोहैर्भवति न विदितं तच्चरित्रं सुगूढम्।। ६७।।

अन्वयः - जगति वेषप्रच्छन्नगात्राः कतिपये तेषां प्रवृत्त्या, चेष्टितैः, स्वस्वभावैः, शीलैः, सुचिरपरिचयैः (च) प्रबोद्धुं शक्यरूपाः। सुगूढं तच्चरित्रं सञ्चारैः, धावनैः, कर्मभिः, अतितीव्रैः व्रतपरिचरणैः, उच्चैस्तम्भाधिरोहैर्वा न विदितं भवति।

व्याख्या - लोके ये केऽपि प्रच्छन्नवेषाः चरन्ति चेत् के इमे इति ज्ञातुं तत्तज्जनानां स्वभावः, प्रवृत्तिः, शीलम्, इत्यादीनां चिरपरिचितानां चिन्तनेन, तर्केण, विचारेण च शक्यते। गूढं तेषां स्वरुपम्, इतस्ततो धावनैः, अतितीव्रैः प्राजापत्यादिकृच्छ्राचरणैः उच्चैस्तम्भाधिरोहैर्वा ज्ञातुं न शक्यते। एवमेव, कर्मभिः चित्तशुद्धिः भवेत् । न पुनः ब्रह्मज्ञानम् । तत्तु कोऽहंविचारेणैव भवेद् इति। (६७)

६८.

उक्तमेवार्थं पुनर्द्रढयति।

[२०५]इतीवैतद्ब्रह्मप्रकटनपरैर्वेदवचनै-
र्यदुक्तं तद्ज्ञानं [२०६]न भवति विचारेण हि विना।

---

203. ***Vera*** reads as सञ्चारैर्ध्यापनैर्वाऽऽवृत्तपरिचरणैः. The editor has failed to notice that the commentary cleary goes against this reading. The commentary runs as इतरथा सञ्चारैर्गमनादिव्रताद्यनुष्ठानैः मासोपवासादितीव्रनियमसाध्यैः कर्मभिः etc.

204. ***GN*** and ***Vera*** read as उच्चस्तंभाधिरोहैः.

205. ***Vera*** reads as इतीवैतद् ब्रह्म प्रकटनपरै ....

206. ***Vera*** reads as प्रभवति विचारेण न विना.

तपो दानाद्यं वा त्रिषवणजलस्नानमथवा
ह्यधीतो वा वेदो न दिशति परं ज्ञानममलम्।। ६८।।

अन्वयः - इतीव ब्रह्मप्रकटनपरैर्वेदवचनैः यदेतदुक्तं तद् ज्ञानं विचारेण विना न भवति हि। दानाद्यं, तपो वा, त्रिषवणजलस्नानम्, अथवा अधीतो वेदः, अमलं परं ज्ञानं न दिशति।

व्याख्या - यथैतदुक्तं तथैव तत्त्वमस्यादिभिः उपनिषन्महावाक्यैः श्रुत्या यत् लक्षणावृत्त्या बोधयितुं यत्यते तस्य ब्रह्मणो ज्ञानं केवलेन विचारेणैव भवति हि। दानं, यज्ञः इत्यादिरूपं तपः; वेदाध्ययनं, त्रिषवणस्नानादिरूपं व्रतादिकं वा ब्रह्मज्ञानाय न प्रभवतीति। (६८)

६९.

कथं तदिति शिष्यः पृच्छति सयुक्तिकम्।

स्वच्छादर्शगतं मलं करतलीघर्षादृते को भुवि
श्रीमन् देशिकवर्य सूक्ष्मधिषणायोगात् क्षयं नीतवान्।
अप्रक्षाल्य तथैव कर्मनिकरैरज्ञानमाच्छादकं
तत्त्वज्ञानपरामृतेन विलयं कुर्यात्कथं तद्वद।। ६९।।

अन्वयः - श्रीमन् देशिकवर्य! स्वच्छादर्शगतं मलं करतलीघर्षाद् ऋते सूक्ष्मधिषणायोगात् भुवि को वा क्षयं नीतवान्? तथैव आच्छादकम् अज्ञानं, कर्मनिकरैः अप्रक्षाल्य, तत्त्वज्ञानपरामृतेन कथं विलयं कुर्यात्? तद् वद।

व्याख्या - निर्मले दर्पणे किञ्चिन्मालिन्यमापतितं चेत् करतलघर्षणेन वस्त्राञ्चलादिसम्मार्जनेन वा तदपोह्यते। न पुनर्विचारेण तर्केण वा। एवम् अज्ञानम् अन्तः अस्ति चेत् तन्निवर्तकं कर्म करणीयमेव खलु। न हि विचारेण अज्ञानविलयः सम्भवेत्। भवान् तु वदति — तत्त्वज्ञानमेव, कोऽहंविचार एव परममृतं, तेनैव, अज्ञानस्य विलयं कर्तुं शक्यते इति। तत्कथम् इति कृपया विशदयतु इति शिष्यः वदति। (६९)

७०.

दृष्टान्ते दोषं प्रदर्श्य सन्देहं निवर्तयति।

भवति मुकुरबिम्बे यन्मलं वास्तवं तत्
स्फटिकदृषदि तत्तु भ्रान्तिमात्रैकसिद्धम्।

मुकुरगमुपयायात् कर्मणैव प्रहाणिं[२०७]
हृदयमलमथान्यद् भ्रान्तमेवेति[२०८] बोद्धुम्।। ७०।।

अन्वयः - मुकुरबिम्बे यन्मलं तत् वास्तवं भवति । स्फटिकदृषदि (यत् लौहित्यादि) तत् तु भ्रान्तिमात्रैकसिद्धम्। मुकुरगं कर्मणा एव प्रहाणिम् उपयायात्। अथ अन्यत् भ्रान्तमेव इति बोद्धुं हृदयमेव अलम्।

व्याख्या - यत् त्वयोक्तं तत्सत्यम्। दर्पणे यद्वास्तवं मालिन्यमस्ति तदपसारणाय करतलघर्षणादि कर्म आवश्यकम्। किन्तु स्फटिकदृषदि अविद्यमानम्, आरोपितं यत् लैहित्यादि तत्तु भ्रमकल्पितम्। न वास्तवम्। तदपसारणाय कर्म नावश्यकम्। तत्र स्फटिकदृषद् अन्या, तत्पार्श्वस्थं लोहितं जपाकुसुमादि अन्यद् इति ज्ञातुं हृदयं, मानसमेव अलमिति। एवं ब्राह्मं यद् ज्ञानं तत्सिद्धये आरोपनिवृत्तिरेव अलम्। तच्च विचारमात्रसाध्यमिति। (७०)

७१.

शुद्धे ब्रह्मणि कर्तृत्वशोकित्वादिकमध्यस्तम्। तादृशस्य अज्ञानस्य दाहकं ज्ञानमेव; न पुनः कर्मेत्याह —

सत्यानन्दचिदम्बुधावपि तथा शुग्जाड्यमित्यादिकं
मायाकल्पितमेव जातु न भवेत् स्वाभाविकं वास्तवम्।
अज्ञानं प्रदहेन्न कर्म नियतं किन्तु प्रकर्षं नयेत्
विज्ञानं विदधीत कर्म निखिलं स्वोत्पत्तितो भस्मसात्।। ७१।।

अन्वयः - तथा सत्यानन्दचिदम्बुधौ शुक्, जाड्यम् इत्यादिकं मायाकल्पितमेव। न जातु स्वाभाविकं वास्तवं भवेत्। कर्म, नियतम् अज्ञानं न प्रदहेत्। किन्तु प्रकर्षं नयेत्। विज्ञानं तु स्वोत्पत्तितः निखिलं कर्म भस्मसाद् विदधीत।

व्याख्या - यथा स्फटिकदृषदि अवास्तवं लौहित्यम् आरोपितं तथा शुद्धे अखण्डानन्दसमुद्रे ब्रह्मणि शोकः जडता इत्यादि मायया कल्पितमेव। न वास्तवम्। कर्माणि, तादृशम् असत्कलनरूपम् अज्ञानं नैव प्रदहेयुः। प्रत्युत तानि अज्ञानं वर्धयेयुः। अज्ञानस्य दृढतामापादयेयुः। कर्म अज्ञानञ्च ब्रह्मणि आरोपितम्। स एषः आरोप एव अज्ञानम्। ज्ञानं तु स्वोत्पत्तिक्षणे एव तस्य उभयस्यापि दाहकं भवति। तेन कोऽहंविचारेणैव ब्रह्मज्ञानसिद्धिरिति। (७१)

---

207. ***Vera*** reads as प्रहाणि.

208. ***Vera*** reads as भ्रान्तमेषेति.

७२.

तदेव द्रढयति दृष्टान्तान्तरेण।

गर्भागारगतं न वस्तु विषयीकुर्याद् भृशं रोदनैः
विस्मर्ता पुनरेव तत्तु मनुजः स्मृत्या यथा ज्ञास्यति।
आत्मानञ्च तथैव शुद्धमपहत्याज्ञानमावारकं
जानीयात्स्वविचारतो न[२०९] बहुभिः कल्पैः कृतैः कर्मभिः।। ७२।।

अन्वयः - विस्मर्ता गर्भागारगतं वस्तु भृशं रोदनैः न (स्मृतेः) विषयीकुर्यात्। मनुजः तत्तु स्मृत्या एव यथा पुनः ज्ञास्यति तथा आवारकम् अज्ञानम् अपहत्य स्वविचारतः एव आत्मानं च जानीयात्। न (पुनः) बहुभिः कल्पैः कृतैः कर्मभिः।

व्याख्या - कश्चन जनः गृहे अन्तःप्रकोष्ठे किञ्चिद् वस्तु गूढं संस्थाप्य अनन्तरं विस्मृतवान्। नाम, कुत्र स्थापितमिति विस्मृतवान्। किं सः अनेककालं कृतेन भृशरोदनेन तद् द्रष्टुम् अधिगन्तुं वा शक्नोति? नैव। पश्चात्, कुत्र स्थापितं मया इति पुनःपुनर्विचारेण स्मृत्या तद्वस्तु अधिगन्तुं शक्नुयात्। स्मृत्यैव अधिगन्तुं शक्नुयात्। तथैव जिज्ञासुः अपि विचारेणैव अज्ञानमपहत्य आत्मानं ज्ञातुं शक्नोति। न पुनः अनेककल्पकृतैः कर्मजालैः इति। (७२)

७३.

ज्ञानादेव बन्धमोक्षः इति निर्णयश्चेत् कर्मणा जीवाः सुखं विन्दन्ति इति श्रुत्या (कर्मकाण्डे) किमर्थमुच्यते इति पृच्छति शिष्यः।

आचार्यश्रेष्ठ या त्रय्यभिवदति सुखं बोधमात्राद्धितीयं[२१०]
सा पुण्यापुण्यमिश्रैः सुरनरकुरुहां[२११] प्राप्नुयुर्देहयोगम्।
वर्णाचारक्रमोत्थं सुखमपि विपुलं प्राप्नुवन्तीति लोकाः[२१२]
ब्रूते किं कर्मकाण्ड्या प्रकथयतु भवान् कारणं[२१३] मे कृपालो।। ७३।।

अन्वयः - आचार्यश्रेष्ठ या त्रयी बोधमात्राद्धितीयं सुखम् अभिवदति सा, "लोकाः पुण्यापुण्यमिश्रैः सुरनरकुरुहां देहयोगं प्राप्नुयुः, वर्णाचारक्रमोत्थं विपुलं

---

209. *Vera* does not have this न.

210. *Vera* reads as बोधमात्रादितीयं.

211. ***RSV 1***, ***RSV 2*** and ***GN*** read as सुरनरकुरुहाः. ***Vera*** reads as सुरनरकुरुहां.

212. *Vera* reads as तेऽमी.

213. *Vera* reads as केवलं.

सुखमपि प्राप्नुवन्तीति" इति कर्मकाण्ड्या ब्रूते। तत्र किं कारणम्? हे कृपालो भवान् मे प्रकथयतु।

व्याख्या - श्रुतिशिरोभिः विचारेणैव सच्चिदानन्दाम्बुधिरूपं परमपदं प्राप्तुं शक्यते इति उच्चैरुद्घुष्यते इति भवता प्रदर्शितम्। किन्तु सैव श्रुतिः कर्मकाण्डे किं कथयति? जीवाः सुराणां नराणां भूरुहाणां, (कुरुहाः = भूरुहाः, तरवः) तरूणां च देहयोगं पुण्यापुण्यमिश्रैः कर्मभिरेव प्राप्नुवन्तीति। किञ्च वर्णाश्रमधर्माचारेणैव अनन्तं सुखं प्राप्नुयुर्जीवाः इत्यपि कथयति। एवं विरुद्धतया उक्तौ किं कारणम् इति कृपानिधिर्भगवान् कृपया मह्यं कथयतु ; अहेतुकदयासिन्धवः स्निग्धाय शिष्याय गुह्यमपि कथयन्ति इति। (७३)

७४.

प्रथमालीढमधवः बालाः कटु अपि भेषजं पिबन्ति किल। एतन्न्यायमाश्रित्य श्रुतिरपि कामिनाम् इष्टं स्वर्गादिकं यत् सुखं तत्साधनभूतं कर्मजातं प्रदर्श्य पथ्यं ज्ञानमार्गमुपदिशतीत्याह -

नित्यं मृद्भक्षणेच्छोर्जगति निजशिशोर्लड्डुकादीन् प्रदर्श्य
व्याधिघ्नं काटवाढ्यं वितरति जननी भेषजं[214] तद्यथैव।
धर्मानातिष्ठ यज्ञानपि कुरु भविता भूरि सौख्यं तवेति
ब्रूते तद्वच्छ्रुतिः सा तदभिमतमिमे कामिनो नैव विद्युः।। ७४।।

अन्वयः - जगति नित्यं मृद्भक्षणेच्छोः निजशिशोः यथा जननी लड्डुकादीन् प्रदर्श्य व्याधिघ्नं काटवाढ्यं तद् भेषजं वितरति तद्वदेव सा श्रुतिः "धर्मानातिष्ठ, यज्ञानपि कुरु, तव भूरि सौख्यं भविता" इति ब्रूते। कामिनः इदं तदभिमतं नैव विद्युः।

व्याख्या - बालकस्य मृद्भक्षणेच्छारूपो व्याधिरस्ति। तच्छान्तये कटु भेषजं तस्मै दातुं वाञ्छति माता। बालकाय तु कटु भेषजं न रोचते। माता किं करोति? लड्डुकादि रुचिरं मधुरं वस्तु प्रदर्श्य, दत्वा, तद्व्याजेन तदन्तर्निहितं कट्वपि भेषजं ददाति। तद्वदेव श्रुतिः, धर्मानातिष्ठ, यज्ञान् कुरु, महत्सौख्यं भूयादिति कथयति। कामिनां यदिष्टं तत्प्रदर्श्य रोचनां जनयति। यदुक्तं श्रीमद्भागवते "परोक्षवादो वेदोऽयं बालानामनुशासनम्। कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं

214. ***Vera*** reads as भैषजं.

यथा।।" (११.३.४४) इति। श्रुतेरुद्देश्यम् आशापाशग्रस्ता जनाः न जानन्ति। (७४)

७५.

रागतः कर्मादौ प्रवृत्तिर्भवति। तत्र तदनुशासनं नावश्यकम्। एवं सति अनुशिष्यते चेत् अभिमतमन्यदिति ज्ञेयमित्याह -

स्वेष्टाहारे वधूनामभिमतगमने सर्वजन्तोः प्रवृत्तिः
नित्या यस्मात्किमेतां वदति हि निगमस्तावदेषोऽप्रवीणः।
कृष्णः स्याः काक वह्ने दह भव कटुको निम्बवृक्षानिल त्वं
क्षिप्रं गन्ता भवेति प्रकटितवचनो मा स्म भूत् कोऽपि लोके। ७५।।

अन्वयः - सर्वजन्तोः स्वेष्टाहारे वधूनामभिमतगमने (च) नित्या प्रवृत्तिः यस्मात् (भवति) तामेतां निगमः किं वदति हि? एषः तवदप्रवीणः किम्? 'हे काक! कृष्णः स्याः', 'वह्ने दह', 'निम्बवृक्ष त्वं कटुकः (भव)', 'अनिल क्षिप्रं गन्ता भव' इति लोके कोऽपि प्रकटितवचनः मा स्म भूत्।

व्याख्या - लोके सर्वो हि जन्तुः इष्टम् आहारं भोक्तुमिच्छति, प्रवर्तते। एवमेव अभिमते वधूगमने प्रवर्तते। सैषा प्रवृत्तिः सहजा। तादृश्यां प्रवृत्तौ निगमः यं कमपि न प्रेरयेत्। वेदः नाप्रगल्भः। अनारम्भणीये शास्त्रारम्भाय। लोके न कोऽपि काकं त्वं कृष्णो भव इत्यादिशेत्। एवमेव वह्निं प्रति दाहको भवेति। एवम् अन्येऽप्यादेशाः प्रामाणिकेन न केनापि जनेन दीयते। अतः वैदिकानामेषां वाक्यानाम् अन्योऽर्थो विद्यते इति। (७५)

७६.

एवञ्चेत् 'धर्मानातिष्ठ', 'यज्ञान् कुरु' इत्यादीनां श्रुत्यादेशानां को वार्थ इति चेदुच्यते -

चेन्मद्यामिषपानभक्षणविधौ वाञ्छा कुरुष्वाध्वरान्
भोगे स्यान्मनसो रुचिर्यदि तदा दारान्निजानाहर।
इत्याख्यानपरश्रुतेरभिमतौ नाद्यौ विधी तावुभौ
किन्त्वेषा परिसङ्ख्ययैव सकलं हातुं प्रवृत्ता खलु।। ७६।।

अन्वयः - "मद्यामिषपानभक्षणविधौ वाञ्छा चेत् अध्वरान् कुरु, मनसो भोगे रुचिः स्याद्यदि तदा निजान् दारानाहर" इत्याख्यानपरश्रुतेः तौ उभौ अपि

विधी न आद्यौ। किन्तु एषा (श्रुतिः) परिसङ्ख्यया एव सकलं हातुं प्रवृत्ता खलु।

व्याख्या - मद्यपाने इच्छा अस्ति चेत्, आमिषभक्षणे इच्छा अस्ति चेत् अध्वरान् कुरु, मनसः स्त्रीसङ्गे इच्छा अस्ति चेत् दाराहरणं कुरु, निजेषु दारेष्वभिरमस्व इत्यर्थकं भवति अध्वरान् कुरु, दारानाहर इत्यादिश्रुतिवाक्यम् । अत्र इमौ विधी न आद्यौ। न अपूर्वनियमविधी। किन्तु परिसङ्ख्याविधिः उभयत्र। परिसङ्ख्याविधिर्नाम निवर्तकं वाक्यम्। इतरनिवृत्तिफलको विधिर्हि परिसङ्ख्याविधिः। यथा पञ्च पञ्चनखा भक्ष्याः इत्युक्ते पञ्चनखभक्षणं न विधीयते। किन्तु निर्दिष्टपञ्चभिन्नपञ्चनखभक्षणं निषिध्यते। अन्ये पञ्चनखा न भक्ष्याः इति। एवमेव अत्र यज्ञादन्यत्र मद्यपानं वा आमिषभक्षणं वा निषिध्यते। एवमेव परदारगमनं निषिध्यते। अतः यजने विवाहे वा श्रुतिवाक्यस्य न तात्पर्यम् इति। उक्तं च श्रीमद्भागवतपुराणे "यद् घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा। एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मम्।।"(११.५.१३) इति।

अत्र सूचितं श्रुतिवाक्यं किमिति वा कुत्रास्तीति वा न ज्ञायते। किञ्च स्मृत्यनुमितं तदिति चेदपि स्मृतिवाक्यं न ज्ञायते। सौत्रामणीप्रकरणे "सुराग्रहान् गृह्णाति" (तैत्तिरीयब्राह्मणम् १.३.३.३) इति वाक्यमस्ति । एवमेव ऋतौ भार्यामुपेयात्, हुतशेषं भक्षयेत् इत्यादीनि वाक्यानि स्मृतिषु पुराणादिषु च दृश्यन्ते। (७६)

७७.

पश्चात्सर्वं त्याज्यमेवेति श्रुतिर्निर्णयमाहेति दर्शयति।

आघ्राणभक्षं पिशितासवानामाख्याति वेदोऽथ रतिं प्रजायै।
उन्मुच्य पश्चादखिलं तदेतन्निष्ठापरः[215] स्यादिति वक्ति पश्य।। ७७।।

अन्वयः - पिशितासवानाम् आघ्राणभक्षम् (एव), अथ प्रजायै (एव) रतिम् आख्याति वेदः। पश्चात् तदेतदखिलम् उन्मुच्य निष्ठापरः स्यादिति (अपि) वक्ति। पश्य।

व्याख्या - मांसस्य (यज्ञशिष्टस्य) आसवस्य (सोमरसस्य) च आघ्राणमेव श्रुतिरादिशति। न साक्षाद् भक्षणम्। एवं, धर्मप्रजासम्पत्त्यर्थमेव स्त्रीसङ्गमादिशति।

215. ***RSV 1*** and ***RSV 2*** read as निष्ठा परा स्यादिति. ***GN*** reads as निष्ठापरस्स्यादिति. ***Vera*** reads as निष्ठा परस्स्यादिति.

न पुनर्भोगाय। किञ्च पश्चात् एतत्सर्वं कर्मपाशं त्यक्त्वा निष्ठापरः स्यादिति वेदः आदिशतीति ज्ञेयम् इति। यथा बृहदारण्यके "शान्तो दान्त उपरतस्तितक्षुः समाहितः श्रद्धान्वितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्" (४.४.२३) इति वाक्यम्। श्रुत्यर्थः अवहितमनसा द्रष्टव्यः। सावधानं सूक्ष्मं पश्येत्याह। (७७)

७८.

कर्म अज्ञानसंवर्धकं भवतीति पूर्वमुक्तम्। एवम् अज्ञानकर्मणोरविरोधश्च प्रोक्तः। परं ज्ञान-अज्ञानयोर्विरोधः प्रसिद्धः। एवं स्थिते ज्ञानस्वरूपे ब्रह्मणि संलग्नम् अज्ञानं कथं जगदेतद्विरचयेदिति पृच्छति शिष्यः।

अज्ञानस्य न [२१६]कर्मणां हि रिपुतेत्येतद्यथार्थं[२१७] वचो
विज्ञानं तु परं निहन्ति नितरामज्ञानमित्यार्य[२१८] चेत्।
ज्योत्स्नायां तिमिरं तथैव पतितं त्वज्ञानमेतच्चितौ
लग्नं लोकमिमं कथं विरचयत्याख्याहि सम्यग् गुरो।। ७८।।

अन्वयः - अज्ञानस्य कर्मणां (च मिथः) न रिपुता। परं विज्ञानं तु अज्ञानं नितरां निहन्ति इत्येतद्वचः यथार्थं चेत् ज्योत्स्नायां पतितं तिमिरं यथा (तथैव) चितौ लग्नम् एतदज्ञानं कथम् इमं लोकं विरचयति? (हे) गुरो! सम्यगाख्याहि।

व्याख्या - पूर्वमुक्तम् अज्ञानस्य कर्मणश्च विरोधो नास्तीति। किञ्च कर्म अज्ञानं वर्धयेदिति च। एवम् अज्ञानं ज्ञानोत्पत्तिक्षणे एव भस्मसाद् भवतीति ज्ञानाज्ञानयोर्विरोधोऽपि उक्तः। एतदुक्तं सत्यं चेत् ज्योत्स्नायां पतितं तिमिरम्व चितौ ब्रह्मणि लग्नम् अज्ञानम् एतं लोकं कथं विरचयतीति सन्देहः। (७८)

७९.

ज्ञानं द्विविधमस्ति। स्वरूपज्ञानं वृत्तिज्ञानं चेति। तत्र स्वरूपज्ञानस्य अज्ञानेन विरोधो नास्तीत्याह।

[२१९]द्वेधेति ज्ञानमेकं परमपि कथितं वृत्तितश्च स्वरूपाद्
[२२०]वृत्तिज्ञानं स्वरूपाभिधचितिरवभात्येव वत्सास्ति नान्यत्।

---

216. ***Vera*** reads as कर्मणास्ति.

217. ***RSV 1***, ***RSV 2*** , ***GN*** read as रिपुता एतद्व्यार्थं. ***Vera*** reads as रिपुतेत्येतद्यथार्थं. We have adopted the reading of ***Vera***, which seems to be proper.

218. ***Vera*** reads as नितरामिमज्ञानमित्यार्यं (?).

219. ***Vera*** reads as एकं ज्ञानं परमपि in place of द्वेधेति ज्ञानमेकं.

220. ***Vera*** reads as वृत्तिज्ञानस्वरूपाभिधचितिरवभात्येव.

नाज्ञानस्यैव शत्रुर्भवति परचितिर्दृष्टमेतत्सुषुप्तौ[221]
वृत्तौ लग्ना स्वरूपाभिधचितिरपि सा नाशयेत् स्वीयमोहम्।। ७९।।

अन्वयः - वत्स परं ज्ञानम् एकमपि स्वरूपाद् वृत्तितश्च इति द्वेधा कथितम्। स्वरूपाभिधचितिरेव वृत्तिज्ञानम् अवभाति। नान्यदस्ति। परचितिः अज्ञानस्य शत्रुः न भवति। एतत् सुषुप्तौ दृष्टम्। स्वरूपाभिधचितिः वृत्तौ लग्ना स्वीयमोहं नाशयेत् ।

व्याख्या - चित्स्वरूपं परज्ञानाख्यं द्वेधा कथितम् अभिज्ञैः। स्वरूपज्ञानं वृत्तिज्ञानं चेति। तत्र चितिरेव स्वरूपाभिधं ज्ञानम्। तस्य प्रकाशनमेव, अवभानमेव, वृत्तिज्ञानमिति कथ्यते। स्वरूपाख्या चितिः अज्ञानस्य शत्रुर्नास्ति। एतत् सुषुप्तिसमये ज्ञायते। सुषुप्तौ अज्ञानं न नष्टं भवति। आत्मस्वरूपं चिदानन्दः अवभासते। परम् अज्ञानं न नष्टमित्यतः ब्रह्मानन्दो नानुभवगोचरः। वृत्तौ प्रकाशमाना चित्तु अज्ञानं नाशयतीति। (७९)

८०.

सुषुप्तावपि स्वरूपज्ञानम् अज्ञानं न दहति। किन्तु वृत्तौ लग्नं ज्ञानं दहति। तत्कथमिति प्रश्नमुत्थाप्य सोदाहरणं समाधत्ते।

स्वरूपज्ञानं यन्न दहति सुषुप्तावपि तमः
कथं वृत्तौ लग्नं गुरुवर दहेच्चेदिति तमः।
रवेरुस्रो यद्वन्न दहति जगत्सूर्यदृषदि
प्रसक्तश्चेत्सर्वं दहति च[222] तथैतच्छृणु सखे।। ८०।।

अन्वयः - गुरुवर यत् स्वरूपज्ञानं सुषुप्तावपि तमः न दहति (तत्) वृत्तौ लग्नं कथं तमः दहेदिति चेत् शृणु। (यथा) रवेः उस्रः यद्वत् जगत् न दहति, (किन्तु) सूर्यदृषदि प्रसक्तश्चेत् सर्वं दहति तथा एतत् हे सखे।

व्याख्या - शिष्यः पृच्छति - सुषुप्तावपि अज्ञानम् अदहत् स्वरूपज्ञानं कथं वृत्तौ बिम्बितं दग्धुं शक्नोतीति। गुरुः उत्तरयति - सूर्यः प्रचण्डांशुरपि लोकान् न दहति। सूर्यांशवो न दहन्ति जगत्। किन्तु त एव सूर्यांशवः सूर्यदृषदि प्रसक्ताश्चेत् सर्वं दहन्ति। तथैव ज्ञानं चितिरूपेण स्थितं न अज्ञानविरोधि। परं वृत्तौ लग्नं चेत् दहत्येव अज्ञानमिति। (८०)

---

221. ***Vera*** reads as परचितिर्दृष्टमेवैति सुप्तौ.

222. ***Vera*** reads as हि.

८१.

पूर्वमुक्तं कर्म अज्ञानं न दहतीति। अधुनोच्यते वृत्तिज्ञानं दहतीति। वृत्तिज्ञानं नाम मानसं कर्मैव किल। एवञ्चेत् कर्मैव किल अज्ञाननाशकमिति शिष्यः पृच्छति।

[223]श्रीमन् देशिक यत् त्रिभिश्च करणैः क्लृप्तन्तु कर्मैव चेत्
वृत्तिज्ञानमिदञ्च चित्तकलितं किं कर्म न स्याद्वद।
अज्ञानं न निहन्ति कर्म विपुलं किं वाऽस्य नामान्तरं
विज्ञानं बृहदित्यतीव महिमा प्राप्तः कुतो वा भवेत्।। ८१।।

अन्वयः - श्रीमन् देशिक त्रिभिः करणैः यत् क्लृप्तं तदेव कर्म चेत् इदं चित्तकलितं वृत्तिज्ञानञ्च कर्म किं वा न स्यात्? कर्म विपुलम् अज्ञानं निहन्ति किम्? अस्य, विज्ञानं बृहदिति नामान्तरम् अतीव महिमा (च) कुतः वा प्राप्तः भवेत्? वद।

व्याख्या - वृत्तिज्ञानम् अज्ञानं दहतीत्युक्तम्। तच्च वृत्तिज्ञानम् अन्तःकरणे संलग्नं स्वरूपज्ञानमेव। तेन तत् चित्तकलितं कर्मैव। मानसं, वाचिकं, कायिकम् इति करणतः त्रिधा भिन्नं किल कर्म। एवं स्थिते वृत्तिज्ञानं नाम मानसं कर्मैव। एवं मानसमिदं ज्ञानं विपुलम् अज्ञानं किं न दहति? किमर्थं स्वरूपज्ञानस्य बृहद् विज्ञानमिति नामान्तरं दत्तम्? को वास्य महिमा? एतत् कृपया वदत्विति शिष्यः पृच्छति। (८१)

८२.

स्वरूपज्ञानं वस्तुतन्त्रं भवति। वृत्तिज्ञानं तु पुरुषतन्त्रमित्यनयोर्भेद इत्याह -

वृत्तिज्ञानमिदञ्च वृत्तिजनितं हन्यात्तदीयं मलं[224]
[225]एकस्यास्तनुजास्त्रयोऽपि कलहायन्ते मिथो वैरिणः।
पुन्तन्त्रं किल कर्मजालमखिलं कर्तृत्वहेतोरिदं
विज्ञानं न तथैव किन्तु विबुधास्तद्वस्तुतन्त्रं विदुः।। ८२।।

अन्वयः - इदं वृत्तिज्ञानं वृत्तिजनितं तदीयं मलं हन्यात्। एकस्याः त्रयः पुत्राः मिथो वैरिणः कलहायन्ते। इदम् अखिलं कर्मजालं कर्तृत्वहेतोः पुन्तन्त्रं किल। विज्ञानं (तु) नैव तथा। विबुधाः तद् वस्तुमात्रं विदुः।

---

223. ***Vera*** reads wrongly as श्रीमद्देशिकवर्य in place of श्रीमन् देशिक and the editor points out a छन्दोभङ्ग with his wrong reading.

224. ***RSV 1***, ***RSV 2***, and ***GN*** read as बलं . ***Vera*** reads as मलं.

225. ***Vera*** reads as ह्येकस्याः.

व्याख्या - सत्यम्। वृत्तिज्ञानं मानसं कर्मैव। तच्च वृत्तिजनितं मलम्, अज्ञानं नाशयेत्। यथा लोके एकस्याः जनन्याः त्रयः पुत्राः मिथः कलहायमाना दृश्यन्ते एवमेवात्र त्रिभिः करणैः जातस्य कर्मणः मिथो भेदो दृश्यते। मानसं कर्म वृत्तिज्ञानम्, अज्ञानं नाशयति। कायिकं कर्म तु अज्ञानं वर्धयति। कर्मजालं सर्वमपि जीवे कर्तृत्वारोपात् हेतोः पुरुषतन्त्रं भवति। विज्ञानं तु, स्वरूपज्ञानं तु, न तथा। तद् वस्तुतन्त्रं भवति। (८२)

८३.

ध्यानमपि पुरुषतन्त्रम्। किन्तु विज्ञानं वस्तुतन्त्रं भवति। किञ्च तत् स्वतन्त्रं भवतीति विज्ञानस्य महिमेत्याह -

[२२६]नो कर्तुं कर्तुमन्यद्विरचयितुमिदं कर्म शक्यं मनुष्यैः
ब्रह्मज्ञानं तथैतन्न तु भवतितरां यत्स्वरूपादनन्यत्।
अन्यस्मिन्नन्यभावो जगति निगदितो[२२७] ध्यानशब्देन बोधो
जातः सम्यग्विचारान्न हि भवति मृषा वास्तवत्वान्न मोहः।। ८३।।

अन्वयः - इदं कर्म मनुष्यैः कर्तुं नो कर्तुम् अन्यद् विरचयितुं वा शक्यम्। यत् स्वरूपाद् अनन्यत् तदेतद् ब्रह्मज्ञानं तथा न भवतितराम्। जगति अन्यस्मिन् अन्यभावः योगशब्देन निगदितः। सम्यग् विचाराद् जातो बोधः न हि मृषा भवति। वास्तवत्वात् न (च)मोहः।

व्याख्या - पुरुषतन्त्रात् कर्मणः वस्तुतन्त्रं विज्ञानं सुतरां भिद्यते इति कथयति। मनुष्यैः कर्म कर्तुम् नैव (नो, न उ, नैव) कर्तुम् (अकर्तुम्) अन्यथाकर्तुं वा शक्यते। तस्मादेव तत्पुरुषतन्त्रमित्युच्यते। ब्रह्मज्ञानं न तथा। जीवेन कर्तुमकर्तुमन्यथाकर्तुं वा न शक्यते। योगः अपि पुरुषतन्त्र एव। स हि अन्यस्मिन् अन्यभावः इति निगदितः। विचाराज्जातं विज्ञानरूपं ब्राह्मं ज्ञानं तु न कदाचिदपि मृषा भवति। वास्तवत्वाच्च तत्र मोहस्पर्शोऽपि न भवतीति। (८३)

८४.

एतद् विज्ञानाख्यं स्वरूपज्ञानं योगादपि भिन्नं निर्विषयम् अज्ञाननाशकञ्चेति द्रढयति।

---

226. ***Vera*** reads as नोऽकर्तुं.
227. ***Vera*** reads as ह गदितो.

ज्ञानं [228]दृष्ट्वाऽनुभूतं श्रुतिविषयकृता[229] भावनायोगसंज्ञाः
प्रोक्तं[230] यद् [231]द्रष्ट्टभिस्तद् विगळति[232] न मनाक् स्वेन दृष्टं कदाऽपि[233]।
दृष्टं सत्यं समस्तं मननपरिगतं वस्तु सर्वं मृषा स्याद्
विज्ञानं यन्निहन्याद्विषयगतमतिं[234] तद्धि बोधो न कर्म।। ८४।।

अन्वयः - दृष्ट्वा अनुभूतं ज्ञानम्। श्रुतिविषयकृताः भावनायोगसंज्ञाः। यद् द्रष्टृभिः प्रोक्तं तद्विगळति। स्वेन दृष्टं कदापि मनागपि न (विगळति)। दृष्टं सत्यम्। मननपरिगतं सर्वं वस्तु मृषा स्यात्। यद् विषयगतमतिं निहन्यात् तद् विज्ञानं बोधः। तद्धि कर्म न भवति।

व्याख्या - यत् स्वयमनुभूतं तदेव ज्ञानं सत्यम्। यत् श्रुतं मनसा चिन्त्यते तद् भावना, योगः. इत्यादिभिर्व्यवह्रियमाणा वृत्तिः। यद् अन्यैः अनुभूय उपदिष्टं तत् सम्यङ् मननादिना द्रढीकृतं चेदपि मनसः विगळति। विस्मृतिपथं याति। स्वेनानुभूतं तु न कदापि विस्मृतिमेति (विस्मृतं चेदपि संस्कारात्मना विपरिवर्तते। प्रबोधयितुं शक्यते पश्चात्)। यत् स्वयम् अन्तःकरणादिकं विना साक्षादनुभूतं तदेव सत्यम्। यन्मननादिना वृत्तिद्वारा अवगम्यते तत्सर्वं मृषा। यद् ज्ञानं, विषयगतमतिं, वृत्तिज्ञानरूपं सविषयकं ज्ञानम्, अर्थादज्ञानं निश्शेषतो हन्यात्तदेव विज्ञानम्। तच्च न कर्मस्वरूपं यथा आशङ्कितं त्वया इति शिष्यमाह गुरुः। (८४)

८५.

योगेनाधिगतं ब्रह्मज्ञानमपि मृषा। विचारेण साक्षादनुभूयमानं विज्ञानमेव सत्यमित्याह।

---

228. ***Vera*** reads as दृष्ट्वा.

229. ***Vera*** has a different reading श्रुतिविषयवताभावनायोगसंज्ञा which is clearly incorrect. Moreover the *Prabhā* commentary has this explanation: श्रुतिकृतविषया भावना श्रुत्यवबाधितं यथाभिमतवस्तु भावनायोग इति संज्ञायते।

230. ***RSV 1*** and ***RSV 2*** read as प्रोक्तं. ***GN*** and ***Vera*** read as प्रोक्ता.

231. ***RSV 1*** and ***RSV 2*** read as द्रष्टृभिः. ***GN*** and ***Vera*** read as दृष्टिभिः.

232. ***RSV 1*** and ***RSV 2*** read as स्थगयति. ***GN*** and ***Vera*** read as विगळति. This seems to be nearer to the Tamil original.

233. ***Vera*** reads as कदाचित्.

234. ***Vera*** has the reading यन्निहन्याद्विषयगतमिति. The editor points out that this causes *chandobhaṅga*. But he fails to notice that the commentary thereon favours the reading विषयगतमतिं. The commentary explains as द्वैतप्रपञ्चगतभ्रान्तिविज्ञानं हन्यादेव.

ध्यानं सायुज्यमुक्तिप्रदमपि च मृषा चेद् भवेत् साऽपि मुक्तिः[२३५]
मिथ्या भूयादिति त्वं मनसि कलय नो शङ्कितं[२३६] चारुबुद्धे।
स्वाकारं शृण्वतां वा निजमनसि कृतं ध्यायतां[२३७] यन्मृषा तत्
स्मृत्योपेते च काले तदपि च लभते पश्यतां सत्यभावम्।। ८५।।

अन्वयः - सायुज्यमुक्तिप्रदं ध्यानमपि मृषा चेत् सा मुक्तिरपि मिथ्या भूयादिति शङ्कितं, हे चारुबुद्धे, त्वं मनसि नो कलय। स्वाकारं शृण्वतां निजमनसि कृतं ध्यायतां वा यत् मृषा तदपि च स्मृत्योपेते काले पश्यतां सत्यभावं लभते।

व्याख्या - हे लळितमते तव एवं शङ्कितं स्यान्मनसि – "सायुज्यमुक्तिं ददत् ध्यानं मृषा चेत् मुक्तिरपि मिथ्या भवेद्" इति। सा शङ्का अस्थाने। यतः परेण साक्षात्कृतं शृण्वतां, श्रुतं वा निजमनसि ध्यायतां, यद्वस्तु मृषा तदेव स्वयं साक्षात्पश्यतां, साक्षात्कुर्वतां सत्यभावं लभते। अर्थात्, श्रवणं, मननं, ध्यानम् इत्येतत्सर्वं केवलं साधनभूतम्। मृषैव। अनुभूतिरेव साध्यम् सत्यं सच्चिदानन्दं वस्तु इति। (८५)

८६.

यद्येवं, मृषाभूतवस्तुध्यानात् कथम् अखण्डसच्चिदानन्द स्वरूपावाप्तिः (श्रवणमनननिदिध्यासनैः ब्रह्म अधिगन्तव्यमिति श्रुतिः) इति शङ्कां निराकुरुते।

जडाकारध्यानं कथमिति दिशेद् भेदरहितां[२३८]
विमुक्तिं चेत्तत्मननमिह तत्तत्तनुकरम्[२३९]।
[२४०]शरीराभिध्यानाद् भवति सशरीरः खलु जनः
स्वरूपाभिध्यानाद् भवति परतत्त्वं भवलयात्।। ८६।।

---

235. ***RSV 1*** and ***RSV 2*** read as मुक्ति. ***GN*** and ***Vera*** read as मुक्तिः. This seems to be more proper.

236. ***RSV 1, RSV 2, GN*** read as कलय नो शङ्कितश्चारुबुद्धे . ***Vera*** reads as कलयनोशङ्कितं चारुबुद्धे.

237. ***RSV 1, RSV 2*** read as निजमनसि कृतं ध्यानतो. ***GN*** reads as निजमनसिकृतं ध्यानतो. ***Vera*** has a totally different reading for the second half of the verse as स्वाकारस्मृत्यनेहस्यपि मनसि कृतध्यानतो यन्मृषा तत्स्मृत्योपेते च काले तदपि च लभते पश्यतां सत्यभावम्।।

238. ***GN*** and ***Vera*** read as देहसहितां.

239. ***RSV 1, RSV 2*** read as तत्तत्तनुपरं. ***GN*** has slightly different reading for the whole line as विमुक्तिञ्चैतत्तेमनननमिह तत्तत्तनूकरं. And ***Vera*** has this as विमुक्तिञ्चैतत्ते मनननमिह तत्तत्तनूकरं. ***Vera*** helps us in fixing the correct reading as तत्तत्तनुकरं. However, had the editor consulted ***RSV*** editions, he would have been able to avoid unnecessary discussion on छन्दोभङ्ग.

240. ***GN*** wrongly reads as शरीरभिध्यनाद्.

अन्वयः - जडाकारध्यानं भेदरहितां विमुक्तिं कथं दिशेदिति चेत् तत्तन्मननम् इह तत्तत्तनुकरम्। जनः शरीराभिध्यानात् सशरीरः भवति खलु। स्वरूपाभिध्यानात् परतत्त्वं भवति। भवलयाद् (हेतोः) इति।

व्याख्या - जडाकारं भवति ध्यानविषयं वस्तु इति खलु उक्तम्। एवञ्चेत्, जडाकारध्यानात् कथं विमुक्तिर्भवेत्? ; कथं सच्चिदानन्दावाप्तिरिति शङ्का चेदिदं समाधानम्। यन्मनसा ध्यायते तदेव भवति ध्याता। शरीराभिध्यानात् शरीरी भवति। स्वरूपाभिध्यानात्, निजस्वरूपस्य अखण्डानन्दस्वरूपस्य अभिध्यानाच्च परतत्त्वम्, अखण्डानन्दस्वरूपं भवतीति। जनिमृतिभूतसंसारस्य मायिकत्वावबोधात्। (८६)

८७.

तत्तद्ध्यानं तत्तत्तनुकरं चेत् ब्रह्मध्यानेनैव ब्रह्मीभावसिद्धौ किं विचारेण इति शङ्कामनूद्य निरस्यति।

ब्रह्मध्यानेन मुक्तिर्यदि भवति गुरो किं विचारात् प्रबोधा-
दित्थं मा पृच्छ वत्स प्रभवति हि परोक्षप्रमा ब्रह्मचिन्ता[२४१]।
[२४२]सा ब्रह्मण्यापरोक्ष्यामृतरससुखदा कालतः स्याद्विचारात्
बोधानन्दैकरूपा गतसकलमला मुक्तिरित्येव विद्धि।। ८७।।

अन्वयः - "यदि ब्रह्मध्यानेन मुक्तिर्भवति, गुरो! विचारात् प्रबोधात् च किं प्रभवति" (इति) इत्थं मा पृच्छ वत्स। परोक्षप्रमा ब्रह्मचिन्ता हि कालतः विचारात् ब्रह्मण्यापरोक्ष्यामृतरससुखदा स्यात्। गतसकलमला बोधानन्दैकरूपा सा एव मुक्तिः (इति) विद्धि।

व्याख्या - ब्रह्मध्यानं ब्रह्मीभावरूपं मुक्तिं ददाति चेत् किमर्थं पुनः विचारः करणीयः इत्याशङ्का स्यात्। तस्येदं समाधानम्। ब्रह्मध्यानं ब्रह्मविषयिणी परोक्षचिन्तैव। तत्र ध्यातृध्येययोः भेदोऽस्तीति पारोक्ष्यम्। किन्तु सा चिन्ता (ध्यानं) कालक्रमेण विचारद्धारा अपरोक्षाम् अनुभूतिं दद्याद् या हि सत्या ब्राह्मी स्थितिः। तस्यां हि अपरोक्षायाम् अनुभूत्याम् अनुभवविषयः, अनुभववान् इत्यनयोः भेदो नास्ति। यतः उभयमपि एकं ब्रह्म सम्पन्नम्। तत्र मायिकस्य सर्वस्यापि

241. ***Vera*** reads as तत्त्वचिन्ता.

242. ***Vera*** reads as सैव ब्रह्मापरोक्ष्यामृतरससुखदा.

भ्रमरूपस्य मलस्य असत्वातद् गतसकलमला सा ब्राह्मी स्थितिः अमृतरससुखस्वरूपा अखण्डबोधस्वरूपा च। सैव मुक्तिरिति (८७)

८८.

वृत्तिज्ञानं किल मुक्तिरूपस्य स्वरूपविज्ञानस्य साधनम्। मुक्त्यवस्थायामपि वृत्तिज्ञानं शिष्यते चेत् कथं मुक्तिरिति शङ्का अस्थाने। यतः वृत्तिज्ञानम् अज्ञानं नाशयति। तेन अज्ञानेन सहैव विलयं याति च; यथा पङ्कप्रसाधनाय क्षिप्तं कतकं पङ्केन सहैव अपयाति तथेत्याह।

मोक्षाकारे[२४३] सुपूर्णे[२४४] परनभसि शिवे वृत्तिबोधः[२४५] स्थितश्चेत्
का वाऽखण्डानुभूतिरित्विति वदसि गिरं[२४६] मामिकां त्वं[२४७] शृणुष्व।
तोयान्यासाद्य यद्वत्कतकफलरजस्तन्मलं नाशयित्वा
पश्चान्नष्टं स्वयं सा चितिरपि च तमो नाशयित्त्वैव नश्येत्। ८८।।

अन्वयः - सुपूर्णे मोक्षाकारे परनभसि शिवे वृत्तिबोधः स्थितश्चेत् का वा अखण्डानुभूतिः इति वदसि? त्वं मामिकां गिरं शृणुष्व। यद्वत् कतकफलरजः तोयान्यासाद्य तन्मलं नाशयित्वा पश्चान्नष्टं (स्यात् तद्वत्) सा चितिरपि तमो नाशयित्वा स्वयं नश्येत् एव।

व्याख्या - ध्यानरूपं वृत्तिज्ञानम् आवश्यकम्। तद् अपरोक्षानुभूत्यै मुक्त्यै उपकोतीत्युक्तम्। अखण्डबोधस्वरूपे यदि सा वृत्तिचितिः तिष्ठति चेत् कथम् अखण्डामुभूतिर्भवेत्? एवं मोक्षे प्रतिबन्धकं किल वृत्तिज्ञानम् इति सन्देहः। तं निरस्यति गुरुः। यथा पङ्कप्रसाधनाय जले क्षिप्तं कतकरजः पङ्कं प्रसाध्य स्वयमपि लीनं भवति तथा वृत्तिज्ञाम् अज्ञानेन सहैव विलयमेतीति। (८८)

८९.

परमसुखावस्थायां मुक्तौ बन्धमोक्षकथैव नास्तीत्याह -

एवं निश्चयशालिनां सुमनसां कीदृग्विधा चेत्स्थिति-
स्तुल्यास्ते गतचिन्तनैश्च शिशुभिः श्रीसार्वभौमैरपि।

---

243. *Vera* reads as मोक्षागारे.

244. *Vera* reads as सुपर्णे.

245. All the previous editions have the reading वृत्तिबोधस्थितश्चेत्. However the *Prabhā* commentary of the edition *Vera* clearly expresses वृत्तिबोधः स्थितश्चेत्

246. *Vera* reads as गिरां.

247. *Vera* reads as मामिकानां.

बन्धो मोक्ष इति द्वयं स्मृतमभून्नैषां तदस्तीरणे
हासः स्यान्मशकी [२४८]चच्छर्द गगनं भुक्त्वेति न स्यात्स्मितम्।। ८९।।

अन्वयः - एवं निश्चयशालिनां सुमनसां कीदृग्विधा स्थितिः (इति) चेत् ते गतचिन्तनैः शिशुभिः श्रीसार्वभौमैः च तुल्याः। बन्धः मोक्षः इति द्वयं स्मृतम् अपि न अभूत्। एषां तदस्ति इति ईरणे हासः स्यात्। मशकी गगनं भुक्त्वा चच्छर्द इति च (ईरणे) स्मितं स्यात्।

व्याख्या - एवं ब्राह्मां स्थितिं ये अधिगतवन्तः तेषां कीदृशी अवस्था स्यादिति चेत् अतिशिशुवत् परमसुखमग्ना भवेयुः। यथा सार्वभौमः निश्चिन्तः अभीः सुखेन वर्तते तथैव स्युः। अहं पूर्वं बद्ध आसमिति, अधुना मुक्त इति उभयस्मरणमपि तेषां नोदेति। बन्धमोक्षकथाश्रवणे तेषां हासो भवेत्। यथा जनः कश्चन "पश्य इयं मशकी आकाशं सर्वं भुक्त्वा चच्छर्द" इति कथयति चेत् सर्वस्यापि हासो भवेत् तथा। उभयमपि नैव सम्भाव्यम्। तथैव नित्यमुक्तस्य अखण्डानन्दस्वरूपस्य बन्धमोक्षकथा इति। (८९)

९०.

तेषां सर्वोऽपि सांसारिको व्यवहारः तुच्छकथैव इति दर्शयति

वन्ध्याजस्थाणुमर्त्यौ गगनतरुसुमस्रक्पिनद्धोत्तमाङ्गौ
गन्धर्वाणां पुरे तौ बहुकलहयुतौ शुक्तिकारौप्यहेतोः।
प्राणत्यागं प्रपन्नौ शशपुरुषशिरोरूढशृङ्गप्रहारै-
रित्थम्भूते च कार्ये जगति न दधते निर्णयं बुद्धिमन्तः।। ९०।।

अन्वयः - गन्धर्वाणां पुरे गगनतरुसुमस्रक्पिनद्धोत्तमाङ्गौ वन्ध्याजस्थाणुमर्त्यौ शुक्तिकारौप्यहेतोः बहुकलहयुतौ शशपुरुषशिरोरूढशृङ्गप्रहारैः तौ प्राणत्यागं प्रपन्नौ । इत्थम्भूते च कार्ये जगति बुद्धिमन्तः निर्णयं न दधते।

व्याख्या - कश्चन कथां वक्ति । कथायां सर्वं मिथ्याभूतमेव। कथैवम्। गन्धर्वनगरे द्वौ पुरुषौ कलहमकुरुताम्। तयोरेकः वन्ध्यासुतः। अपरश्च स्थाणौ सन्दिग्धो नरः। तौ च आकाशकुसुमैः विरचितां मालां बिभृतः। तयोः कलहस्य कारणं शुक्तिकायां भासमानम् असद् रजतम्। तयोर्युद्धमभूत्। शस्त्रं शशशृङ्गाणि। तौ मृत्युमापन्नौ। कथायां श्रुतायां बुद्धिमन्तः तत्र निर्णयाय विचारं न कुर्वन्ति

248. ***Vera*** reads as च छर्दगमनं.

किल। एतादृश एव सर्वोऽपि सांसारिको व्यवहारः, मुक्तस्येति। (९०)

९१.

मायिकमिदं तुच्छभूतं विस्मृत्य सच्चिदानन्दस्वरूपे ब्रह्मणि स्यास्त्वम् इति शिष्यमादिशति गुरुः।

माया मिथ्या तत्प्रसूतानि मिथ्या माता न [249]स्याच्चेत्कुतः पुत्रजन्म।
निश्चित्येत्थं[250] सर्वमेतन्मृषेति ब्रह्म स्यास्त्वं सच्चिदानन्दरूपम्।। ९१।।

अन्वयः - माया मिथ्या। तत्प्रसूतानि मिथ्या। माता न स्यात् चेत् पुत्रजन्म कुतः? इत्थं सर्वमेतन्मृषेति निश्चित्य त्वं सच्चिदानन्दरूपम् ब्रह्म स्याः।

व्याख्या - माया न सत्यभूता। अत एव मायाकल्पितम् इदं सर्वं न सत्यम्। मिथ्यैव। माता नास्ति चेत् कथं पुत्रोत्पत्तिः? इदम् अनुभूयमानं सर्वं मृषेति सम्यगवधार्य त्वम् अखण्डानन्दस्वरूपं स्वं रूपम् अवेहि। तदवस्थो भवेति। (९१)

९२.

सर्वे देवाः, सर्वे ऋषयः, गङ्गाद्याः सर्वाः पुण्यसरितः, सर्वे वेदाः इत्येतत्सर्वं मिथ्या इति कथनेनैव पापं स्यादिति शङ्कते शिष्यः।

ब्रह्माद्याः सर्वदेवा जगति च सुधियः षड्भिरङ्गैः समेताः
वेदा मन्त्रास्तपांसि त्रिदशपुरनदीपूर्विकाः पुण्यनद्यः।
एतत्सर्वं मृषा स्यादिति गदितवतां पण्डितानां न दोषः
कस्मात् स्याद्देशिकेन्द्र प्रकथय कृपया संशयानस्य मे त्वम्।। ९२।।

अन्वयः - जगति ब्रह्माद्याः सर्वदेवाः , सुधियः, षड्भिरङ्गैः समेताः वेदाः, मन्त्राः, तपांसि, त्रिदशपुरनदीपूर्विकाः पुण्यनद्यः, च (इति) एतत्सर्वं मृषा स्यादिति गदितवतां पण्डितानां कस्मात् दोषो न स्यादिति संशयानस्य मे देशिकेन्द्र त्वं कृपया प्रकथय।

व्याख्या - सर्वे देवाः, सर्वे साङ्गा वेदाः, सर्वे मन्त्रद्रष्टारः ऋषयः, सर्वे मन्त्राः, सर्वाणि तपांसि, सर्वा गङ्गाद्याः पुण्यनद्यः, इत्येतत्सर्वं मृषेति कथनमात्रेण दोष आपद्येत किल इति शिष्यः शङ्कते। (९२)

---

249. ***Vera*** reads as स्वात्.
250. ***Vera*** reads as निश्चित्यैवं.

९३.

एतत्सर्वं स्वप्नाभमिति कथने नैव दोष इत्याह गुरुः।

वस्तु स्वप्नगतं समस्तमपि तन्मिथ्येति दुष्टं वचो
यद्यल्पप्रकृतौ प्रतीतमपि तन्मिथ्येति वाग्दोषभाक्।
स्वप्नोद्भूतपदार्थजालमखिलं[251] मिथ्येति वक्तुं क्षमं
यद्यल्पप्रकृतौ प्रतीतमपि तन्मिथ्येति वक्तुं क्षमम्।। ९३।।

अन्वयः - यदि स्वप्नगतं समस्तमपि वस्तु मिथ्या इति दुष्टं वचः तत् अल्पप्रकृतौ प्रतीतं मिथ्येति वाग् दोषभाक् (भवेत्)। यदि स्वप्नोद्भूतपदार्थजालम् अखिलं मिथ्येति वक्तुं क्षमं तत् अल्पप्रकृतौ प्रतीतमपि मिथ्या इति वक्तुं क्षमम्।

व्याख्या - स्वप्ने दृष्टं सर्वं मिथ्या इति कथने दोषः नास्ति किल। एवमेव अल्पप्रकृतौ, तुच्छभूतायां मायायां भातं सर्वं मिथ्या इति कथनेऽपि न दोषः इति दृढं समाधत्ते गुरुः। (९३)

९४.

नामरुपात्मकं पाञ्चभौतिकमिदं सर्वं मृषैव। सच्चिदानन्दस्वरूपं ब्रह्मैव सत्यम् इति कथयति।

मिथ्या सत्यमिति प्रमूढमनसः पुण्या भवन्तीति चेत्
सञ्जल्पन्ति पुराणकानि यदृतं तत्सत्यमेवेति च।
जानानस्य विनिन्दकं किमु भवेच्छास्त्रञ्च किञ्चेन्मृषा
रूपं नाम च भूतभौतिकगणः किं वा ऋतं ब्रह्म तत्।। ९४।।

अन्वयः - मिथ्या सत्यम् इति प्रमूढमनसः पुण्याः भवन्ति इति पुराणकानि सञ्जल्पन्ति चेत् यद् ऋतं तत् सत्यम् इति जानानस्य विनिन्दकं (भवति) शास्त्रं किमु? किं मृषा (इति) चेत् रूपं, नाम, भौतिकगणः च। किं वा ऋतम्? तद् ब्रह्म।

व्याख्या - पुराणानि मिथ्यावादिनः जनान् पुण्यपुरुषाः इति वदन्ति चेत् ये विमलमतयः ऋषयः ऋतं वस्तु सत्यमिति वदन्ति तान् शास्त्रं निन्दति किम् इति। तान् विमलमतीन् निन्दत् शास्त्रम् अस्ति वा इति सोपहासः प्रश्नोऽपि कृतः। अर्थाद् एतद्विषये पुराणानां शास्त्रत्वमेव नास्तीति। पुराणानां कथनं

251. ***Vera*** reads as स्वप्नोद्भूतपदार्थजातमखिलं.

जल्पनमात्रमेव। ये जनाः मिथ्याभूतं वस्तु सत्यमिति परान् बोधयन्ति ते न पुण्यपुरुषाः। एवं पुराणानि कथयन्ति चेत् तद् जल्पनमेव तेषाम्। ते हि पुण्यपुरुषत्वेन कथ्यमानाः, मृषाभूतं वस्तु सत्यमिति वदन्ति। विमलमतयः तु यद् ऋतं वस्तु तदधिकृत्यैव सत्यमिदम् इति कथयन्ति। ऋतं नाम सदा अविचलम् नित्यमेकं वस्तु। एतत् सम्यग् ज्ञेयम्। किं मृषा किं सत्यमिति। नामरूपात्मकम् इदं पाञ्चभौतिकं सर्वं मृषैव। अखण्डबोधानन्दस्वरूपं ब्रह्मैव सत्यवस्तु इति जानीहीति गुरुराह। (९४)

९५.

मायामधिकृत्य षट् प्रश्नान् पृच्छति शिष्यः।

माया नाम कथंविधा परिगताः के वा तया सा कथं
संप्राप्ता च किमर्थमागतवती भिन्ना यदि ब्रह्मणः।
द्वैतं प्राप्तमभेदवत्यपि पराच्चेत्स्यान्मृषा[252] तत्परो
मायामेघविधूतिचण्डपवन श्रीदेशिक ब्रूहि मे ।। ९५।।

अन्वयः - माया नाम कथंविधा? तया के वा परिगताः? सा कथं माया नाम कथंविधा परिगताः के वा तया सा कथंसंप्राप्ता? किमर्थं च सा आगतवती? यदि सा ब्रह्मणः भिन्ना द्वैतं प्राप्तम्। पराद् अभेदवती चेत् तत्परः मृषा स्यात्। हे मायामेघविधूतिचण्डपवन श्रीदेशिक! मे ब्रूहि।

व्याख्या - इमे षट् प्रश्नाः। किंरूपा माया?, मायया परिगताः, मायाबद्धाः के?, कथमस्या उत्पत्तिः?,

किमुद्दिश्य प्रवृत्तेयम्?, किं सा ब्रह्मभिन्ना? (एवं तर्हि अद्वैतहानिः), यदि परं सा ब्रह्मणः अभिन्ना तर्हि मायावद् ब्रह्मापि मृषा भवेत् किल? इति। (९५)

९६.

क्रमेण समाधत्ते।

[253]सेत्थंभूतस्वरूपेत्यभिगदितुमशक्याकृतित्वादवाच्या
तेऽमी मायाभिभूता जगदृतमिति ये वादिनो देहनिष्ठाः।

---

252. ***RSV 1***, ***RSV 2*** , and ***GN*** read as परा चेत्स्यान्मृषा. However, we have followed the reading of ***Vera***, as पराच्चेत्स्यान्मृषा.

253. ***RSV 1*** and ***RSV 2*** have wrong reading सेत्थं भूतस्वरूपा.

द्रष्टारो नैव विद्युः कथमियमभवद्युक्तिशून्येति[२५४] माया
मिथ्याजाड्यासुखात्मा परमपदविचारोज्झितानां विभाति।। ९६।।

अन्वयः - इत्थम्भूतस्वरूपेति अभिगदितुम् अशक्याकृतित्वात् सा अवाच्या। ये जगदृतमिति वादिनो देहनिष्ठाः ते अमी मायाभिभूताः। युक्तिहीना इयं कथमभवदिति द्रष्टारः (अपि) नैव विद्युः। मिथ्याजाड्यासुखात्मा (इयं) परमपदविचारोज्झितानां विभाति।

व्याख्या - इयम् अनिर्वचनीया। अस्याः, स्वरूपमेवम्, आकृतिरियम् इति इत्थम्भूततया वक्तुमशक्यत्वात्। ये देहाहन्तावन्तः इदं जगत् सत्यमिति मन्यमानाः ते जनाः अनया परिगताः। विज्ञातारः अपि कथमियमभवदिति न विजानीयुः। युक्त्या अगम्या इयम्। अस्याः स्वरूपं मिथ्या, जडता, सुखराहित्यञ्च। ये ब्रह्मविचारात् प्रमत्ताः तेषामियं विभाति। (९६)

९७.

ऐन्द्रजालिकस्य शक्तिरिव माया प्रत्यक्षतः ज्ञातुं न शक्या। केवलमनुमेया इति दिशति।

प्राक्शैलूषस्य विद्या हि[२५५] विदितविहृतेर्नैव दृश्याऽप्यरुपा
पश्चान्नानास्वरुपा प्रसरति शतशो नामरूपादिदात्री।
ब्राह्मी शक्तिस्त्वनन्ता कथमपि विदिता नैव केनाप्यमेया
भूतानां भौतिकानामुदयगतिवशात् साऽनुमातुञ्च शक्या।। ९७।।

अन्वयः - विदितविहृतेः प्राक् शैलूषस्य विद्या अरुपा नैव दृश्या अपि हि। पश्चात् शतशः नामरूपादिदात्री नानास्वरुपा प्रसरति। ब्राह्मी शक्तिः तु अनन्ता। नै केनापि अमेया। भूतानां भौतिकानां (च) उदयगतिवशात् सा कथमपि विदिता। अनुमातुं शक्या च।

व्याख्या - ऐन्द्रजालिकस्य इन्द्रजालविद्या, यावत्तस्या विहारः प्रकटितो भवति तावददृश्यैव। यतः तस्या रूपं नास्ति। पश्चाद् यदा प्राकट्यं नीता नानारूपादिमतः अनेकस्वरुपान् पदार्थान् सृजन्ती नानारूपा प्रसरति हि। एवमेव ब्रह्मणः शक्तिः माया अनन्तशक्तिमती। किन्तु न केनापि, प्रमाणैः अवगन्तुं शक्यते सा शक्तिः।

---

254. ***RSV 1*** and ***RSV 2*** read as कथमियमभवन्मुक्तिशून्येति. ***GN*** reads as कथमियमभवन्युक्तिशून्येति. However we have followed the reading of ***Vera*** as कथमियमभवद्युक्तिशून्येति.

255. All the previous editions have the reading न instead of हि. However as there is another term for negation (नैव), हि sounds to be more fit.

अमेयशक्तिः सा। तस्याः शक्तिः अनुमातुं शक्यते। यदा पञ्च भूतानि, भौतिकञ्चेदं पदार्थजातं बहिरुद्भूतं तदा तेन पदार्थजातेन अनुमातुं शक्या इति। (९७)

९८.

ब्राह्मी मायाशक्तिः न केनापि ज्ञायते इत्याह।

जगत्कर्ता कार्यं विदितमपि शक्तिर्न विदिता
चमूर्विद्यास्रष्टा[२५६] जगति किल दृश्योऽथ[२५७] पुरुषः।
यथा विद्या वेद्या न तु भवति केनापि सुधिया
तथा सर्गब्रह्मान्तरकृदपि शक्तिर्न विदिता।। ९८।।

अन्वयः - जगत्कर्ता कार्यम् अपि विदितम्। शक्तिर्न विदिता। अथ यथा जगति विद्यास्रष्टा पुरुषः दृश्यः चमूः (अपि दृश्या), विद्या तु केनापि सुधिया न वेद्या भवति तथा सर्गब्रह्मान्तरकृत् शक्तिरपि न विदिता।

व्याख्या - अस्य जगतः कर्ता (कर्तृभूतं) ब्रह्म विदितम्। कार्यभूतं जगदपि विदितम्। किन्तु या ब्रह्मणः शक्तिः, अस्य जगतः कारणं, सा तु अनिर्वाच्या अमेया। यथा लोके ऐन्द्रजालिकः दृश्यते तत्सृष्टा सेनापि द्रष्टुं शक्यते, तस्य इन्द्रजालविद्या तु अज्ञेया एव भवति, अदृश्यैव भवति, तथा सर्गस्य (अस्य जगतः सृष्टेः) तथा ब्रह्मणश्च अन्तरं, भेदं या कृतवती, सा शक्तिः मायापि न विदिता। (९८)

९९.

मायाशक्तिर्ब्रह्मणोऽभिन्ना इति कथयति।

भिन्ना शक्तिमतो न शक्तिरपि तच्छक्तेन मायावता[२५८]
सृष्टं कार्यशतं मृषैव विदितं शक्तो न मिथ्यामयः।
धीमन् तद्वदिहापि[२५९] पूर्णमभयं ब्रह्मैव शक्तं स्वयं
दृष्ट्वैतां पदवीं मयाऽद्य कथितां[२६०] नित्यं प्रसन्नो भव।। ९९।।

256. ***RSV 1***, ***RSV 2*** and ***GN*** read as चमूर्विद्यास्रष्टा. ***Vera*** has a totally different reading as चक्र्विद्यात्स्रष्टा. Here also the editor, having a wrong reading, points out छन्दोभङ्ग. He could have avoided this had he consulted ***RSV*** editions.

257. ***Vera*** reads as दृश्याथ.

258. ***Vera*** reads as मायाविना.

259. ***Vera*** wrongly reads as तत्तदिहापि. However commentary runs as तद्वदेव इहापि. The editor has failed to notice. (Actually in the manuscript (in the ALRC) reads as त दिहापि. And the space in between is filled by somebody with द्व).

260. ***Vera*** reads as कथिता.

अन्वयः - शक्तिः शक्तिमतः न भिन्ना। शक्तेन मायावता सृष्टं कार्यशतं तत् मृषैव (इति) विदितम्। शक्तः न मिथ्यामयः। हे धीमन्, तद्वद् इहापि पूर्णम् अभयं ब्रह्मैव स्वयं शक्तम्। मया अद्य कथिताम् एतां पदवीं दृष्ट्वा नित्यं प्रसन्नो भव।

व्याख्या - ऐन्द्रजालिकस्य शक्तिः तस्मादभिन्ना। तेन सृष्टं सर्वं मिथ्या। तथापि स न मिथ्या। तद्वत् इहापि माया मिथ्या। पूर्णम् अभयं ब्रह्मैव शक्तिमत्। तदेव सत्यम्। शक्त्या सृष्टम् इदं जगत्सर्वं मिथ्यैव। (९९)

१००.

किमर्थमागता माया इति प्रश्नस्योत्तरमाह -

मिथ्याकारैव शक्तिः कथमियमुदयं प्राप्नुयाच्चेच्छृणु[२६१] त्वं
गुल्माद्याचेतनानां कुसुमफलजनिं पश्य कालेषु जाताम्।
चिच्छक्तिस्तेषु तेषु प्रसरति नहि चेदव्यवस्थं समस्तं
भूयाद् भिन्नस्वभावं जगदिदमनघ[२६२] स्यादमर्यादमेव[२६३]।।१००।।

अन्वयः - मिथ्याकारा एव इयं शक्तिः कथम् उदयं प्राप्नुयात् इति चेत् त्वं शृणु। गुल्माद्याचेतनानां कालेषु जातां कुसुमफलजनिं पश्य । तेषु तेषु चिच्छक्तिः न प्रसरति चेत्, हे अनघ! भिन्नस्वभावं समस्तमिदं जगद् अव्यवस्थम् अमर्यादमेव स्यात्।

व्याख्या - शक्तिरियं मिथ्यैव चेत् किमर्थमुत्पन्ना इति प्रश्नः स्यात्। तत्रेदं समाधानम् — गुल्माद्यानि यान्यचेतनानि सन्ति तेषां काले काले जायमानां कुसुमोत्पत्तिं फलोत्पत्तिं च पश्य। तेषु तेषु चेतचाचेतनेषु चिच्छक्तिः, ब्राह्मी शक्तिः, माया, न प्रसरति चेत् इदं जगदेवं न स्यात्। इदानीं सर्वं भिन्नस्वभावम्। क्षीरं क्षीरमेव। निम्बं कटु। पिकः मधुरं कूजति। इत्यदिभिन्नस्वभावम्। तस्य तस्य कापि मर्यादा अस्ति कापि व्यवस्था च। सर्वं समर्यादम् इदम् अमर्यादम् अभविष्यद् यदि माया नाभविष्यदिति। (१००)

---

261. ***Vera*** reads as शृणुष्व.

262. ***Vera*** reads अनघस्स्याद्.

263. ***RSV 1***, ***RSV 2*** and ***GN*** read as स्यादमर्यादमेवम्. ***Vera*** reads स्यादमर्यादमेव, which we have followed.

१०१.

दृश्यमानं जगतो व्यवस्थितं नानात्वं कल्पितमेव इत्याह -

अण्डाम्भः शुक्लमेकं भवति बहुविधाः पक्षिणश्चित्रवर्णाः
नो चेत्तत्रात्मशक्तिर्हतनृपनगरीसाम्यमायाति सर्वम्।
[264]पश्येयात्तोयभावं शुचिरपि कटुकः शर्करात्वं समीयात्[265]
नीचा वेदान् पठेयुर्गिरिरपि जलदो वारिधिर्मृत्तिका स्यात्।। १०१।।

अन्वयः - अण्डाम्भः शुक्लमेकं चित्रवर्णाः बहुविधाः पक्षिणः भवन्ति, पश्य। तत्र आत्मशक्तिर्नो चेत् सर्वं हतनृपनगरीसाम्यमायाति। शुचिः अपि तोयभावमियात्। (एवं) कटुकः शर्करात्वं समीयात्। नीचाः वेदान् पठेयुः। गिरिः अपि जलदः स्यात्। वारिधिः मृत्तिका स्यात्।

व्याख्या - एकमेव शुक्लशोणितमिश्रम् अण्डस्यान्तर्विद्यमानं गर्भोदकं, चित्रवर्णाः अनेकरूपाः पक्षिणो भवन्ति। तत्र तत्र सर्वस्मिन्नपि पदार्थजाते आत्मशक्तिः, चिच्छक्तिः, मायाशक्तिः न भवति चेत् अराजकजनपदवत् सर्वमिदं जगदव्यवस्थं स्यात्। शुचिः, वह्निः, जलमभविष्यत्। कटुः पदार्थः मधुरः अभविष्यत्। पर्वतः मेघः अभविष्यत्। नीचाः, खलाः, संस्कारहीनाः वेदान् पठेयुः। समुद्रोऽपि मृण्मयः अभविष्यत्। यदि माया नाभविष्यदिति। (१०१)

१०२.

माया कथं विलयं नेयेति शिष्यः पृच्छति।

[266]अदृश्याऽवाच्याख्याकृतिकलनमाता भगवतो
यदि प्रोक्ता शक्तिः कथमिव च निःशेषविलयम्।
व्रजेत् साऽभिन्ना चेत् कथमिव परात्मैक्यमयते
विमुक्तिर्न्नो लभ्या[267] कथय सकलं मे गुणनिधे।। १०२।।

---

264. ***Vera*** reads as पश्यायात्तोयभावं.

265. ***RSV 1***, ***RSV 2*** and ***GN*** read wrongly as समीयाम्. Vera reads as समीयात्

266. Here previous editions have a lot of variants. The first pāda is given as अदृश्या वाच्याख्याकृतिकलमथा ना भगवतो in ***RSV 1*** and ***RSV 2*** . ***GN*** has it as अदृश्याऽवाच्याख्याकृतिकलमया ना भगवतो . ***Vera*** has it as अदृश्याऽवाच्याख्या कृतिकलमयाना भगवतो.

267. ***RSV 1*** and ***RSV 2*** read as विामुक्तिर्नालभ्या. ***GN*** reads as विमुक्तिर्नोलभ्या. And ***Vera*** has the reading विमुक्तिः मा लभ्या.

अन्वयः - अदृश्या अवाच्या आख्याकृतिकलनमाता शक्तिः यदि भगवतः प्रोक्ता कथमिव च निःशेषविलयं व्रजेत्? सा भगवतः अभिन्ना चेत् कथमिव परात्मैक्यमयते ? विमुक्तिः नो लभ्या किल? हे गुणनिधे सकलं मे कथय।

व्याख्या - द्रष्टुं ज्ञातुं च अशक्या अनिर्वाच्या, आख्याकृतिकलनकर्त्री नामरूपात्मकस्य जगतः कारणभूता, सा माया यदि ब्रह्मणः (अभिन्ना इति वा, इयमिति वा) इत्युच्यते तर्हि सा कुत्र विलयं व्रजेत्। किञ्च सा ब्रह्मणः अभिन्ना चेत् कथम् ऐक्यमियात्? कथं वा मुक्तिर्लब्धुं शक्या इति शिष्यः पृच्छति।

अत्र मुद्रितपुस्तके (आर. एस्. वाध्यार् सम्पादनयोः) 'आख्याकृतिकलमथा ना' इति प्रथमपादांशे पाठः। स दुर्घटः इति कृत्वा, द्राविडमूलग्रन्थ पर्यालोचनया (नामरूपप्पयिर्वित्तेन्ट्रुं शेप्पिय चिर्चक्ति — *nāmarūpappayirvittenṭruṃ ceppiya circakti*) आख्याकृति कलनमाता इति पाठः स्वीकृतः। (१०२)

१०३.

ब्रह्मणि लीनः स्याः चेत् माया स्वयं शाम्येदित्याह -

वह्नौ वायौ कृपीटे जगति च मणिमन्त्रौषधैः स्तम्भिते त-
च्छक्तिः कुत्र प्रयातेत्यपि न तु विदिता यद्वदत्रापि विद्वन्।
सत्यानन्दामृताब्धौ[268] यदि वसति भवान् विस्मरन्नामरूपे
शाम्येन्माया स्वयं तत्क्षणमिह परधा[269] नास्त्युपायस्त्रयीषु[270] ।। १०३ ।।

अन्वयः - हे विद्वन्! जगति वह्नौ वायौ कृपीटे च मणिमन्त्रौषधैः स्तम्भिते यद्वत् तच्छक्तिः प्रयाता अपि, कुत्र इति तु न विदिता (तद्वद्) अत्रापि। भवान् नामरूपे विस्मरन् सत्यानन्दामृताब्धौ यदि वसति (तर्हि) माया तत्क्षणं स्वयं शाम्येत्। परधा त्रयीषु उपायः नास्ति।

व्याख्या - अग्नौ वायौ जले च या या दाहकत्वादिरूपा शक्तिरस्ति सा मणिमन्त्रौषधैः स्तम्भे कृते सति गच्छत्येव। परं कुत्र गतेति वक्तुं ज्ञातुं वा न शक्यते किल। तद्वदिहापि। त्वं नामरूपे विस्मृत्य सच्चिदानन्दसागररूपे ब्रह्मणि

---

268. ***RSV 1*** and ***RSV 2*** read as सत्यानन्दामृताब्धिर्यदि. ***GN*** and ***Vera*** read as सत्यानन्दामृताब्धौ यदि.

269. ***RSV 1*** and ***RSV 2*** read as परधा. ***GN*** and ***Vera*** read as परया. This goes clearly against the *Prabhā* commentary which explains the term as अन्यथा.

270. ***Vera*** reads as नास्त्युपायः कथञ्चित्.

लीनो वससि चेत् माया तत्क्षणमेव स्वयं शाम्येदिति। मायाविलयनाय परधा प्रकारान्तरेण उपायः नास्तीति । (१०३)

१०४.

त्वं, नामरूपात्मकमिदं जगद् विस्मृत्य, सुखमास्व इत्युपदिशति।

अव्यक्तं व्यक्तभावं व्यवहरणकृते याति मृत्स्नैव कुम्भो
वाचा नश्येत्तयायं[271] मृदिति च कलनं सम्यगीक्षा हि यद्वत्।
नानानामानि रूपाण्यपि सकलगतान् जीवभेदांश्च विद्वन्
विस्मृत्यैव त्वमास्वामलगगनवपुर्निर्विकल्पे समाधौ।। १०४।।

अन्वयः - अव्यक्तं व्यवहरणकृते व्यक्तभावं याति । मृत्स्ना एव कुम्भः। तया वाचा एव अयं नश्येत्। मृदिति कलनं यद्वत् सम्यगीक्षा । तद्वत् हे विद्वन् त्वं नानानामानि रूपाण्यपि सकलगतान् जीवभेदांश्च विस्मृत्य अमलगगनवपुः (सन्) निर्विकल्पे समाधौ सुखितम् आस्व।

व्याख्या - अव्यक्तं यन्मूलकारणं तदेव व्यवहरणकृते व्यक्तभावं याति। कुम्भः वस्तुतः मृत्स्ना एव। यया वाचा कुम्भः उत्पादितः तयैव अयं नश्येत्। अर्थात् घट इति केवलं वाङ्मात्रम्। सत्यं वस्तु मृदेव। वागपयाति चेत् घटत्वमपि लीयेत। इयं मृदिति कलनमेव सम्यगीक्षा। तथैव नामरूपाभ्याम् अनेकतामापन्नम् इदं जगत्, तथा जीवभेदाश्च सर्वे नामरूपमात्रम्। सत्यं वस्तु अखण्डबोधः। अतः नामरूपात्मकम् इदं सर्वं विस्मृत्य चिदाकाशस्वरूपः सन् त्वं अखण्डे बोधे स्वस्वरूपे समाहितो भूत्वा सुखमास्व इति। (१०४)

१०५.

सच्चिदानन्दस्वरूपे स्वात्मनि स्थीयते चेत् मिथ्याजडशोकस्वरूपमिदं जडद् विलयं यायादित्याह -

नो कालत्रितये स्थितं जगदिदं शुग्जाड्यमिथ्यामयं
सत्यज्ञानसुखात्मकेऽपि विपुले भात्येव नश्येत् कथम्
एतच्चेदिति नीरबिम्बितवपुश्चाधोमुखं चञ्चलम्
तीरस्थस्वविलोकने कथय तत् कुत्र प्रलीनं मृषा।। १०५।।

---

271. ***RSV 1*** and ***RSV 2*** read वाचा नश्येत्तयायं. ***GN*** reads वाचा नश्ये तथा यत्. ***Vera*** reads वाचा नश्येत्तथा यत्.

अन्वयः - कालत्रितये शुग्जाड्यमिथ्यामयं नो कालत्रितये स्थितं जगदिदं शुग्जाड्यमिथ्यामयंजगदिदं विपुले सत्यज्ञानसुखात्मके कालत्रितये अपि नो स्थितम्। भात्येव। कथमेतन्नश्येदिति चेत् चञ्चलम् अधोमुखं च नीरबिम्बितवपुः तीरस्थस्वविलोकने कुत्र प्रलीनम्? कथय। तन्मृषा ।

व्याख्या - सत्यवस्तु ज्ञानस्वरूपम् अखण्डानन्दं च ब्रह्म। मायाकल्पितमिदं जगत्तु तद्विपरीतम्। सर्वथा तत् मिथ्याभूतं, जडात्मकं, शोकमयञ्च हि। तादृशं तत् विपुले अखण्डानन्दे कस्मिन्नपि काले नैव स्थितम् इति ज्ञातम्। तथापि भाति किल? कथमिदं नश्येदिति पृष्ट आह – कश्चिज्जनः जलाशयाभ्याशे स्थितः। जले प्रतिबिम्बितं स्ववपुः पश्यति। तच्चञ्चलम्। अधोमुखञ्च। तद् असत्यभूतमपि भाति। सत्यमिव भाति च। किन्तु यदा स एव द्रष्टा तीरस्थं बिम्बभूतं स्ववपुः पश्यति तदा तत् प्रतिबिम्बितं मृषाभूतं वपुः प्रलीनं भवति। तद्वदेव सच्चिदानन्दस्वरूपे ब्रह्मणि समाहिततया स्थितस्य इदं जगद्भानं विलीनं स्यादिति। (१०५)

१०६.

मायां जेतुं तद्विस्मरणं ब्रह्मविचारश्चैव शरणमित्याह -

किं कार्यं किमु कारणं जगदिदं कस्माद् बभूवेति या
चिन्ता सा विफलैव किन्तु जगतामुत्पत्तिनाशावपि।
विस्मृत्यैव निरन्तरं चिति सुखाम्भोधौ परब्रह्मणि
त्वं वर्तस्व विलीनचित्तचलनः सम्पूर्णबोधात्मना।। १०६।।

अन्वयः - किं कार्यम्? कारणं किमु? इदं जगत् कस्माद् बभूव? इति या चिन्ता सा विफला एव। किन्तु जगताम् उत्पत्तिविनाशौ विस्मृत्य विलीनचित्तचलनः सन् त्वं चिति सुखाम्भोधौ परब्रह्मणि निरन्तरं सम्पूर्णबोधात्मना वर्तस्व।

व्याख्या - कार्यरूपं जगदिदं कीदृशम्? अस्य कारणं किम्? इत्यादिचिन्ता निष्प्रयोजनैव। अतः एतां चिन्तां त्यक्त्वा सुखवारिधौ अखण्डबोधस्वरूपे चित्तचाञ्चल्यं विना सम्पूर्णबोधमात्रः सन् वर्तस्व। तदेव करणीयम्। नान्यत्किञ्चिद् इत्याह। (१०६)

१०७.

अखण्डानन्दबोधस्थितिसम्पादने वैराग्यं साहाय्यमाचरतीत्याह -

संसारे यावदाशा भवति जडधियो जायते चेद्विरागः
तावान् स्वस्य[२७२] स्वरूपे भवति सुदृढता [२७३]तच्चिराभ्यासयोगात्।
चित्तं वश्यं यदि स्यात्तव निजसुखयुक्तुच्छसंसारभोग-
स्थित्यां सत्यां न दोषो भवति चितितनोरम्बरस्येव पङ्कैः[२७४]।। १०७।।

अन्वयः - जडधियः संसारे यावदाशा भवति तावान् विरागः जायते चेत् तच्चिराभ्यासयोगात् स्वस्य स्वरूपे सुदृढता भवति। यदि तव चित्तं निजसुखयुग् वश्यं स्यात् तुच्छसंसारभोगचित्तं वश्यं यदि स्यात्तव निजसुखयुक्तुच्छसंसारभोग-स्थित्यां, चितितनोः अम्बरस्य पङ्कैरिव दोषो न भवति।

व्याख्या - तत्त्वपराङ्मुखस्य जनस्य संसारे यावती आशा भवति अस्मिन् नामरुपात्मकप्रपञ्चे, तव तावान् विरागः जायते चेत् तव चित्तं क्रमेण वश्यं स्यात्। चिरकालाभ्यासः तत्र सुकरतामापादयति। एवं चित्ते वशगे जाते सति तुच्छेऽस्मिन् संसारभोगे तिष्ठसि चेदपि तव दोषो न भवेत्। यथा चित्स्वरूपस्य आकाशस्य पङ्कैः दोषो न भवति, न लिप्यते पङ्कैः, तद्वदिति। (१०७)

१०८.

सर्वे जीवाः सच्चिदानन्दरूपाः इत्यत्र सन्देहः। आनन्दरूपता जीवानां कथं तुल्या भवेदिति सन्दिहानः शिष्यः पृच्छति।

स्वज्ञानानतिरिक्तपूर्णवपुषः सच्चित्सुखाख्या गुणा-
स्तुल्याः सर्वशरीरिणामिति वचः सम्यङ् न भातीव मे।
सर्वेषां चितिरेकिका यदहमित्येकानुभूतेर्गुरो
नानन्दस्य तथैक्यमस्ति यदयं सर्वैर्न विज्ञायते।। १०८।।

अन्वयः - स्वज्ञानानतिरिक्तपूर्णवपुषः सच्चित्सुखाख्याः गुणाः सर्वशरीरिणां तुल्याः इति वचः मे सम्यङ् न भाति। यत् सर्वेषाम् अहमिति एकानुभूतेः चितिः एकिका, तथा आनन्दस्य ऐक्यं नास्ति। यद् अयं सर्वैः न विज्ञायते।

व्याख्या - अखण्डबोधानन्दस्वरुपस्य ब्रह्मणः सत्ता, चित्त्वम्, आनन्दः इति गुणाः सर्वेषां जीवानां तुल्याः इति यदुक्तम् तन्मया सम्यङ् नावगतम्। सर्वेषु जीवेषु अहमिति स्फुरणमस्ति। तेन चित्त्वं सर्वेषु समं भासते इति ज्ञायते। एवम्

272. ***RSV 1*, *RSV 2*** and ***GN*** read as तावत्स्वस्य. ***Vera*** read as तावान् स्वस्य.
273. ***RSV 2*** reads wrongly as तश्चिराभ्यासयोगात्.
274. ***RSV 1*** and ***RSV 2*** read as पाकैः. ***GN*** and ***Vera*** read as पङ्कैः.

आनन्दः सर्वेषु समानतया न दृश्यते। अस्ति चेत् आत्मनः आनन्दत्वं सर्वैः ज्ञायेत। तत्तु न ज्ञायते। तस्मान्नास्तीति। (१०८)

१०९.

एते त्रयो गुणाः सर्वेषु जीवेषु समाना अपि वृत्तिभेदैः भिन्ना इव दृश्यन्ते, गृह्यन्ते च इति दर्शयति।

इत्थं शिष्ये ब्रुवाणे पुनरपि कथयामास चैकप्रसूने
रूपं स्पर्शः सुगन्धो यदि कुसुमगुणोऽप्येक एवैककेन।
वेद्योऽक्षेणैव यद्वत्परमचिति गुणाः सच्चिदानन्दसंज्ञाः
नानावृत्तिस्थभेदैः स्वयमपि गमिता लौकिकैर्भेदभावम्।। १०९।।

अन्वयः - शिष्ये इत्थं ब्रुवाणे पुनरपि (गुरुः) कथयामास। एकप्रसूने रूपं स्पर्शः सुगन्धः इति (सर्वः) अपि गुणः यद्यपि (अस्ति तथापि) एककेन अक्षेण एव यद्वद् वेद्यः भवति (तद्वत्) परमचिति सच्चिदानन्दसंज्ञाः (स्वरूपभेदाः) लौकिकैः नानावृत्तिस्थभेदैः स्वयमपि भेदभावं गमिताः।

व्याख्या - एकस्मिन्नेव कुसुमे रूपं रसो गन्धः इति बहवो गुणाः विद्यन्ते तथापि एकैको गुणः एकैकेन एव इन्द्रियेण ज्ञातुं शक्यन्ते।। एवमेव ब्रह्मणि सच्चिदानन्दरूपाः धर्माः (स्वरूपभेदा वा) नानावृत्तिभिर्भेदभावं गमिताः। अर्थात्, कुत्रचित् सत्तामात्रं प्रकाशते। कुत्रचित् सत्ता, चित्त्वं च। कुत्रचिदन्यत्र आनन्दः अधिकं प्रकाशते। का नाम वृत्तयः, तत्कृतभेदः कः इति अनुपदमुच्यते। (१०९)

११०.

एकमेव सच्चिदानन्दं ब्रह्म इच्छाज्ञानक्रियावशात् जीवेषु भिन्नवृत्तिकं दृश्यते। हृद्वृत्तयश्च सत्वादिभिर्गुणैः त्रिविधाः इत्याह -

तमोरजःसत्वगुणैर्विभिन्ना
हृद्वृत्तयो मूढसुघोरशान्ताः।
सदैकरूपा अपि सच्चिदाद्या[२७५]
भिन्ना [२७६]यदासु प्रतिबिम्बितास्ते।। ११०।।

275. ***Vera*** reads as संविदाद्या.

276. All the previous editions have the reading यदा सुप्रतिबिम्बितास्ते. However the *Prabhā* commentary of the edition ***Vera*** clearly expresses आसु वृत्तिषु प्रतिबिम्बिताः . The editor seems to have missed it.

अन्वयः - हृद्वृत्तयः तमोरजःसत्वगुणैः मूढसुघोरशान्ताः। सच्चिदाद्याः सदा एकरूपा अपि यदा आसु प्रतिबिम्बिताः ते भिन्नाः (दृश्यन्ते)।

व्याख्या - सत्वरजस्तमोगुणात्मिकायां मायायां प्रतिबिम्बिताः जीवाः वृत्तिमन्तः। वृत्तयश्च तिस्रः। मूढा घोरा शान्ता चेति। तमोगुणप्रधाना मूढा। रजोगुणप्रधाना घोरा। सत्वगुणप्रधाना शान्ता चेति। आसु वृत्तिषु प्रतिबिम्बिताः, वस्तुतः सर्वेषु जावेषु समाना अपि, सच्चित्सुखाद्याः भिन्ना इव दृश्यन्ते इति। (११०)

११९.

तदेव स्पष्टयति।

कुड्यादौ जडरूपके प्रविलसत्सन्मात्रमेव स्फुटं
[277]कामाद्यातुरचित्तवृत्तिषु सुखं ब्राह्मन्तु न व्यज्यते।
सच्चित्तत्र चकास्ति रागविमुखेष्वेतत् त्रयं[278] भासते
मुक्त्वा काममलं प्रशान्तहृदयेष्वानन्द एवाधिकम्[279]।। १११।।

अन्वयः - जडरूपके कुड्यादौ सन्मात्रमेव स्फुटं प्रविलसद् अस्ति। कामाद्यातुरचित्तवृत्तिषु ब्राह्मं सुखं तु न व्यज्यते। सच्चित् तत्र चकास्ति। रागविमुखेषु एतत् त्रयं भासते। काममलं मुक्त्वा प्रशान्तहृदयेष्वानन्द एवाधिकम् (भासते)।

व्याख्या - तमोवृत्तौ कुड्यकुसूलादौ सन्मात्रं प्रकाशते। कामाद्यातुरचित्तवृत्तिषु घोरासु सच्चित् चकास्ति। ब्राह्मं सुखं तु तत्र न भासते। रागविमुखेषु त्रयमपि भासते। ये कामाद्यज्ञानमलमपहाय प्रशान्तहृदयाः सन्ति जनाः तेषु आनन्द एवाधिकं प्रकाशते इति। (१११)

११२.

सदादीनां लक्षणमाह -

सत्यानन्दचिताञ्च लक्ष्म भगवन् ब्रूहीति चेदुच्यते
यत्कालत्रितयेष्वबाध्यमपि यत्सत्यञ्चितिस्तद्भवेत्।
यत्सर्वानवभासयत् स्वयमपि स्वेनैव भातं सुखं
ब्रह्माकाररसानुभूतिसमये यल्लभ्यते निर्भरम्।। ११२।।

277. ***GN*** wrongly reads कामद्यातुरवृत्तिषु.

278. ***Vera*** reads as तया.

279. ***RSV 1*** and ***RSV 2*** read as अधिकम्. ***GN*** and ***Vera*** read as अधिकः.

अन्वयः - हे भगवन् सत्यानन्दचितां लक्ष्म ब्रूहि इत्युच्यते चेत् यत् कालत्रितयेषु अपि अबाध्यं तत् सत्यम्। यत् सर्वान् अवभासयत् स्वयमपि स्वेनैव भातं तत् चितिर्भवेत्। ब्रह्माकाररसानुभूतिसमये यल्लभ्यते तत् निर्भरं सुखम्।

व्याख्या - त्रैकालिकाबाध्यत्वं सतः लक्षणम्। यत् स्वयं प्रकाशते प्रकाशयति चान्यान् सर्वान् तत् चित्। इष्टलाभकाले योऽनुभवो जायते तत्सुखम्। ब्रह्माकाररसानुभूतिसमये यल्लभ्यते तत्तु निर्भरं सुखम्। (११२)

११३.

सच्चिदानन्दं ब्रह्मैवाहम् इति ब्रह्मानुभवः कथं जायते? श्रुत्यन्तमहावाक्यैः सच्चिदानन्दं ब्रह्मेति उद्घुष्यमाणस्य अनुभवः कथं साधनीयः इति शिष्यः पृच्छति।

नश्यद्देहगतं शरीरिणमिमं वेदान्तवाक्यानि वा
सत्यानन्दचितिं वदन्त्यपि कथं ब्रह्मेति तन्निर्मलम्।
संवित्सत्यसुखोऽहमित्यनुभवो भूयात्कथं वाऽस्य भोः
कोशागारविनाशमत्तगज मे सर्वं वदस्वादरात्।। ११३।।

अन्वयः - नश्यद्देहगतम् इमं शरीरिणं वेदान्तवाक्यानि सत्यानन्दचितिं वा निर्मलं ब्रह्म इति वाऽपि कथयन्ति। संवित्सत्यसुखोऽहमिति अस्य अनुभवः कथं भूयादिति सर्वं मे भोः कोशागारविनाशमत्तगज! आदराद् वदस्व।

व्याख्या - शरीरमिदं नश्यत्। शरीरी तु नित्यः। आनन्दस्वरूप इति, अखण्डबोधस्वरूप इति, निर्मलमिति, सर्वव्यापि इति, ब्रह्मेति वा उपनिषत्सु महावाक्यैः लक्षितः। परम्, अहं तद्ब्रह्मैव, सच्चिदानन्दस्वरूपोऽहम् इति साक्षादनुभवः कथं मे भूयादिति तन्मार्गमाचक्ष्व इति शिष्यः आदरेण पञ्चकोशाख्यदृढागारविभञ्जनसमर्थेति गुरुं सम्बुध्य पृच्छति। (११३)

११४.

कालत्रितयेऽपि सन् जीवः इति सूक्ष्मं पश्य। सत्त्वं ज्ञायते इत्याह ।

संस्मृत्यातीतजन्मव्रजकृतसुकृताघौघमुच्छोकपङ्क्तेः[२८०]
पश्चाल्लोकान्तरेष्वप्यमितसुखगतिप्रार्थनासम्भवाच्च।
नाशं प्राप्तेषु मर्त्यामरदनुजशरीरेष्वेव जातेषु भूयो
यस्मात्तस्मादयं सन् घट इव गगनं सत्वमेतस्य[२८१] **सिद्धम्**[२८२] **।। ११४।।**

---

280. ***RSV 1*** and ***RSV 2*** read as संस्मृत्यातीतजन्मव्रजकृतसुकृताघौघजाच्छोकपङ्क्तेः. ***GN*** and ***Vera*** read as संस्मृत्यातीतजन्मव्रजकृतसुकृताघौघमुच्छोकपङ्क्तेः.

281. ***RSV 1*** and ***RSV 2*** read as सत्वमेतस्य. ***GN*** and ***Vera*** read as सत्यमेतस्य.

282. ***RSV 1***, ***RSV 2*** and ***GN*** read as सिद्धम्. ***Vera*** reads as विद्धि.

अन्वयः - अतीतजन्मव्रजकृतसुकृताघौघमुच्छोकपङ्क्तेः संस्मृत्या पश्चात् लोकान्तरेषु अमितसुखगतिप्रार्थनासम्भवाद् अपि जातेषु मर्त्यामरदनुजशरीरेषु नाशं प्राप्तेषु यस्माद् भूयः अपि अयं सन् जीवः, घटे (नाशं प्राप्ते) गगनम् इव (भासते), (तस्माद्) एतस्य सत्त्वं सिद्धम्।

व्याख्या - अतीतेषु बहुषु जन्मव्रजेषु कृते ये सुकृतदुष्कृते तज्जन्यस्य सुखदुःखपरम्पराविशेषस्य (सुकृतात्, मुत्, सन्तोषः; दुष्कृताच्च शोकः तयोः पङ्क्तिः) संस्मृत्या, सम्यगवधारणया, अनुमानेन इदं ज्ञायते यत् जन्मस्तोमैः आर्जितस्य पुण्यपापफलरूपस्य कर्मफलस्य भोगायैव इदनीन्तनशरीरं स्वीकृतमिति। एवं जन्मतः प्रागपि शरीरी आसीदित्यनुमीयते। एवमेव, भाविनि काले सुखं मे स्यात्, स्वर्गतिर्भूयाद्देहात्यये इति सम्भावनया भाविनि काले जीवस्य सत्वमनुमीयते। एवम्, अधुना अयं जीवः सन्निति ज्ञायते। बहुषु जातेषु शरीरेषु सुरनरादिषु नष्टेष्वपि शरीरी अयमसौ सन्निति भाति। यथा घटे नष्टेऽपि आकाशः (घटावच्छिन्नः) सन्निति भाति तथा। एवम् कालत्रयेऽपि सत्त्वात् सिद्धमस्य सत्त्वमिति। (११४)

११५.

चित्त्वम् आनन्दरूपत्वञ्च प्रकाशयति।

अज्ञानाकारसुप्तौ निशि मिहिरमुखज्योतिषामप्यभावे
ज्ञातृत्वादर्थराशेरपि बहुतमसः सा चितिर्वस्तुभूता।
भोगाभोगोपभोगेष्वपि निजवपुषि प्रेमसारैकसत्त्वा-
दानन्दोऽयं स्वभावादपि च[२८३] समुदितो[२८४] वत्स जानीहि सम्यक्।। ११५।।

अन्वयः - निशि मिहिरमुखज्योतिषाम् अभावेऽपि, अज्ञानाकारसुप्तौ अपि, अर्थराशेः बहुतमसः अपि, ज्ञातृत्वात् सा वस्तुभूता चितिः। भोगाभोगोपभोगेष्वपि प्रेमसारैकसत्त्वाद् अयं स्वभावादपि निजवपुषि आनन्दः (इति) च समुदितः। हे वत्स सम्यग् जानीहि।

व्याख्या - रात्रौ प्रकाशकानां सूर्यादीनाम् अभावेऽपि, गाढान्धकारस्वरूपे सुषुप्तौ अपि, ज्ञाता (जीवः, येन ज्ञायते) भवत्येव। अयं ज्ञानस्वरूपः, चित्स्वरूपः, अर्थराशिं गाढं तमः अपि जानीते। एवमेव सदा प्रेमभरप्रसरः वरीवर्ति तस्मिन् जीवे। भोगो वा उभोगो वा फपभोगो वा भवतु। सर्वस्मिन्नपि सर्वदापि प्रेमसारैकसत्त्वं

283. ***RSV 1*** and ***RSV 2*** drop this inadvertently.

284. ***RSV*** and ***RSV2*** read as समुचितः ***GN*** and ***Vera*** read as समुदितः.

राजते, निजवपुषि, निजस्वरूपे (अत्र वपुश्शब्दः स्वरूपार्थे प्रयुक्त इति द्रष्टव्यम्।)। हे वत्स तेनायमानन्दस्वरूप इति जानीहीति। (११५)

११६.

आत्मैवानन्दः इति सयुक्तिकं प्रदर्शयति।

अन्नं[285] पानादि सर्वं यदिह सुखततेः साधनं वल्लभं तत्
सर्वेषां सोऽयमात्मा[286] यदि भवति तथा[287] व्यर्थता वेदवाचाम्।
इत्थम्भूतः परात्मापि च विषयसुखे साधनञ्चेत्तदानीं
वत्साचक्ष्व त्वदीयं सुखमनुभविता[288] कोस्ति नात्मद्वयं स्यात्।। ११६।।

अन्वयः - यत् सुखततेः साधनम् अन्नं पानादि तत् सर्वेषां वल्लभम्। यदि सोऽयमात्मा तथा भवति (तर्हि) वेदवाचां व्यर्थता। इत्थम्भूतः परात्मा अपि विषयसुखे साधनञ्चेत् हे वत्स! त्वदीयं सुखम् अनुभविता कोऽस्ति? आत्मद्वयं न स्यात्। आचक्ष्व।

व्याख्या - अन्नपानादि सुखसाधनत्वेन सर्वेषाम् इष्टम्। यद्यात्मा प्रियस्तर्हि सोऽपि सुखसाधनं स्यादिति चिन्तायां प्रसरत्यां वदति – तर्हि वेदवाक्यानि निरर्थकानि स्युः, आत्मनस्तु कामाय सर्वं प्रियं भवति, आनन्दो ब्रह्मेति व्यजानात् इत्यादीनि। किञ्च युक्तिरपि नास्ति। यद्यात्मा सुखसाधनं भवति, को वा सुखमनुभवति? सुखसाधम् एक आत्मा; भोक्ता अन्यः इति आत्मद्वयं न भवितुमर्हतीति। (११६)

११७.

सुखसाधनेभ्यो विषयेभ्यः, प्रियतर आत्मा सुतरां भिद्यत इति दर्शयति।

स्यात्प्रीतिर्विषये परं निजसुखे स्यात् प्रेम भूयस्तरां
व्यत्यस्तं विषये सुखं निजसुखं व्यत्येति न क्वापि च।
मोक्तुं भोक्तुमपि क्षमो हि विषयो नात्मा तथा शक्यते
त्यक्ता यो विषयान् स केन हि परित्यक्तुं पुनः शक्यते।। ११७।।

---

285. ***Vera*** reads as अन्धं.

286. ***RSV 1*** and ***RSV 2*** read as सोऽयमात्मा. ***GN*** reads as योऽयमात्मा. ***Vera*** reads as यो यमात्मा.

287. ***GN*** and ***Vera*** read as तदा.

288. ***Vera*** reads as अनुभवति. This is against the commentary which reads as अनुभविता (The commentary runs as तस्य अनुभविता अन्यस्तस्याप्यन्य इत्यनवस्था च प्रसज्येत।). Having failed to notice this, the editor apprehends a non-existant छन्दोभङ्ग.

अन्वयः - विषये प्रीतिः स्यात्। परं निजसुखे भूयस्तरां प्रेम स्यात्। विषये सुखं व्यत्यस्तम्। निजसुखं न क्वापि व्यत्येति। विषयः, भोक्तुं वा मोक्तुं वा शक्यते। आत्मा न तथा शक्यते। विषयान् यः त्यक्ता स आत्मा केन हि पुनः परित्यक्तुं शक्यते?

व्याख्या - सुखसाधनेषु विषयेषु प्रीतिर्भवति (सर्वस्यापि)। किन्तु आत्मनि अधिकास्ति प्रीतिः। किञ्च विषयसुखे विषयभेदतः सुखे भेदो दृश्यते। आत्मसुखं तु सदा समानाकारम्। आत्मनः स्वातन्त्र्यमस्ति अन्येषु सुखसाधनेषु विषयेषु, भोक्तुं वा त्यक्तुं वा। आत्मा कदापि न त्यज्यते। कथं वा त्यक्तुं शक्यते? यः विषयान् त्यजति स आत्मा, त्यक्ता, केन वा त्यक्तुं शक्यते? (११७)

११८.

आत्मनः अहेयताम् अवध्यताञ्च दर्शयति।

तप्यत्कोपवशादहं हि मरणं गच्छेयमित्यातुराः
केचित्स्वं स्वयमुत्सृजन्ति यदतः स्वात्यक्तृभावः[289] कुतः।
एवञ्चेच्छृणु यो वपुस्त्यजति स[290] त्यक्ता न तु स्वं मनाक्
स्वस्मिन् [291]क्वाप्यरुचिर्जनस्य न भवेत् कस्यापि कोपादृते[292]।। ११८।।

अन्वयः - केचिदातुराः तप्यत्कोपवशाद् अहं मरणं गच्छेयमिति स्वयं स्वम् यत् उत्सृजन्ति अतः स्वात्यक्तृभावः कुतः? एवञ्चेत् शृणु। यो वपुस्त्यजति सः न स्वं त्यक्ता । जनस्य स्वस्मिन् मनागपि क्वापि अरुचिः न भवेत्। कोपात् ऋते।

व्याख्या - केचिज्जनाः संसारतापतप्ताः दीनाः तोपेन कोपेन च स्वयं स्वम् उत्सृजन्ति किल? तस्मात् आत्मा परित्यक्तुं न शक्यते इति कथं वक्तुमुचितम्? स्वत्यक्तृभावः दृश्यते। स्व-अत्यक्तृभावः कथम् इति प्रश्नः। तमेतं प्रश्नमुत्थाप्य

---

289. ***RSV 1***, ***RSV 2*** and ***GN*** read as स्याद्धन्तृभावः. ***Vera*** reads as स्वात्यक्तभावः. However the Adyar manuscript based on which the edition has been carried out, has the reading स्वात्यक्त्रभावः. But it seems that there is a scribal error. In the previous verse it is said that the self cannot abandon oneself. Now the disciple asks : Some people commit suicide. Hence how can we say that self cannot abandon oneself? Hence it should be स्व - अत्यक्तृभावः.

290. ***RSV 1*** and ***RSV 2*** read as न त्यक्ता वपुः स्वं मनाक्. ***GN*** reads as सः त्यक्ता वपुः स्वं मनाक्. ***Vera*** reads as स त्यक्ता वपुः स्वं मनाक्.

291. ***Vera*** reads स्वाप्यरुचिः.

292. ***RSV 1*** and ***RSV 2*** read as देहादृते. ***GN*** and ***Vera*** read as कोपादृते.

समादधाति। यो वपुस्त्यजति सः स्वं न त्यजति। स्वस्य वपुः त्यज्यते। न स्वयम्। कस्यपि जीवस्य कदापि मनागपि आत्मनि अरुचिः न स्यात्। न दृश्यते। यदा तु क्रोधकलुषिता धीर्भवति, तदानीमेव केवलं आत्मन्यरुचिर्भवति। नान्यत्रेति। (११८)

११९.

सर्वस्यापि प्रियतमं वस्तु आत्मैवेति दर्शयति।

वित्तेभ्यो दयितः सुतस्तनुरतोपीष्टा[२९३] ततोऽपीन्द्रिया-
ण्यन्तःस्थं करणं प्रियं ततोऽप्यसुगणो जीवस्ततोऽतिप्रियः।
आत्मेहापि च स[२९४] त्रिधैव भविता वत्स[२९५] शृणुष्वादिमो
[२९६]गौणोऽन्यस्तु मृषात्मकस्तदपरः कर्त्रात्मकश्च क्रमात्।। ११९।।

अन्वयः - वित्तेभ्यः सुतः दयितः। अतोऽपि तनुः इष्टा। ततोऽपि इन्द्रियाणि। ततोऽपि अन्तःस्थं करणं प्रियम्। ततोऽपि असुगणः। ततः अतिप्रियः जीवः। इह आत्मा त्रिधा एव भविता। हे वत्स शृणुष्व। आदिमो गौणः । अन्यस्तु मृषात्मकः। तदपरः कर्त्रात्मकश्चेति क्रमात्।

व्याख्या - लोके किं प्रियं स्याज्जनस्य? सुखदातृत्वेन चिन्त्यमानं धनम्। धनादपि सुतः दयिततरः। ततोऽपि स्वशरीरे प्रीतिरधिका। ततोऽपि प्रियाः प्राणाः। ततोऽपि प्रियः जीवः, आत्मा। आत्मैव प्रियतमः। तत्र आत्माभासास्त्रयो भवन्ति यत्र प्रीतिर्दृश्यते जीवानाम्। वस्तुतः प्रत्यगात्मनि ब्रह्मणि एव प्रीतिरिति दर्शनाय आत्माभासाः त्रयः प्रदर्श्यन्ते। जीवः तान् आत्मैवेति पश्यति। तो त्रयः अमी – गौण आत्मा, मृषात्मकः, कर्त्रात्मकश्चेति। (११९)

१२०.

एतेभ्योऽपि भूयस्तरं प्रियं प्रत्यगात्मन्येवेति दर्शयति।

वृद्धत्वे द्रव्यहेतोः स भवति दयितः पुत्रको गौण आत्मा
मिथ्यात्मा स प्रियः स्यादनुभवसमये सम्पदां स्त्र्यादिकानाम्।
कर्त्रात्मा[२९७] वल्लभः[२९८] स्यान्निजसुखगतिसंप्रार्थनाद् दृश्यनाशे
चित्सत्यानन्दमुक्तौ बहुदयिततमः स्यादयं प्रत्यगात्मा।। १२०।।

---

293. ***RSV 1***, ***RSV 2*** and ***GN*** wrongly read as सुतस्तनुरतोपिष्टा. ***Vera*** reads as सुतस्तनुरतो नेत्रं.
294. ***RSV 1*** and ***RSV 2*** read as सा त्रिधैव. ***GN*** reads as सत्रिधैव. ***Vera*** reads as स त्रिधैव.
295. In order to avoid वृत्तभङ्ग, one may have the reading धीमन्.
296. ***Vera*** reads as गौण्यो.
297. All the previous editions have the reading कर्तात्मा.
298. ***Vera*** reads as वल्लभस्यान्निजसुकृतगतिप्रार्थनायामभीक्ष्णं.

अन्वयः - वृद्धत्वे द्रव्यहेतोः गौण आत्मा स पुत्रको दयितः भवति । स्त्र्यादिकानां सम्पदाम् अनुभवसमये स मिथ्यात्मा प्रियः स्यात्। दृश्यनाशे निजसुखगतिसंप्रार्थनात् कर्त्रात्मा वल्लभः स्यात्। चित्सत्यानन्दमुक्तौ अयं प्रत्यगात्मा बहुदयिततमः स्यात्।

व्याख्या - स्वेन सम्पादितं स्वीयं वित्तं वार्धक्ये पुत्रमेव गमिष्यतीति पुत्रः आत्मा प्रियो भवति। सः गौण आत्मा। स्त्र्यादिकानां भोगानामनुभवसमये मृषात्मा देहः, आत्मेति चिन्त्यते। स प्रियो भवति। दृश्यानाशे दृश्यशरीरनाशे आत्मनः सुखोर्ध्वगमनाय कर्तृरूप आत्मा प्रियो भवति। सच्चिदानन्दरूपप्रत्यभिज्ञानविषये प्रत्यगात्मैव प्रियतमो भवतीति। (१२०)

१२१.

अन्येषु सुखसाधनेषु अनुकूलवेदनत्वं प्रियकारणं भवति। आत्मनि न तथा। अतः आत्मा प्रेमस्वरूप इति जानीहि इत्याह -

शार्दूलोऽप्यनुकूल एव भविता चेद्वल्लभो नन्दनो
[299]द्वेष्यश्चेदनुकूलतां न लभते वत्स[300] तृणाद्यं भुवि।
औदासीन्यपदं लभेत चिदपि प्रायस्तथा वर्तते
स्वानन्दं परिमृश्य तिष्ठ सुखितः स्वाराज्यसिंहासने।। १२१।।

अन्वयः - शार्दूलोऽपि अनुकूलश्चेत् वल्लभः एव भविता। द्वेष्यश्चेत् नन्दनोऽपि अनुकूलतां न लभते। हे वत्स तृणाद्यम् औदासीन्यपदं लभेत। चिदपि प्रायः तथा वर्तते। स्वानन्दं परिमृश्य स्वाराज्यसिंहासने सुखितः तिष्ठ।

व्याख्या - भयजनकः शार्दूलोऽपि अनुकूलश्चेत् प्रियो भवति। द्वेष्यश्चेत् पुत्रोऽपि नानुकूलः। तेन च न प्रियः। लोके तृणाद्यम् अनुकूलतां वा प्रतिकूलतां वा स्वतो न बिभर्ति। तेन औदासीन्यं भजते। अर्थात् प्रियं वा अप्रियं वा न भवतीति। चित् निर्मलज्ञानस्वरूपः आत्मा प्रायः सर्वदा प्रिय एव भवति। आत्मनः अनिबन्धनम् अहैतुकं प्रेमस्वरूपं विज्ञाय स्वाराज्यसिंहासने सुखितः आस्व इत्याह गुरुः। (१२१)

१२२.

आनन्दस्य कति भेदाः इति पृष्टः अष्टधाऽऽनन्द इत्याह -

---

299. ***RSV 1*** and ***RSV 2*** have the wrong reading द्वेष्यश्रेदनुकूलतां.

300. In order to avoid छन्दोभङ्ग, one may have the reading धीमन् or तद्वत्.

मान्यानां मान्यपादाम्बुज गुरुचरणानन्दभेदाः[301] कतीह
ब्रह्मानन्दस्तथैकः परमचिचितिमयो वासनानन्द एकः।
अन्यः शब्दादिकोत्थः[302] कतिचन कथयन्त्यष्टधैतेषु पञ्चा-
प्यन्ये लीना इतीत्थं पुनरिह कथयाम्यष्टधानन्दभेदान्।। १२२।।

अन्वयः - "मान्यानां मान्यपादाम्बुज हे गुरुचरण ! इह आनन्दभेदाः कति?" (इति पृच्छ्यते? उच्यते।) ब्रह्मानन्दः एकः। तथा परमचिचितिमयः वासनानन्द एकः। अन्यः शब्दादिकोत्थः (इति) । केचन कथयन्ति अष्टधा इति। एतेषु अन्ये पञ्चापि लीनाः इति इत्थम्। इह पुनः अष्टधा आनन्दभेदान् कथयामि।

व्याख्या - ब्रह्मानन्दः, वासनानन्दः, विषयानन्दः (अस्यैव शब्दादिभयः विषयेभ्यः उत्थिततत्वात् शब्दादिकोत्थः इति नामान्तरम्। इति त्रयः आनन्दाः। केचन अष्टधा आनन्दः इति कथयन्ति। इतरे पञ्चापि भेदाः एतेषु त्रिषु अन्तर्भूता इत्यतः त्रिधेति कथितः। अधुना अहं सरवानष्टापि भेदान् तव कथयामीति गुरुः वदति।

अस्मिन् पद्ये प्रथमपादस्य अन्तिमोऽंशः, पूर्वतनेषु सर्वेष्वपि सम्पादनेषु, "गुरुचरणानन्दाः कतीत्युच्यते" इति पठितः अस्ति। अयं पाठः छन्दोभङ्गाय कल्पते इति कृत्वा प्रकृतानुसारी "गुरुचरणानन्दभेदाः कतीह" पाठः अस्माभिः कल्पितः। (१२२)

१२३.

अष्ट आनन्दभेदान् निरुपयति।

जातं भोगात्सुखं यद्विषयसुखमिदं ब्रह्मसौख्यं सुषुप्तौ
निद्रान्ते वासनाख्यं सुखमिह सकलानन्दसंस्थात्मसौख्यम्[303]।
योगोत्थं मुख्यसौख्यं स्वसुखमिदमुदासीनकालोत्थितं य-
च्चाद्वैतं पूर्णदृष्ट्या जनितमथ[304] महावाक्यजं ज्ञानसौख्यम्।। १२३।।

---

301. All the previous editions have the reading गुरुचरणानन्दाः कतीत्युच्यते. This causes metrical inconcongruity. In order to avoid this we have altered the reading to गुरुचरणानन्दभेदाः कतीह.

302. ***RSV 1***, and ***RSV 2*** read as शब्दादिकोऽर्थः. ***GN*** reads शब्दादिकोऽर्थं. ***Vera*** reads as शब्दादिकोत्थं.

303. ***Vera*** reads as सकलानन्दात्मसौख्यम्. Having not consulted other editions, the editor, with this wrong reading, points out वृत्तभङ्ग.

304. ***Vera*** reads as जनितमपि.

अन्वयः - भोगाद् यत् सुखं जातं (तद) इदं विषयसुखम्। सुषुप्तौ ब्रह्मसौख्यम्। निद्रान्ते वासनाख्यं सुखम्। सकलानन्दसंस्था आत्मसौख्यम्। योगोत्थं मुख्यसौख्यम्। उदासीनकालोत्थितं स्वसुखम्। यत् पूर्णदृष्ट्या तद् अद्वैतम्। अथ महावाक्यजं ज्ञानसौख्यम्।

व्याख्या - विषयसुखं, ब्रह्मसुखं, वासनासुखम्, आत्मसुखं, मुख्यसुखं, निजसुखम्, अद्वैतसुखं, ज्ञानसुखम् इतामे अष्ट भेदा आनन्दस्य। तत्र विषयेभ्यः, तद्भोगात् जातं सुखं विषयसुखम्। सुषुप्तौ अनुभूयमानं ब्रह्मसुखम्। निद्रान्ते यत् कञ्चित्कालं तिष्ति तद् वासनासुखम्। सकलानन्दानां निदानम् आत्मैवेति स्थितौ यत्सुखं तदात्मसुखम्। योगाभ्यासात् समाधौ अनुभूयमानं सुखं मुख्यसुखम्। उदासीनभावे प्रियाप्रिये विना उदासीनतया स्थितौ अनुभूयमानं स्वसुखम्, अथवा निजसुखम्। यद् अद्वैतस्थितौ अनुभूयते तद् अद्वैतसुखम्। यच्च महावाक्यस्य श्रवणादिना सञ्जायमानं सुखं तद् ज्ञानसुखम्। (१२३)

१२४.

विषयानन्दस्य स्वरूपमाह –

जाग्रत्कालशुचापनोदविधये[305] सम्यक् शयित्वैकदा
शय्यायां पुरुषस्य सुप्तिसमये ह्यन्तर्मुखे चेतसि[306]।
छाया या[307] प्रतिबिम्बिता निजचितेरानन्दरूपा च तां[308]
वत्सेमां सुखकोविदास्तु विषयानन्दं समाचक्षते।। १२४।।

अन्वयः - जाग्रत्कालशुचापनोदविधये एकदा शय्यायां सम्यक् शयित्वा सुप्तिसमये पुरुषस्य अन्तर्मुखे चेतसि निजचितेः या आनन्दरूपा छाया प्रतिबिम्बिता तामिमां हे वत्स सुखकोविदाः विषयानन्दं समाचक्षते।

व्याख्या - लौकिकव्यवहारेभ्यः जातस्य शोकस्य अपनोदनाय पुरुषः स्वपिति। तस्य शय्यायां सुखं शयानस्य निद्राणस्य अन्तर्मुखे मनसि चितेः छाया प्रतिबिम्बिता भवति। आनन्दरूपा सा छाया भवति विषयानन्दः इति।

---

305. ***RSV 1*** and ***RSV 2*** read as जाग्रत्कालशुचापनोदविधये. ***GN*** and ***Vera*** read as जाग्रत्कालशुचोपनोदविधये.

306. ***RSV 1*** and ***RSV 2*** wrongly read as चेतसी.

307. ***Vera*** reads as छायायां.

308. ***GN*** reads as निजचितेरानन्दरूपात्रतां. ***Vera*** reads as नजचितेरानन्दरूपाऽत्र तां.

जाग्रत्कालशुचापनोदविधये – जाग्रत्काले जाता या शुचा (शोकः) तस्याः अपनोदनाय । (१२४)

१२५.

ब्रह्मानन्दस्य स्वरूपमाह -

सङ्गोत्पन्नसुखं त्रिपुट्यपि[309] शुगित्याज्ञाय[310] पूर्णात्मना
नीडे स्वे पतयालुपत्रिवदसौ जीवः परेणैकताम् ।
निश्चित्तं समुपेत्य सत्सुखमयो यत्रानुभुङ्क्ते[311] सुखं
ब्रह्मानन्दमुशन्ति तन्निरुपमं वेदान्तविज्ञानिनः ।। १२५ ।।

अन्वयः - सङ्गोत्पन्नसुखम् अपि त्रिपुटी शुक् इति आज्ञाय पूर्णात्मना स्वे नीडे पतयालुपत्रिवद् असौ जीवः परेण निश्चित्तम् एकतां समुपेत्य यत्र सत्सुखमयः स्वयम् अनुभुङ्क्ते तद् वेदान्तविज्ञानिनः निरुपमं ब्रह्मानन्दम् उशन्ति ।

व्याख्या - विषयसुखमपि ज्ञातृज्ञानज्ञेयरूपवत्वात् त्रिपुटीरूपेण शुगेव, श्रान्तिरेव, शोक एव, नानन्दं ददातीति विचिन्त्य कदाचन जनाः स्वे नीडे सुखं निरुपद्रवं स्थातुं पतनशीलाः पक्षीव पूर्णात्मना परमेण अन्तरात्मना एकतां वाञ्छन्तः निश्चित्तं स्वपन्ति। एवं वीतचिन्तं चित्तशून्यं च परेण एकतां समुपेत्य जीवः सुषुप्तौ यत् सुखम् अनुभुङ्क्ते तदेव वेदान्तिनः ब्रह्मानन्द इति कथयन्ति। (१२५)

१२६.

अमुमेव अभिज्ञाः योगानन्दः इति विदुः। अत्र स्त्री पुमानिति, सद् असदिति, बहिः अन्तः इत्यादयो द्वन्द्वधर्मा न सन्तीत्याह -

[312]योगानन्दोऽयमेव श्रुतिवचनविचारोत्थिता योगनिद्रा
या सुप्तौ जातसौख्यं स्वयमपि लभते ब्रह्मसौख्योपमानम् ।
स्त्रीपुम्भेदाद्यभावान्नियमनवशतो[313]ऽदृष्टबाह्यान्तरत्वात्
शय्याद्यं चारुसुप्तेर्यमनियमविधिः साधनं योगसुप्तेः ।। १२६ ।।

309. ***RSV 1*** and ***RSV 2*** read as सङ्गोत्पन्नसुखं त्रिपुट्यपि. ***GN*** and ***Vera*** read as सङ्गोत्पन्नसुखत्रिपुट्यपि.

310. ***Vera*** reads as शुगित्यज्ञाय.

311. ***RSV 1*** and ***RSV 2*** read as यत्रानुभुङ्क्ते. ***GN*** reads as यच्चानुभुङ्क्तैः. ***Vera*** reads as यच्चानुभुङ्क्ते.

312. ***RSV 1*** and ***RSV 2*** read as योगानन्दोऽयमेव. ***GN*** reads as ब्रह्मानन्दोऽयमेव. ***Vera*** reads as ब्रह्मानन्दो यमेव.

313. ***RSV 1***, ***RSV 2*** and ***Vera*** read as नियमनवशतो दृष्ट. ***GN*** reads as नियमनवशतोऽदृष्ट...

अन्वयः - अयमेव योगानन्दः। श्रुतिवचनविचारोत्थिता या योगनिद्रा (सा) सुप्तौ नियमनवशतः अदृष्टबाह्यान्तरत्वात् स्त्रीपुम्भेदाद्यभावाद् ब्रह्मसौख्योपमानं जातसौख्यं लभते। योगसुप्तेः यमनियमविधिः साधनम्। चारुसुप्तेः शय्याद्यं साधनम्।

व्याख्या - यो ब्रह्मानन्दः उक्तः सोऽयमेव कैश्चिद् योगानन्द इति कथ्यते। महावाक्यस्य श्रवणमनननिदिध्यासनद्वारा सञ्जातायां योगनिद्रायां जातसौख्यं, जातं यत् सौख्यं, तद् ब्रह्मानन्दोपमानं लभते। सुप्तौ सिद्धस्य ब्रह्मसुखस्य उपमानतां भजते इति। उभयत्र स्त्री पुमानिति, सद् असदिति, बहिः अन्तः इत्यादयो द्वन्द्वधर्माः अपगताः। सुषुप्तिजनिकायाः सुखनिद्रायाः कारणं शय्याद्यं भवति। योगनिद्रायाश्च यमनियमविधिः। (१२६)

१२७.

सुषुप्तौ यदनुभूतं तत्कथं जाग्रदवस्थायां जीवो जानातीति पृच्छति शिष्यः ।

ब्रह्मात्मज्ञानहेतौ जगति न[314] भविता या परस्यानुभूतिः
साऽन्यस्येति प्रसिद्धा परसुखमयतां याति सौषुप्तजीवः।
विश्वोऽभ्येत्य प्रवक्ता सुखमहमगमञ्चेति निद्रामिहेत्थं
सन्दिग्धं मे मनस्त्वं कथय [315]गुरुवरास्वप्नपूज्याङ्घ्रिपद्म।। १२७।।

अन्वयः - जगति या परस्य अनुभूतिः न अन्यस्येति प्रसिद्धा। ब्रह्मात्मज्ञानहेतौ सौषुप्तजीवः परसुखमयतां याति। विश्वः अभ्येत्य अहं सुखं निद्रामगममिति इह प्रवक्ता। इत्थं मे मनः सन्दिग्धम्। हे अस्वप्नपूज्याङ्घ्रिपद्म गुरुवर कथय।

व्याख्या - इह लोके एकेन अनुभूतं नान्येन ज्ञायते। ब्रह्मात्मज्ञानहेतौ सुषुप्तौ जीवः तैजसाख्यः परमसुखमनुभवति। उत्थाय च विश्वः (जाग्रदवस्थायां) कथयति अहं सुखं निद्रामगमम् इति। एतत्कथम् इति मे सन्देहः। हे गुरुवर, ये जाग्रद्बुद्धयः उन्मिषद्धिषणाः तैः पूज्योऽसि, न पुनः स्वप्नशीलैः मन्दबुद्धिभिरिति परमादरेण गुरुं सम्बोधयति शिष्यः। (१२७)

१२८.

विश्वतैजसौ उभावपि एकस्याः परचितेः छाया। वस्तुतः अनयोर्भेदो नास्तीत्याह -

---

314. ***Vera*** omits this न.

315. ***Vera*** reads as गुरुविभो ! देवपूज्याङ्घ्रिपद्म.

छायैका परसंविदो व्यवहृतौ चित्तैकतामेयुषी
विश्वाख्यां लभते लयेऽथ मनसः शोकात्मनः सा पुनः।
[316]भूमानन्दमयत्वमेति मिलिता वत्सैतयोर्नो भिदा
भेदो नास्ति तटीतटाकनवनीताज्याम्बुबिन्द्वम्भसाम्।। १२८।।

अन्वयः - परसंविदः एका छाया व्यवहृतौ चित्तैकतामेयुषी विश्वाख्यां लभते। अथ शोकात्मनः मनसो लये सा पुनः भूमानन्दमयत्वमेति। वत्स एतयोः भिदा नो मिलिता। तटीतटाकनवनीताज्याम्बुबिन्द्वम्भसां भेदो नास्ति।

व्याख्या - परचितेः छायैव व्यवहारसमये चित्तेन ऐक्यं भजते। अर्थात् चित्तरूपं भाति। तदवस्थायां सा चितिः विश्वाख्यां लभते। मनसो लये सैव भूमानन्दमयत्वमेति। वस्तुतः एतयोर्भेदो नास्ति। यथा तटीतटाकयोः, नवनीताज्ययोः, बिन्द्वम्भसोः, ऐक्ये सत्यपि केवलम् अवस्थाभेदः, तथा अनयोरैक्यमेवेति। (१२८)

१२९.

ब्रह्मानन्दे मग्नः जीवः पुनः किमर्थं निवर्तते इति प्रश्नं समादधद् वासनानन्दस्वरूपमाह -

ऐक्यं लब्ध्वाऽपि भूम्ना सह पशुरयते किं पुनर्जीवताञ्चे-
त्याख्यास्ये पूर्वकर्म श्लथयति परमानन्दभावं हि जन्तोः।
पश्चादुत्थेन सुप्तेर्निजसुखलहरीं[317] नोज्झता बाह्यदृष्टौ
नासक्तेनाप्यते[318] यत्सुखमिदमुदितं वासनानन्दसंज्ञम्।। १२९।।

अन्वयः - भूम्ना सह ऐक्यं लब्ध्वाऽपि पशुः पुनः जीवतां किमयते इति आख्यास्ये। पूर्वकर्म हि जन्तोः परमानन्दभावं श्लथयति। सुप्तेः पश्चादुत्थेन निजसुखलहरीं नोज्झता बाह्यदृष्टौ नासक्तेन यत्सुखमाप्यते (तद्) वासनानन्दसंज्ञम्।

व्याख्या - असीमानन्देन एकतां लब्ध्वापि पशुः, जीवः, पुनः जीवतामेव कस्मात् प्रत्यागच्छतीति पृच्छसि चेच्छृणु इत्याह गुरुः। जनिमृतिशीलस्य जीवस्य परमानन्दभावं पूर्वकर्म एव श्लथयति। उत्थितश्च जीवः परमसुखलहरीं नोज्झति कञ्चित्कालम्। बाह्यव्यवहारे लगति, न लगति च। एतस्मिन्नवसरे यत्सुखं जीवः

---

316. ***GN*** reads भूम्न्यानन्दमयत्वमेति. ***Vera*** has a widely differing variant for the entire quarter as भूम्न्यानन्दमजत्वमेति मिलितावत्यै तयोर्नो भिदा.

317. ***Vera*** reads as निजसुखलहरी नोज्झिता. This goes against the *Prabhā* commentary which reads निजसुखलहरीमपरित्यजता.

318. ***Vera*** reads as नासक्तेनाप्य ते.

अनुभवति तदेव वासनानन्द इति कथ्यते। (१२९)

१३०.

निजानन्दं निरूपयति।

देहाहन्ता हि जन्तोर्जनयति सुदृढं क्लेशमात्मीयसौख्यं
दूरापास्तं करोति प्रदिशति विमलं मध्यमास्था[319] हि मौनम्।
निर्निद्रस्यापि कस्य प्रभवति विगताशेषचिन्तस्य पुंस-
स्त्वौदासीन्यं सुखं यन्मुनिभिरभिहितं तन्निजानन्दनाम।। १३०।।

अन्वयः - जन्तोः देहाहन्ता सुदृढं क्लेशं जनयति। आत्मीयसौख्यं दूरापास्तं करोति। मध्यमास्था विमलं मौनं प्रदिशति हि। निर्निद्रस्य कस्यापि पुंसः विगताशेषचिन्तस्य औदासीन्यं यत् सुखं प्रभवति तत् मुनिभिः निजानन्दनाम अभिहितम्।

व्याख्या - जन्तोः देहाभिमान एव सुखदुःखादिक्लेशजातं जनयति, यच्च सुखेन अपमार्ष्टुं न शक्यते । अहं देहः इति चिन्तैव आत्मसुखं दूरे करोति। मध्यमे आस्था विमलं मौनं दिशति। इष्टानिष्टे, सुखदुःखे, शैत्यौष्ण्ये इति द्वन्द्वधर्मान् विस्मृत्य मध्यस्थतां, औदासीन्यम् आस्थितस्य जन्तोः निर्मलं मौनं निश्चिन्तत्वं प्रदिशति। निश्चिन्तस्य त्यक्तद्वन्द्वधर्मस्य उदासीनस्य सर्वस्यापि पुंसः सुखानुभवः भवत्येव। तत्सुखमेव निजानन्द इति गीयते। (१३०)

१३१.

मुख्यानन्दं लक्षयन् स निजानन्दाद् भिद्यते इति दर्शयति।

शान्ताहन्तामलस्य व्यपगतकलनस्योज्झितस्वापवृत्तेः
निष्कम्पाकारयष्टेर्गतविषयततेर्यत्सुखं[320] भाति पुंसः।
मुख्यानन्दः स उक्तो घटगतसलिलस्येव शैत्यं [321]बहिर्यद्
भात्येतस्यास्ति धीरा निजसुखमिति तत्[322] सङ्गिरन्ते जगत्याम्।।
१३१।।

319. ***RSV 1*** and ***RSV 2*** read as विमलं मध्यमस्था. ***GN*** reads as विमलामध्यमास्था. ***Vera*** reads विमला मध्मास्था.

320. ***Vera*** reads as गतविषयतते यत्सुखं.

321. ***RSV 1*** and ***RSV 2*** read as बहिर्यद् भात्येतस्यास्ति. ***GN*** reads as बहिर्यामात्रैस्तस्यास्ति. ***Vera*** reads as बहिर्या मात्रैस्तस्यास्ति.

322. ***Vera*** reads as तां.

अन्वयः - शान्ताहन्तामलस्य व्यपगतकलनस्य उज्झितस्वापवृत्तेः निष्कम्पाकारयष्टेः गतविषयततेः पुंसः यत्सुखं भाति स मुख्यानन्दः उक्तः। घटगतसलिलस्य शैत्यमिव यत् (मुख्यानन्दस्य योऽंशो) बहिर्भाति, धीराः जगति तदेतस्य निजसुखमिति सङ्गिरन्ते।

व्याख्या - यस्य अहङ्कारमलम् अहङ्कृतिरूपमज्ञानं नष्टं, यस्मात् सर्वाः कलनाः चिन्ताः व्यपगताः,यश्च त्यक्तनिद्रावस्थः यस्य शरीरं निष्कम्पं, यष्टिवन्निश्चलं, विषयततिः यस्माद् गता, तस्य यत्सुखं वेद्यं भवति स एव मुख्यानन्दः। एतस्य बहिःस्फुरणमात्रमेव निजानन्दः। यथा घटस्थजलस्य शैत्यं घटस्य बहिर्भागे शीताम्बुकणतया दृश्यते तथा मुख्यानन्दस्य बाह्यस्फुरणमात्रं भवति निजानन्दः इति। (१३१)

१३२.

श्रुतिभिः मनुष्यगन्धर्वानन्दः, देवगन्धर्वानन्दः इत्यादि ब्रह्मण आनन्दः इत्यन्तं ये शतगुणोत्तरम् आनन्दाः वर्णिताः ते सर्वे अस्य ब्रह्मानन्दस्य बिन्दुमात्रमित्याह -

आसार्वभौमसुखमा च हिरण्यगर्भ-
सौख्यं शतोत्तरगुणं समुदाहृतं यत्।
तत्सर्वमन्तरहितस्य चिदम्बुराशे-
रेको हि बिन्दुरुदितः[323] श्रुतिसारविद्भिः।। १३२।।

अन्वयः - आसार्वभौमसुखम् आ च हिरण्यगर्भ-सौख्यं शतोत्तरगुणं यत् समुदाहृतं तत्सर्वम् अन्तरहितस्य चिदम्बुराशेः एको बिन्दुः (इति) श्रुतिसारविद्भिः उदितः हि।

व्याख्या - 'स एको मानुष आनन्दः. ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः' इत्यारभ्य 'स एको ब्रह्मण आनन्दः' (तैत्तिरीयोपनिषत् २.१०) इति शतगुणोत्तरं ये आनन्दाः समुदाहृताः श्रुतिभिः ते सर्वे, चिदम्बुराशेः अन्तरहितस्य अखण्डबोधानन्दस्य ब्रह्मानन्दस्य बिन्दुमात्रम् इति वेदान्तत्त्वज्ञैः उदितः इति। (१३२)

१३३.

वक्ष्यमाणस्वरुपायां सप्तम्यां ज्ञानभूम्यां स्थितस्य तुरीयगस्य निरुपमम् आनन्दं स्तौति।

---

323. ***Vera*** reads as बिन्दुरुदिते.

तुर्यातीते वसेद्यो[324] यदि परमपदे भूमिषट्कात्परस्मिन्
तस्यैतस्यानुभूतिर्द्रुहिणहरिमृगीधृक्शुकब्रह्मजानाम्।
तुल्या दिव्यानुभूत्या व्यवहृतिरपि च स्वैरिणीवृत्तितुल्या[325]
तत्पादाम्भोजजातं शिरसि कुसुमवद्धारयाम्येव रेणुम्।। १३३।।

अन्वयः - यदि यः कोऽपि भूमिषट्कात् परस्मिन् तुर्यातीते परमपदे वसेत् तस्य एतस्य अनुभूतिः द्रुहिणहरिमृगीधृक् शुकब्रह्मजानां दिव्यानुभूत्या तुल्या। व्यवहृतिः अपि स्वैरिणीवृत्तितुल्या च। तत्पादाम्भोजरेणुं शिरसि कुसुमवद् धारयाम्येव।

व्याख्या - सप्त ज्ञानभूमयः वक्ष्यन्ते। तासु सप्तमी तुर्या इति ख्याता। सैव तुर्यातीता इत्यपि कथ्यते (सन्देहप्रशमनपटले १५४ तमं पद्यं - तुर्यस्थानस्य तुर्योत्तरपदकथने योग्यतां संशयानाः - पश्यत)। मनुष्याणां सहस्रेषु यः कश्चिदेकः यदा कदापि तस्यां भूमौ वसेत्। यदि यः कोऽपि तस्यां वस्तुं शक्नुयात् तर्हि तस्य अनुभूतिः ब्रह्मविष्णुमहेश्वराणां शुकनारदादीनां च दिव्यानुभूत्या समानैव भवेत्। तस्य लौकिकव्यवहृतिः तु स्वैरिणीवृत्त्या समाना। अत्रत्यः अपिशब्दः त्वर्थकः। यथा परपुरुषे सक्ता नारी तत्तत्कार्याणि कुर्वत्यपि सुरतसुखं नैव मुञ्चेत् (पद्यम् २३) इति दर्शितवृत्त्या समाना तस्य व्यवहृतिः। तादृशस्य महापुरुषस्य पादाम्भोजरेणुम् अनर्घसुगन्धिकुसुमवत् शिरसि श्रद्धया धारयाम्येव इति तुर्यावस्थां स्तौति। (१३३)

१३४.

ज्ञानानन्दं पश्चाद्वक्ष्यामीत्याह -

उक्तानि पञ्च हि सुखान्यपि बोधसौख्यं
पश्चाद् ब्रवीमि कथिते ननु पूर्वमेव।
आत्माद्वयाभिधसुखे परिपृच्छ वत्स
निर्द्वन्द्व[326]! संशयगणो यदि तं[327] छिनद्मि।। १३४।।

---

324. ***RSV 1***, ***RSV 2*** read as तुर्यातीतेऽवसद्यो. ***GN*** and ***Vera*** reads as तुर्यातीते वसेद्यो.

325. ***RSV 1***, ***RSV 2*** read as चास्वैरिणीवृत्तितुल्या. ***GN*** reads as च स्वैरिणीवृत्तितुल्या. ***Vera*** reads च स्वैरिणी वृत्तितुल्या.

326. ***RSV 1*** and ***RSV 2*** read as निर्द्वन्द्वसंशयगणो (without space, as a single word). ***GN*** and ***Vera*** reads as सम्प्राप्तसंशयगणो. We have accepted the reading निर्द्वन्द्व !. It goes along with the original Tamil reading तोन्तं माट्रिय महने (tontaṃ māṟṟiya mahanē).

327. ***Vera*** reads as तत्.

अन्वयः - पञ्च सुखान्यपि उक्तानि हि। बोधसौख्यं पश्चाद् ब्रवीमि। आत्माद्वयाभिधसुखे पूर्वमेव कथिते ननु। हे निर्द्वन्द्व! वत्स, यदि संशयगणः (अस्ति, तर्हि) परिपृच्छ। तं छिनद्मि।

व्याख्या - विषयानन्दादीनि पञ्च सुखानि उक्तानि। ज्ञानसौख्यं पश्चाद् वक्ष्यामि। आत्मानन्दः अद्वयानन्दश्च मायानिरूपणावसरे सच्चिदानन्दपदार्थानां स्वरूपनिरूपणावसरे च कथितचरौ (संसारे यावदाशा इत्यादिपद्ये (१०७) आत्मानन्दः; अज्ञानाकारसुप्तौ इत्यादिपद्ये (११५) अद्वयानन्दश्चेति)। अपसारितद्वन्द्वभाव हे वत्स! इति शिष्यं सम्बुध्य 'यदि संशयगणः अस्ति तर्हि परिपृच्छ, अहं तं छिनद्मि' इत्याह गुरुः।

अत्र अन्तिमपादे निर्द्वन्द्वसंशयगणः इति मुद्रितपुस्तके (आर्. एस्. वाध्यार् आण्ड् सण्स्) पाठः। स च द्राविडमूलग्रन्थानुसारं निर्द्वन्द्व इति सम्बोधनपरमेकं पदम्, अन्यदेकमिति पदद्वयत्वेन अत्र परिष्कृतः। "तोन्तं माट्रिय महने" (*tontaṃ māṟṟiya mahanē*) इति मूलग्रन्थे पाठः। (१३४)

१३५.

सच्चिदानन्दपदानाम् एकार्थता कथमिति पृच्छति शिष्यः।

वल्लीशस्य ममापि तात जगतः संरक्षक त्वं गुरो
सत्यानन्दचितां भिदा यदि भवेदेकार्थता सा कथम्।
पर्यायस्य न योग्यताऽस्ति विषयासक्तं मदीयं मनः
पूर्णं माक्षिकवत्[३२८] सदैकरसतां यायात् कथं तद्वद।। १३५।।

अन्वयः - वल्लीशस्य, जगतः, ममापि संरक्षक हे तात गुरो! सत्यानन्दचितां यदि भिदा तर्हि सा एकार्थता कथं भवेत्? पर्यायस्य योग्यता नास्ति। विषयासक्तं मम मनः माक्षिकवद् सदा एकरसतां पूर्णं कथं यायात्? त्वं तद्वद।

व्याख्या - सर्वविद्यानामीशानः परमेश्वरः तत्त्वावगमाय स्वपुत्रं सुब्रह्मण्यम् उपेयाय इति पुराणकथा। ज्ञानमूर्तेः ईश्वरस्यापि गुरुर्भवति स्कन्दः। तस्यापि संरक्षको भवति ज्ञानवारान्निधिर्भगवान् गुरुर्दक्षिणामूर्तिः। तादृश हे गुरो ममापि संरक्षक इति करुणावरुणालयं गुरुं सम्बुध्य शिष्यः पृच्छति। सच्चिदानन्दपदानां भिन्नार्थता उक्ता। एवं चेत् तानि कथमेकं ब्रह्म वदेयुः? तेषाञ्च पदानां पर्यायता

328. ***Vera*** reads as पौत्रिकवत्.

नास्ति। तेषाम् अनेकार्थकत्वात्। मम मनः संशयग्रस्तं भ्रमति। यथा मक्षिकाणां मनः मध्वास्वादसमये पूर्णतया एकरसतां याति तद्वत् ममापि एकाग्रता निस्सन्देहता पूर्णता च यथा स्यात् तथा मां बोधयतु इति प्रार्थयति शिष्यः। (१३५)

१३६.

त्रीण्यपि सच्चिदानन्दपदानि एकमेव लक्षयन्तीत्याह। ब्रह्म, जगतः सुतरां भिन्नमिति दर्शनाय तथा जाड्यादयो धर्माः ब्रह्मणो नैव भवन्तीति बोधनाय सत्यानन्दप्रकाशान् ब्रह्मणः लक्ष्मत्वेन कथयति श्रुतिरित्याह -

शीतस्वच्छद्रवास्ते पयसि विदधते वाचकाः किं भिदां[329] वा
रक्तत्वोष्णप्रकाशाः शिखिनि च जगतां खादिकानाञ्च तद्वत्।
जाड्यं दुःखं मृषात्वं नहि नहि पुनरित्येव वक्तुं त्रयी सा
सत्यानन्दप्रबोधान् कथयति सुतरां लक्ष्म तद् ब्रह्म चैकम्।। १३६।।

अन्वयः - शीतस्वच्छद्रवाः ते वाचकाः पयसि किं भिदां विदधते वा? तद्वत् रक्तत्वोष्णप्रकाशाः शिखिनि च (किं भिदां विदधते वा)? तदेकं ब्रह्म खादिकानां जगतां जाड्यं दुःखं मृषात्वं नहि नहि इति वक्तुं सत्यानन्दप्रबोधान् लक्ष्म कथयति।

व्याख्या - लोकैः, शीतं जलम्, द्रवं जलम्, स्वच्छं जलम् इति कथ्यते। शीतस्वच्छद्रवशब्दाः, वाचकशब्दाः जले भेदं वदन्ति वा? नैव किल? एवमेव रक्तः उष्णः प्रकाशः इतीमे वाचकाः वह्नौ भेदं न जनयन्ति। एकमेव वह्निं बोधयन्ति अथवा लक्षयन्ति। एवं सच्चिदानन्दपदानि एकमेव लक्षयन्ति। ब्रह्मणो बोधनाय, ततः सुतरां भिन्नस्य जगतो जाड्यादयो धर्माः ब्रह्मणो नैव इति वक्तुं, ब्रह्मणः स्वरूपबोधनाय च सत्यस्य, आनन्दस्य, प्रबोधस्य च लक्ष्म कथयति। फलञ्च, ब्रह्म न जडम्, परं चिद्भवति; ब्रह्म न दुःखं, तदानन्दो भवति; ब्रह्म न मृषा, पुनः सत्यं तदिति बोधः। खादिकानां जगताम्, आकाशादीनामित्यर्थः । (१३६)

१३७.

श्रुतिः, विधिमुखेन निषेधमुखेन च, अनेकैः पदैः, ब्रह्म लक्षयतीति दर्शयति।

सत्यं ज्योतिर्महत्तत्परमपदमजं नित्यमेकं विशुद्धम्
ब्रह्माद्वैतं तुरीयं शिवममलमनन्तं परं निर्विकल्पम्।

---

329. ***Vera*** reads as भदा.

कूटस्थं साक्षि शान्तं निरुपमममृतं नामरूपादिहीनं
चेत्याहातन्निरासादपि विधिमुखतो वेदवाग्ब्रह्मलक्ष्म।। १३७।।

अन्वयः - सत्यं, ज्योतिः, महत्, ए तत्, परमपदम्, अजम्, नित्यम्, एकं विशुद्धं, ब्रह्म, अद्वैतं, तुरीयम्, शिवम्, अमलम्, अनन्तं, परं, निर्विकल्पं, कूटस्थं, साक्षि, शान्तं, निरुपमम्, अमृतं, नामरूपादिहीनं चेति अतन्निरासादपि विधिमुखतः वेदवाक् ब्रह्म आह।

व्याख्या - विधिमुखेन निषेधमुखेन च अनेकैः पदैः ब्रह्मस्वरूपं लक्षयति वेदवागिति। (१३७)

१३८.

एवम् एकमेव ब्रह्म विधिनिषेधमुखेन अनेकैः पर्यायशब्दैः वेदेन लक्षणया वेद्यत इत्याह -

अतन्निरासवाचकैः स्वरूपवाचकैर्मिथः
समेत्य [330]सम्यगीरितः परः शिवः स एककः।
भिदा हि वाचकेषु सा न लक्ष्यवस्तुनि स्थिता
भवान् विधूय संशयानखण्डमेतु निश्चयम्।। १३८।।

अन्वयः - स एककः परः शिवः अतन्निरासवाचकैः स्वरूपवाचकैः मिथः समेत्य सम्यगीरितः। सा भिदा वाचकेषु, न लक्ष्यवस्तुनि स्थिता। भवान् संशयान् विधूय अखण्डं निश्चयमेतु।

व्याख्या - एवं श्रुतिः विधिमुखेन निषेधमुखेन च बहुविधैः शब्दैः अखण्डबोधस्वरूपं ब्रह्म लक्षयति। शब्देष्वेव भेदः। लक्ष्योऽर्थः एक एव। एवं सम्यगवधार्य निस्संशयो भवेति शिष्य आदिश्यते। (१३८)

१३९.

निर्गुणस्य ब्रह्मणः गुणगणकथनं वन्ध्यासुतस्य अलङ्कारवर्णनमिव निरर्थकं भवति किलेति प्रश्नमुत्थाप्य खण्डयति।

ईशे त्यक्तगुणे गुणस्य कथनं वन्ध्यासुतालङ्कृतिं
नो मन्यस्व बुधो न[331] लक्ष्मकथनं[332] चेद्वेत्ति कः सद्गुणान्[333]।

---

330. ***RSV 1*** and ***RSV 2*** read सम्यगिरितः.

331. ***RSV 1*** and ***RSV 2*** read as बुधेन (without space, as a single word). ***GN*** and ***Vera*** read as बुधो न.

332. ***Vera*** reads as लक्ष्म कथनं.

333. ***Vera*** reads as कस्सद्गुणः.

वेदो वक्ति सदादिलक्ष्म जनतामुक्त्यै प्रबोधाप्तये
सत्याद्या न पुनर्गुणाः सत इमे किन्तु स्वरूपं निजम्।। १३९।।

अन्वयः - त्यक्तगुणे ईशे गुणस्य कथनं वन्ध्यासुतालङ्कृतिं नो मन्यस्व। लक्ष्मकथनं न (कृतं चेत्) कः बुधः सद्गुणान् वेत्ति? वेदः सदादिलक्ष्म जनतामुक्त्यै प्रबोधाप्तये च वक्ति। सत्याद्याः पुनः न गुणाः । इमे सतः निजं स्वरूपम्।

व्याख्या - निर्गुणस्य ब्रह्मणः बहुभिः पर्यायैः गुणाः उच्यन्ते इत्युक्तम्। एतद् वस्तुतः वन्ध्यासुतस्य अलङ्करणमिव किल इति संशीतिर्मास्तु। अनन्तकल्याणगुणस्य गुणाः नोक्ताश्चेत् को वा ज्ञातुं समर्थो भवेत्? किञ्च सत्यं ज्ञानम् इत्यादयः लोकानां ज्ञानाय मुक्तये करुणामय्या श्रुत्या गीयन्ते। इमे च ब्रह्मणः गुणाः न। नोत धर्माः। किन्तु ब्रह्मणः स्वरूपमेव। सत्यं न ब्रह्मणि। किन्तु सत्यमेव ब्रह्म इत्यादि।। १३९।।

१४०.

श्रुत्यन्तवाक्यैः यदुक्तं तद्गुरुकृपया सम्यगवगत्य युक्त्या तद् द्रढयितुं पुनरप्युपदेशाय याचते शिष्यः।

व्यामोहाख्यमहान्धकारपटलीचण्डार्ककोट्याकृते
त्वेकाखण्डविलीनमानसमहं मां ज्ञातवांश्चिन्नभः।
वेदोदीरितलक्षणेन सरसक्षोणीरुहे शल्यवद्
दार्ढ्यार्थं मनसो वदस्व[334] विपुलानूहान्महत्सम्मतान्।। १४०।।

अन्वयः - व्यामोहाख्यमहान्धकारपटलीचण्डार्ककोट्याकृते वेदोदीरितलक्षणेन अहं मां एकाखण्डविलीनमानसं चिन्नभः (इति) ज्ञातवान्। सरसक्षोणीरुहे शल्यवद् मम मनसः दार्ढ्यार्थं महत्सम्मतान् विपुलानूहान् वेदोदीरितलक्षणेन वदस्व ।

व्याख्या - अज्ञानतिमिरस्य गाढस्य अपाकरणे कोटिसूर्यसमान हे गुरो इति गुरुं सम्बुध्य शिष्यः पृच्छति। उपनिषत्प्रतिपादितरीत्या अखण्डबोधे विलीनहृदयं चिदाकाशमेवाहम् इति, शिवः कोवलोऽहमिति सम्यग् ज्ञातवान्। तस्यैव ज्ञानस्य द्रढीकरणाय युक्त्यापि साधयितुमिच्छामि। यथा सरसे वृक्षे आहतः आयसः कीलः दृढं लग्नो भवति तथा मम मानसे यथा ज्ञानं सुदृढं स्यात् तादृशीः युक्तीः महत्सम्मताः कथयतु भवानिति। (१४०)

334. ***Vera*** reads as विधस्व.

१४१.

सत् चित् आनन्दः इति त्रयोऽपि एकमेवेति दर्शयति।

सत्स्यादेव चितिर्न चेदपि मृषा तत्साक्षिकं किं भवेत्
चित्सत्यं भविता न चेदपि जडं तस्य स्थितिर्न क्वचित्।
स्यातां भानसती यदि प्रमिलिते तत्प्रेमपूर्णं भवेत्
[335]ऊहानामिदमेव बीजमपि चेन्नात्मानुभूतिर्न हि।। १४१।।

अन्वयः - चितिः सदेव स्यात्। न चेत् मृषा। तत्साक्षिकम् अपि किं भवेत्? सत्यं चिद् भविता। न चेत् जडम्। तस्य स्थितिः न क्वचिदपि। भानसती प्रमिलिते यदि स्यातं तत् प्रेमपूर्णं भवेत्। इदमेव ऊहानां बीजम्। न चेद् आत्मानुभूतिः न हि।

व्याख्या - चितिः, ज्ञानं सदेव भवेत्। यदि नैवं तर्हि ज्ञानं मृषा भवेत्। असत्यभूतस्य को वा साक्षी स्यात्? तेन चित् सदेव।

अधुना सत्यं यद्वस्तु तेन चित्स्वरूपेण भाव्यम्। नो चेत् जडस्य सत्यस्य न क्वापि स्थितिः।

सम्प्रति सदेव यत् तत् चित् आनन्दमयमेव। अथवा असतः आनन्दस्य जनस्य च कथमनुभवः तेन आनन्दः सत् चिच्च। तेन सत् चित् आनन्दः इति त्रयोऽपि वस्तुतः एकमेव तत्त्वम्।

इदमेव सर्वासां युक्तीनां बीजम्। यद्येतन्नाङ्गीक्रियते आत्मानुभूतिरेव न स्यादिति। (१४१)

१४२.

सता वस्तुना स्वयं चिद्रूपेण भाव्यम् इत्यत्र युक्तिं प्रदर्शयति।

यद्भानन्नित्यमेतत्सत इह निजतः स्वान्यतो वेति वाचा
तस्मिन्नुक्ते परस्मादिति किल[336] तदसत् सच्च वा यद्यसत् स्यात्।
वन्ध्यापुत्रोऽर्थकारी किमु भवति जडप्रज्ञ तच्चेत्तु[337] सत्यं
नोत्सन्ना साऽनवस्था भवगतबहुतर्कोत्थनानाविकल्पा[338] ।। १४२।।

---

335. ***RSV 1*** and ***RSV 2*** read उहानाम्.

336. All the previous editions omit this word, which naturally causes छन्दोभङ्ग.

337. ***RSV 1*** and ***RSV 2*** read as तच्चेत्तु सत्यम्. ***GN*** and ***Vera*** read as तच्चेदसत्यम्.

338. ***RSV 1*** and ***RSV 2*** read as भवगतबहुतर्कोतथनानाविकल्पः. ***GN*** and ***Vera*** read as भवगतबहुतर्कोऽर्थनानाविकल्पा.

अन्वयः - इह सतः नित्यं यद् एतद् भानं तत् निजतः स्वान्यतो वा इति वाचा तस्मिन् परस्मादिति उक्ते तच्च असद्वा सद्वा (स्यात्) किल। यदि असत् स्यात् हे जडप्रज्ञ किमु वन्ध्यापुत्रः अर्थकारी? (परं) तत् सत् चेत् सा भवगतबहुतर्कोत्थनानाविकल्पा अनवस्था तु न उत्सन्ना।

व्याख्या - सद्वस्तु नित्यं सदिति ज्ञायते किल? तत् स्वतो ज्ञायते वा उत परतः? परतश्चेत् तद् ज्ञापकम् अन्यद्वस्तु सद्वा असद्वा इति वक्तव्यम्। ज्ञापकं तद् वस्तु असदित्यच्यते चेत् तद् वक्तुः मूर्खत्वमेव ज्ञापयति। यतः असद्वस्तु कथमन्यं प्रकाशयेत्? यथा वन्ध्यापुत्रः अर्थकारी इति यद्युच्येत तादृशी तवोक्तिरिति। यदि पुनः ज्ञापकं वस्तु सदित्यच्यते तर्हि एतद्वक्तव्यम्, तत् स्वयं ज्ञानस्वरूपं वा उत परतो ग्राह्यं वेति। परतो ग्राह्यमित्युक्ते पुनरनवस्था। यथा व्यवहारे कुतर्कविकल्पा बहवः भवन्ति तद्वत् स्यात्तदिति। तस्मात् सद्वस्तु स्वतो ज्ञायते इत्येव वक्तव्यम्। अर्थात् सद्वस्तु चिद्रूपमिति। (१४२)

१४३.

अनुभवश्च श्रुत्या युक्त्या च सङ्गच्छते इत्याह।

श्रुतिं युक्तिं युक्तामिव तव वदेयं ह्यनुभवं
सुखावस्था सुप्तावपि चितिसती[339] स्वे न[340] हि पृथक्।
क्षये सुप्तामेकस्त्वमपि तिमिरं पश्यसि यतः
समालोच्येत्थं स्या निजहृदि सदैको गतमलः।। १४३।

अन्वयः - श्रुतिं युक्तां युक्तिम् इव तव अनुभवम् (अपि) वदेयम्। सुप्तौ स्वे सुखावस्था अपि। चितिसती न हि पृथक्। यतः क्षये सुप्तावपि त्वम् एकः तिमिरं पश्यसि। इत्थं समालोच्य सदा निजहृदि गतमलः एकः स्याः।

व्याख्या - यथा श्रुतिं, यथा युक्तां, श्रुत्यनुरुद्धां युक्तिञ्च अवदं, तथा श्रुत्यविरुद्धम् अनुभवञ्च अहं तव वदेयम्। सुप्तौ, सुषुप्तौ आत्मनि सुखमनुभूयते। नो चेत् प्रबोधसमये अहं सुखी आसम् इति स्मरणं नाभविष्यत्। आत्मनः

339. ***RSV 1*** and ***RSV 2*** read as चिति सति. ***GN*** and ***Vera*** reads as चितिसती.

340. ***RSV 1***, ***RSV 2*** and ***Vera*** wrongly read as स्वेन हि. It may be noted that the editor of *Prabhā* commentary misses the fact that the commentary favours the reading स्वे न हि as it explains as सद्भाने च स्वे आनन्दरूपात्मनो भिन्नेन विलक्षणभूते 'योऽहं सुख्यासं' इति परामर्शात् सुप्तौ क्षये प्रलये च त्वमेवैकः परिशिष्टः GN reads as स्वे न हि.

सुखस्वरूपात् पृथक् चितसती च, ज्ञानं सत्ता च नास्ताम्। यतः क्षये प्रलये तथा सुप्तावपि तिमिरं पश्यसि किल। नो चेत् सुखमहमस्वाप्सं, न किञ्चिदवेदिषम् इत्ययमनुभवो नाभविष्यत्। प्रलये सुषुप्तौ च जीवः अविद्यायां लीनः आस्ते। पूर्णो जीवः स्वस्वरूपं विस्मरन् शून्यम् (शून्यताम्) अज्ञानञ्च अनुभवति।

एवं सच्चिदानन्दोऽहम् इति सम्यगवलोड्य, निश्चयं गत्वा, गतचिन्तः निरस्ताज्ञानः एक आनन्दमयः स्याः इति गुरुरनुशास्ति। (१४३)

१४४.

गुरुपदेशेन सम्यक् सुखमनुभूय समाधेर्निर्गतः शिष्यः आत्मानं जगच्चित्रस्य पट इति ददर्शेत्याह -

नानाशास्त्रविदो गुरोस्तु वचनं यद्वत्तथा स्वानुभू-
त्यानन्दो[341] बहुपुष्पसम्भवमधुप्रायं स सच्चित्सुखम्।
लब्ध्वैकं परमार्थमेष नयने संमील्य तिष्ठन् सुखी
[342]यर्ह्येवं बहिरीक्षिता बहुजगच्चित्रैकवस्त्रोऽभवत्।। १४४।।

अन्वयः - यद्वत् नानाशास्त्रविदः गुरोः तु वचनं तथा बहुपुष्पसम्भवमधुप्रायं सच्चित्सुखं लब्ध्वा स एषः स्वानुभूत्यानन्दः (सन्) एकं परमार्थं लब्ध्वा नयने संमील्य सुखी तिष्ठन् यर्हि बहिः ईक्षिता (तदानीम्) एवं बहुजगाच्चित्रैकवस्त्रोऽभवत्।

व्याख्या - विद्वद्वरिष्ठस्य गुरोर्वचनानुसारम् आत्मानुभूत्यानन्दमनुभवन् स शिष्यः सच्चित्सुखं किमिति ज्ञातवान्। यथा बहुभ्यः पुष्पेभ्यः आहृतं मधु एकरसमेव ज्ञायते; इदमस्मात्पुष्पाद् इदमस्माद् इति भेदमजानानः एकरसतया स्वदते कश्चित् तथा सर्वगतं सर्वव्यापि एकमेव बोधस्वरूपं तदेव आनन्दघनस्वरूपञ्चेत्यवगत्य स शिष्यः सम्मीलिताक्षः सुखं समाधावास। यदा पुनः समाधेर्बहिरागतः तदा चित्रमिदं जगद्वीक्ष्य सर्वमिदं स्वस्मिन्नेव भातमिति ज्ञातवान्। यथा अनेकरूपस्य चित्रस्य एक एव पटः आश्रयः तथा अस्य चित्रस्य जगतः अयमात्मैव आश्रयः, आधारः, स्वरूपञ्च इति बुद्धवानिति। (१४४)

१४५.

तुरीयातीतावस्थां पृच्छति शिष्यः।

---

341. ***RSV 1*** and ***RSV 2*** read as स्वानुभूत्यानन्दो. ***GN*** and ***Vera*** reads as स्वानुभूत्यानन्दन्.
342. ***RSV 1*** and ***RSV 2*** read as यद्येवं. ***GN*** and ***Vera*** reads as यर्ह्येवं.

मच्चेतःस्थित सद्गुरो परमतो मुक्त्वा विनोदं त्विमं
नास्माकं विधिरस्ति कश्चन सतां तच्चिन्तना[343] तत्कथा।
स्वाभाविक्युदितैव[344] यत्प्रथमतः प्रोक्तं प्रमुख्यं त्वया
तुर्यातीतपदं तदीयगतिमप्याख्याहि दार्ढ्याय मे।। १४५।।

अन्वयः - मच्चेतःस्थित हे सद्गुरो इमं तु विनोदं मुक्त्वा अतः परम् अस्माकं न कश्चन विधिरस्ति। सतां तच्चिन्तना तत्कथा च स्वाभाविकी उदिता। यत् त्वया प्रथमतः प्रोक्तं प्रमुख्यं तुरीयातीतपदं तदीयगतिमपि मे दार्ढ्याय आख्याहि।

व्याख्या - शिष्यः कथयति। हे सद्गुरो, मदीयहृदयाकाशे विहरन् हंस! इममानन्दानुभवमपहाय अन्यत् किमपि करणीयं नास्त्यस्माकम्। साधवः सहजतया तच्चिन्तनं, तत्कथां, तत्स्थितिञ्चैव कुर्वन्तो मोदन्ते। अधुना भवता सर्वश्रेष्ठमिति यत् तुरीयातीतं सुखं प्रोक्तं तत्स्वरूपमधिकृत्य किञ्चिद् वदतु येन मम दृढता मनसः स्यादिति पृच्छति च। (१४५)

१४६.

सप्त अज्ञानभूमीः ज्ञानभूमीश्च क्रमेण वक्तुं प्रक्रमते।

ऊहैः क्लृप्ते[345] विचारे परिगणितमबोधाख्यभूसप्तकं बो-
धाख्यं भूसप्तकं तच्छ्रुतिवचनपरैरुच्यते पूर्वमादौ।
बीजाख्यं जाग्रदेकं पुनरपि[346] च [347]महाजाग्रदन्यच्च जाग्रत्
जाग्रत्स्वप्नञ्च सन्ध्यं पुनरपि च तथा स्वप्नजाग्रत्सुषुप्तिः।। १४६।।

अन्वयः - श्रुतिवचनपरैः ऊहैः विचारे क्लृप्ते अबोधाख्यभूसप्तकं तत् बोधाख्यं भूसप्तकं च परिगणितम्। (तत्र) आदौ पूर्वम् उच्यते। एकं बीजाग्रं जाग्रत्, अन्यद् जाग्रत्, पुनरपि महाजाग्रत्, जाग्रत्स्वप्नं च, सन्ध्यं, स्वप्नजाग्रत्, तथा सुषुप्तिश्च (इति)।

व्याख्या - वेदार्थचिन्तनपरैः महद्भिः, युक्तिभिर्विचिन्त्य अज्ञानभूमयः सप्त, ज्ञानभूमयश्च सप्त, इति परिगणितम्। तत्र आदौ अज्ञानभूमयः काः इति

343. ***Vera*** reads as तच्चिन्तनं.
344. ***Vera*** reads as स्वाभावीत्युदितैव.
345. ***Vera*** wrongly reads ऊहैर्क्लृप्ते.
346. ***Vera*** reads as हि पुनरपि in place of पुनरपि च.
347. ***Vera*** reads as तथा जाग्रदन्यन्महान्यो for the remaining part of the quarter.

वदामि। बीजजाग्रत्, जाग्रत्, महाजाग्रत्, जाग्रत्स्वप्नं, स्वप्नं, स्वप्नजाग्रत्, सुषुप्तिश्चेति ताः सप्तेति। (१४६)

१४७-१४८.

ता एव अज्ञानभूमीः निरूपयति (द्वाभ्याम्)।

[348]चैतन्यात्पूर्णबोधात् प्रथममुदयवद्यच्च तद्बीजजाग्रत्
बीजाङ्कूरप्रणाडीवदुदयमयतेऽहंकृतिर्जाग्रदेतत्।
तीव्राहन्ताममत्वोद्भवमृतिमिलनं तन्महाजाग्रदुक्तं
[349]जाग्रत्स्वप्नो हताहंकृतिपरिमिलनाद्यन्मनोराज्यमत्र[350] ।।१४७।।

एष स्वप्नो हि[351] भुक्त्वा स्वपनपदजुषो[352] या मनोराज्यक्लृप्तिः
जाग्रद्दृष्टं पुरा यत् स्मरणमपि पुनः स्वप्नजाग्रत्तदुक्तम्।
[353]सुप्तिर्गाढान्धकारावृतिरिह कथिताऽज्ञानभूमिः[354] पुनस्त्वां[355]
ज्ञानाख्यां भूमिमेतां भवविलयकरीं वच्मि[356] वेदैकगीताम्।। १४८।।

अन्वयः - पूर्णबोधात् चैतन्यात् यत् प्रथममुदयवत् तद् बीजजाग्रत्। बीजाङ्कूरप्रणाडीवद् अहङ्कृतिः उदयमयते। एतद् जाग्रत्। (यत्) तीव्राहन्ताममत्वोद्भवमृतिमिलनं तत् महाजाग्रदुक्तम्। हताहंकृतिपरिमिलनात् यत् मनोराज्यं तदत्र जाग्रत्स्वप्नः। भुक्त्वा स्वपनपदजुषः या मनोराज्यक्लृप्तिः, एष स्वप्नः हि। पुरा यद् जाग्रद्दृष्टं (तस्य) स्मरणमपि तत् स्वप्नजाग्रदुक्तम्। गाढान्धकारावृतिः इह सुप्तिः अज्ञानभूमिः कथिता। (अथ) वेदगीतां भवविलयकरीं ज्ञानाख्याम् एतां भूमिं त्वां वच्मि।

व्याख्या - पूर्णबोधात् चैतन्यात् अहमित्यस्य प्रथमोदयो यत्र (यतश्च व्यक्ततया न ज्ञायते) तद् बीजजाग्रदिति प्रथमा अज्ञानभूमिः। यत्र अहङ्कृतिः अङ्कुरोद्भेद

348. ***RSV 1*** and ***RSV 2*** read as चैतन्यात्. ***GN*** and Vera reads as चैतन्यं.

349. ***RSV 1*** and ***RSV 2*** wrongly read as जाग्रस्वप्न.

350. ***RSV 1***, ***RSV 2*** read as हताहंकृतिपरिमिलनाद्यात्मनो राज्यमत्र. ***GN*** reads हताहंकृतिपरिमिलनाद्यन्मनो राज्यमत्र. ***Vera*** reads as हताहंकृतिपरिमिलनाद्यन्मनोराज्यमत्र.

351. ***RSV 1***, ***RSV 2*** and ***GN*** read as स्नप्नोऽपि. ***Vera*** reads as स्वप्नो हि.

352. ***Vera*** wrongly reads as स्वपनपदञ्जुषो and the editor laments of a छन्दोभङ्ग.

353. ***RSV 1***, ***RSV 2*** and ***GN*** read as सुप्तीः . ***Vera*** reads as सुप्तिः .

354. ***RSV 1***, ***RSV 2*** and ***Vera*** read as कथिता ज्ञानभूमिः . ***GN*** reads as कथिताऽज्ञानभूमिः.

355. All the four previous editions have the reading पुनस्त्वं.

356. ***RSV 1*** and ***RSV 2*** read wrongly as वाच्मि.

इव व्यक्तताम् उदयमयते सा जाग्रदाख्या भूमिः। सा तृतीया महाजाग्रदाख्या भूमिः यत्र तीव्रतामापन्ने अहन्ताममत्वे जनिमृतिचक्रेण परिवर्तमाने विजृम्भतः। हताया अहङ्कृत्याः (विनाशिक्या अहङ्कृत्याः) मेळनात् मनोराज्यकल्पनम् - अहमेतत् कृतवान्, मयैतद् आप्तव्यम् इत्यादिमनोराज्यकल्पम् - सा जाग्रत्स्वप्नभूमिः। सम्यग् भुक्त्वा सुखं स्वपतः या अज्ञानभूमिः सा स्वप्नाख्या, यत्रापि मनोराज्यकल्पनमस्ति। जाग्रदवस्थायां योऽनुभवः जातः तस्य स्वापे स्मरणं तत् स्वप्नजाग्रदाख्या भूमिः। सर्वामहन्ताविकृतिं परित्यज्य गाढे अज्ञानान्धकारे अविद्यायां लीनावस्था सुप्तिरित्यज्ञानभूमिः। इति सप्त अज्ञानभूमीरुक्त्वा संसारध्वंसिनीः सप्त ज्ञानभूमीः तवाहं कथयामीति प्रतिजानीते गुरुः। (१४७-१४८)

१४९-१५०.

सप्त ज्ञानभूमीः नाम्ना निर्दिशति द्वाभ्याम्।

आद्या सा[357] हि शुभेच्छा विचारणा द्वितीया तृतीया च।
तनुमानसी चतुर्थी सत्वापत्तिरसंसक्तिनाम्नी[358] च।। १४९।।
सा पञ्चमी तु षष्ठी पदार्थभावना तुर्या।
भूः सप्तमी सुधीन्द्रैरेवं कथिता निबोधैताः।। १५०।।

अन्वयः - सा शुभेच्छा हि आद्या। द्वितीया विचारणा। तृतीया तनुमानसी। चतुर्थी सत्वापत्तिः। पञ्चमी च सा असंसक्तिनाम्नी। षष्ठी पदार्थभावना। सप्तमी भूः तुर्या। सुधीन्द्रैः एवं कथिताः एताः निबोध।

व्याख्या - एवमेतासां ज्ञानभूमीनां नामनिर्देशः कृतः। (१४९-१५०)

१५१-१५२.

एतासां ज्ञानभूमीनां स्वरूपं निरूपयति द्वाभ्याम्।

दुष्टं सङ्गमुपेक्ष्य या परशिवज्ञाने शुभेच्छा रतिः
ब्रह्मज्ञैः सह बोधशास्त्रसतताभ्यासो[359] विचाराभिधा।
सा प्रोक्ता[360] तनुमानसीति मुनिभिः सर्वेषणावर्जनं
सत्वापत्तिरयञ्च[361] भूत्रितयकाभ्यासेन तत्त्वोदयः।। १५१।।

---

357. ***RSV 1*** and ***RSV 2*** read as आद्या स हि. ***GN*** and ***Vera*** reads as अत्राद्या हि.

358. All the previous editions read असंसक्तिनामा. However, as the term is adjective to the word ज्ञानभूमिः, it would be better to have it in the feminine.

359. ***Vera*** reads as बोध्यशास्त्रसतताभ्यासो.

360. ***Vera*** reads as सम्प्रोक्ता.

361. ***RSV 1*** and ***RSV 2*** read as सत्वापत्तिरयञ्च. ***GN*** and ***Vera*** reads as सत्वापत्तिरियञ्च.

तत्त्वासक्तहृदो ह्यभानमसतः[362] प्रोक्ता त्वसंसक्तिका
स्वानन्दस्फुरणात् त्रिपुट्यनुदये भावः पदार्थस्य हि।
ब्रह्मैकस्थितिरेव मौनरसिका[363] तुर्येति सा गीयते
तुर्यातीतपदेति पूर्वमुदिता चैताः[364] शृणुष्वाधुना।। १५२।।

अन्वयः - दुष्टं सङ्गमुपेक्ष्य परशिवज्ञाने या रतिः (सा) शुभेच्छा । ब्रह्मज्ञैः सह बोधशास्त्रसतताभ्यासः विचाराभिधा। सर्वेषणावर्जनं सा तनुमानसीति मुनिभिः प्रोक्ता। भूत्रितयकाभ्यासेन अयं तत्त्वोदयश्च सत्वापत्तिः । तत्त्वासक्तहृदः असतः अभानं तु असंसक्तिका प्रोक्ता। स्वानन्दस्फुरणात् त्रिपुट्यनुदये पदार्थस्य हि भावः । मौनरसिका ब्रह्मैकस्थितिरेव सा तुर्या इति गीयते। (सैव) तुर्यातीतपदा इति पूर्वम् उदिता। अधुना एताः शृणुष्व च।

व्याख्या - दुष्टं सङ्गमुपेक्ष्य सत्सङ्गे वेदान्तविषयश्रवणे चर्चायां रतिर्या जायते सा प्रथमा शुभेच्छानामिका भूमिः। अधिगतपरमार्थैः सह ब्रह्मज्ञानविषयकस्य शास्त्रस्य परिचिन्तनं विचाराख्या द्वितीया भूमिः। एषणात्रितयस्य परिवर्जनम्, ऐन्द्रियेषु भोगेषु अनिच्छा च तनुमानसीति तृतीया भूमिः। एतासां तिसृणाम् अभ्यासेन जायमानस्तत्त्वोदयः एव सत्वापत्तिनामिका चतुर्थी। तत्त्वाभिनिविष्टस्य, असतः अभानम्, अर्थात् मनसः असद्वृत्तिराहित्यं, ब्रह्मभिन्ने अभिमानराहित्यञ्च असंसक्त्याख्या पञ्चमी भूमिः। स्वानन्दस्य स्फुरणात् त्रिपुटीनाशः - अर्थात् ज्ञाता, ज्ञानं, ज्ञानविषयः इति त्रिताराहित्यम् - भवति; तदनु च पदार्थस्य, परमतत्त्वस्य, भावना भवति। सा हि षष्ठी भूमिः। सप्तमी भूमिः मौनेन वेद्या। मौनिभिर्वेद्या मौनरसस्वरूपा ब्रह्मैकत्वस्थितिः। सैव अभिज्ञैस्तुर्येति गीयते। पूर्वं, "तुर्यातीते वसेद्यो यदि"(२.१३३) इत्यादिपद्ये इयं तुर्या एव तुर्यातीता इत्युदिता। अधुना एता अधिकृत्य वदामि। अवहितमना भूत्वा शृणु इति गुरुराह। (१५१-१५२)

१५३.

ज्ञानभूमीनां मिथो भेदानाह –

पूर्वासां त्रितये भुवां जगदुदेत्येतद्धि जाग्रत्ततः
स्वप्नस्तुर्यभुवि प्रपञ्चविभवः सुप्तिः[365] पुनः पञ्चमी।

---

362. ***RSV 1*** and ***RSV 2*** read as तत्त्वासक्तहृदो ह्यभानमसतः. ***GN*** and ***Vera*** read as तत्त्वासक्तहृदोऽप्यभानमसतां.

363. ***Vera*** reads as मौनरसिकैः.

364. ***RSV1*** and ***RSV2*** read as पूर्वमुदितामेताः. ***GN*** and ***Vera*** reads as पूर्वमुदितामेतां.

365. ***Vera*** reads as सुप्तः.

अत्याश्चर्यनिजानुभूतिबलतः [366]षष्ठी तु तुर्या स्मृता
पश्चात्कल्पनहानतो मुनितयाऽतीतं ब्रवीति श्रुतिः।। १५३।।

अन्वयः - पूर्वासां भुवां त्रितये जगद् उदेति। ततः एतद् जाग्रत् तुर्यभुवि प्रपञ्चविभवः स्वप्नः हि। पञ्चमी पुनः सुप्तिः। षष्ठी तु अत्याश्चर्यनिजानुभूतिबलतः तुर्या (इति) स्मृता। (ततः) पश्चात् कल्पनहानतः अतीतम्। मुनितया श्रुतिः ब्रवीति।

व्याख्या - आद्यासु तिसृषु भूमिषु इदं बाह्यं जगत् जागर्ति। अतः एतत् त्रितयं जाग्रदिति कथ्यते। चतुर्थभूम्यां सत्त्वापत्तौ जगदेतत् स्वप्नतुल्यं भवेत्। अतः सा स्वप्नः इति कथ्यते। पञ्चम्यां जगद्भानं सदपि शनैरपयद् भवति। अतः सा सुषुप्तिरिति कथ्यते। षष्ठ्याञ्च भूम्यां स्वानन्दानुभवो जागर्ति। तत्र इदं जगन्नास्त्येव। जाग्रत्स्वप्नसुषुप्त्याख्याः सर्वा अपि तिस्रो भूमीः अतिक्रम्य सत्वाद् अस्याः तुर्या (तुरीया, चतुर्थी) इति नाम। सप्तमी, इमां तुर्यामप्यतीत्य तिष्ठति। तस्मात् तुर्यातीतेत्युच्यते। तत्र कल्पनाः याः का अपि न सन्ति। कल्पनाहानतः, अतीता ह्यवस्था सा। कल्पनातीतत्वात्, श्रुतिः तां मुनितया एव, मौनवृत्त्या एव ब्रवीतीति। (१५३)

१५४.

नामान्तराणि कथयति।

तुर्यस्थानस्य तुर्योत्तरपदकथने योग्यतां संशयानाः[367]
विद्वांसः सामिसुप्तिं[368] पुनरभिदधते[369] पञ्चमीं गाढसुप्तिम्[370]।
षष्ठीमेतत्पुनस्त्वं हृदि परिकलयन्नास्व[371] भूयः प्रवक्ष्ये
भूमीनां ज्ञाननाम्नां विबुधपरिगता ये प्रभेदा [372]हि तांश्च।। १५४।।

366. ***Vera*** reads as षष्ठा तुरीया स्मृता. However the commentary reads षष्ठी गाढसुषुप्तितुल्या तुर्येति कथ्यते.

367. ***RSV 1*** and ***RSV 2*** read as संशयानां. ***GN*** and ***Vera*** read as संशयानाः.

368. ***RSV 1***, ***RSV 2*** read as स्वामिसुप्तिं . ***GN*** and ***Vera*** read as सामिसुप्तिं.

369. ***RSV 1*** and ***RSV 2*** read as पुनरभिदधते . ***GN*** reads as पुरपिदधते. ***Vera*** reads as पुनरपि दधते.

370. All the previous editions read योगसुप्तिं. However, it should be गाढसुप्तिं going along with सामिसुप्तिं. It may be noted that the editor of *Prabhā* commentary misses the fact that the commentary favours the reading गाढसुप्तिं as it explains as पञ्चमीं सामिसुप्तिम् अर्धसुषुप्तिं षष्ठीं गाढसुषुप्तिं प्रतिपादयन्ती ....

371. ***RSV 1***, ***RSV 2*** and ***GN*** read wrongly as आस्वभूयः. ***Vera*** reads as आस्व भूयः.

372. ***Vera*** reads as हिताश्च.

अन्वयः - तुर्यस्थानस्य तुर्योत्तरपदकथने योग्यतां संशयानाः विद्वांसः पञ्चमीं सामिसुप्तिम् अभिदधते। षष्ठीं गाढसुप्तिञ्च। एतद् हृदि परिकलयन् आस्व। ज्ञाननाम्नां भूमीनां विबुधपरिगता ये प्रभेदाः तांश्च भूयः प्रवक्ष्ये।

व्याख्या - तुर्यभूमिरेव तुर्यातीता इति कथिता। केचन विद्वांसः तन्नाङ्गीकुर्वन्ति। ते एवं नामभेदान् स्वीकुर्वन्ति। पञ्चमी भूमिः सामिसुप्तिः। षष्ठी गाढसुप्तिः। सप्तमी च तुर्येति। एतत् त्वमवधारय। अधुना ज्ञानभूमीनाम् अपरानपि विभागप्रकारान् कथयामि इति।

अस्मिन् पद्ये आर्. एस्. वाध्यार् सम्पादनयोरुभयोरपि द्वितीयपादे स्वामिसुप्तिम् इति अपपाठो दृश्यते। सामिसुप्तिः, अर्धसुषुप्तिः एवात्र विवक्षितेति सुदर्शम्। सर्वेष्वपि पूर्वतनेषु सम्पादनेषु योगसुप्तिम् इति पादान्तिमं पदं पठितम्। स पाठस्तु अपपाठ एवेति द्रष्टुं शक्यते। किञ्च, प्रभाव्याख्याने एवमेव व्याख्यातं दृश्यते (पञ्चमीं सामिसुप्तिम् अर्धसुषुप्तिं षष्ठीं गाढसुषुप्तिं प्रतिपादयन्ती...)। सम्पादकेन अनवधानतया एतददृष्ट्वा योगसुप्तिम् इति पाठः निर्णीतः। (१५४)

१५५.

तानेव प्रकारभेदानाह -

ये पूर्वत्र [373]गता विरूढिमथ ते भूमित्रयेऽभ्यासिनो
नो मुक्ताश्चरमत्रयेषु[374] च वरा वर्या वरिष्ठा इति।
जीवन्मुक्तशरीरिणो विद इति प्रोक्ताश्चतुर्थीं गताः
भूयो ज्ञानभुवां वदामि विभवं सम्यक् शृणुष्वादरात्।। १५५।।

अन्वयः - ये पूर्वत्र भूमित्रये विरूढिं गताः ते अभ्यासिनः। नो मुक्ताः। चरमत्रयेषु च वराः वर्याः वरिष्ठाः इति, चतुर्थीं गताः जीवन्मुक्तशरीरिणः विदः इति (च) प्रोक्ताः। ज्ञानभुवां विभवं भूयो वदामि । आदरात् सम्यक् शृणुष्व।

व्याख्या - आद्यासु तिसृषु भूमिषु स्थिता अभ्यासिनः इत्युच्यन्ते। ते न मुक्ताः। चतुर्थ्यां भूम्यां स्थिताः ब्रह्मविदो भवन्ति। (ते च जीवन्मुक्ताः) मुक्ता अपि शरीरिणः। अन्त्यासु तिसृषु भूमिषु स्थिताः क्रमेण ब्रह्मविद्वराः, ब्रह्मविद्वरीयांसः, ब्रह्मविद्वरिष्ठाश्च भवन्ति। ज्ञानभूमीरधिकृत्य इतोऽपि किञ्चिद् वदामि। सावधानं शृणु इति शिष्यमाह गुरुः। (१५५)

373. ***Vera*** reads as गताविरूढिमथिते.

374. ***Vera*** reads as मुक्तास्ते चरमत्रयेषु.

१५६.

'स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयाद्' इति रीत्या ये आद्यासु तिसृषु भूमिषु प्रविष्टाः तेषां श्रेय एव भूयादित्याह-

सत्वापत्तिपुरातनेषु च पदेष्वभ्यासिनो ये नराः
ते मृत्वा[375] शनकैर्महत्सुखजुषो मुक्तिं परां प्राप्नुयुः।
[376]नास्मिन् घोरभवे पतेयुरथ ते नागुः शुभेच्छामपि
प्राप्तञ्चेत् प्रथमं[377] पदं करगतां जानीहि मुक्तिं मुने।। १५६।।

अन्वयः - ये नराः सत्वापत्तिपुरातनेषु च पदेषु शनकैः अभ्यासिनः ते महत्सुखजुषः मृत्वा परां मुक्तिं प्राप्नुयुः (च)। ते अस्मिन् घोरभवे न पतेयुः। अथ (प्रायेण नराः) शुभेच्छामपि न अगुः। (एवं स्थिते) प्रथमं पदं प्राप्तञ्चेत् (हे) मुने मुक्तिं करगतां जानीहि।

व्याख्या - सत्वापत्तिरिति या चतुर्थी भूमिर्वर्तते ततः प्राक्तनासु भूमिषु ये नरा अभ्यस्यन्ति ते क्रमेण महत्सुखमनुभूय मुक्तिं प्राप्नुयुरेव। अस्मिन् घोरसंसारे तेषां पतनं पुनर्न भवेत्। प्रायेण जनाः शुभेच्छानामिकां भूमिमेव न गच्छन्ति। यदि कश्चन प्रथमं पदं शुभेच्छानामकं प्राप्नोति, तस्य पुनः पतनं नैव भवेत्। तस्य अग्र्या मुक्तिः करगतैव। नास्ति सन्देहः इत्याह।

अत्र चतुर्थपादे प्रथमं पदम् इत्यत्र चरमं पदम् इति पाठो दत्तः जानकीशरण आचार्येण। किन्तु सः अपपाठ एवेति भाति, द्राविडमूलग्रन्थपर्यालोडनेन। तत्र "मुतल् पूमि कैवन्ताल् मुत्तियुं कैवन्ततामे" (*mutal pūmi kaivantāl muttiyuṃ kaivantatāmē*) इति पठितम्। (१५६)

१५७.

आसु भूमिषु प्रथमां द्वितीयाञ्च प्राप्ता जनाः म्लेच्छाश्चेदपि मुक्ता भवेयुरित्याह -

अस्यां ये भुवि योगभूमिषु नराः पूर्वां द्वितीयाञ्च वा
प्राप्ताश्चेदधमाधमा अपि भृशं मुक्ताः शपे श्रीगुरौ[378]।
ये वाक्ये कृतसंशयाः पुनरमी भ्रष्टाः श्रुतिर्नो मृषा
ब्रह्मैवाहमिति स्थिरो भव महावाक्योक्तरीत्या सदा।। १५७।।

---

375. ***RSV 1, RSV 2***, and ***GN*** read wrongly as भूत्वा. ***Vera*** reads as मृत्वा.

376. ***Vera*** reads as आशाघोरभवे.

377. ***Vera*** reads as परमं.

378. ***RSV 1, RSV 2*** read wrongly as श्रीगुरो . ***GN*** and ***Vera*** read as श्रीगुरौ.

अन्वयः - अस्यां भुवि ये नराः योगभूमिषु पूर्वां द्वितीयाञ्च वा प्राप्ताः ते अधमाधमा (भवन्ति चेद्) अपि भृशं मुक्ताः (भवेयुः)। श्रीगुरौ शपे। ये (अस्मिन्) वाक्ये कृतसंशयाः पुनरमी भ्रष्टाः भवेयुः। श्रुतिः नो मृषा। महावाक्योक्तरीत्या सदा ब्रह्मैवाहमिति स्थिरो भव ।

व्याख्या - ज्ञानभूमिषु आद्यां द्वितीयाञ्च ये प्राप्ताः तेषां निश्चयेन मुक्तिर्भवेत्। ते म्लेच्छाः अधमाधमा भवन्ति चेदपि मुक्तिर्नूनं भविष्यति। अहं गुरोरुपरि प्रतिज्ञां कुर्वे। ये पुनः अत्र सन्देहबुद्धिं कुर्वन्ति तेषां भ्रंशो निश्चयेन भवेत्। यतः श्रुतिः नैव (न उ , उकारो निश्चयार्थकः) मृषा स्यात्। तस्मात् त्वं महावाक्योक्तरीत्या ब्रह्मैवाहमिति सदा स्थिरो भव इति शिष्यमादिशति गुरुः। (१५७)

१५८.

म्लेच्छा अपि ज्ञानभूमिगताः मुक्ता भवेयुरिति यदुक्तं तत्र सन्दिग्धे शिष्यः।

म्लेच्छानामपि योगभूमिरुदिता मुक्तिप्रदेति प्रभो
दत्तं तण्डुलवत्त्वया निजपदं मे शालिवज्जन्मिनः।
ये दारात्मजगेहभोगविमुखाः संन्यासिनस्तान् पुनः
ज्ञानाध्वाधिकृतान्[379] वदन्ति कतिचित्तत्संशयं छिन्धि मे।। १५८।।

अन्वयः - (हे) प्रभो शालिवज्जन्मिनः मे निजपदं तण्डुलवत् त्वया दत्तम्। योगभूमिः म्लेच्छानामपि मुक्तिप्रदेति उदिता। कतिचित् (जनाः) दारात्मजगेहभोगविमुखाः ये संन्यासिनस्तान् ज्ञानाध्वाधिकृतान् वदन्ति। तत् मे संशयं छिन्धि।

व्याख्या - अज्ञानतिमिरेण आवृततया, तुषेणावृतशालिवज्जातस्य मे निजपदं भवतैव दत्तम् । अज्ञानावरणमुन्मुच्य दिव्यं ज्ञानस्वरूपं निजपदं भवतैव दत्तम्। तत्, तस्माद्, इमं मदीयं संशयं कृपया छिन्धि। छेत्तुमर्हति भवान्। अयं मे संशयः। वेदाधिकारिणो गृहस्थस्य, दारान् गेहं देहमात्मजञ्च सर्वात्मना परित्यक्तवत एव ज्ञानमार्गे अधिकारः इति वदन्त्यभिज्ञाः। भवता तूच्यते, म्लेच्छा अपि योगभूमिषु आद्यां द्वितीयाञ्च प्रविष्टाश्चेत् तेषां निश्चयेन मुक्तिरिति। भवान् कृपया मम संशयं छेत्तुमर्हतीति। (१५८)

१५९.

स्थान एव त्वदीयः संशयः इति शिष्यमभिनन्द्य संन्यासस्य चातुर्विध्यमाह -

स्थाने ते विशयः शृणुष्व कथये वत्साद्य मोक्षाप्तये
यत्संन्यासचतुष्टयं निगदितं तत्रापि भेदा इमे।

379. ***Vera*** reads as ज्ञानाद्वाधिकृतान्.

आद्यो यः स कुटीचकः किल बहूदाख्यश्च हंसः परो
हंसश्चेति हि हेतुरत्र विरतिर्बाह्यो[३८०] न वेषः किल।। १५९।।

अन्वयः - (हे) वत्स ते विशयः स्थाने (एव)। मोक्षाप्तये यत्संन्यासचतुष्टयं निगदितं (तत्) कथये। तत्रापि इमे भेदाः । यः आद्यः स कुटीचकः। बहूदाख्यः, हंसः, परो हंसश्चेति। विरतिः हि अत्र हेतुः। न बाह्यो वेषः किल।

व्याख्या - हे वत्स समुचित एव ते संशयः। मोक्षाप्तये अभिज्ञैः संन्यासः उक्तः। तत्र संन्यासस्य चत्वारो भेदाः। तानहं वदामि। प्रथमः कुटीचकः संन्यासी। द्वितीयो बहूदकः। तृतीयो हंसः। चतुर्थश्च परमहंसः। संन्यासस्य लिङ्गं विषयवैराग्यम्। बाह्यो वेषः संन्यासस्य लिङ्गं नास्ति। (१५९)

१६०.

संन्यासस्य लिङ्गभूता विरक्तिश्च त्रिविधेत्याह -

तिस्रस्ता हि विरक्तयः श्रुतिमता मन्दा च तीव्रा तरां[३८१]
तीव्रा शुक्समये विरक्तिरधमा[३८२] यावच्छरीरं मम।
स्त्रीपुत्रद्रविणादि नेति विदिता [३८३]तीव्रातितीव्रा पुनः
सर्वं कर्मफलं मृषेति नितरां त्यागे निबोधादरात्।। १६०।।

अन्वयः - श्रुतिमताः तिस्रः विरक्तयः (भवन्ति) हि। ताः मन्दा, तीव्रा, तरां तीव्रा च। शुक्समये यावत् शरीरं (तावदियं शुक्) मम इति विरक्तिः अधमा। यावच्छरीरं मम स्त्रीपुत्रद्रविणादि न इति (इयं) तीव्रा विदिता। सर्वं कर्मफलं मृषा इति नितरां त्यागे पुनः अतितीव्रा इति आदरात् निबोध।

व्याख्या - श्रुतिसम्मतास्तिस्रो विरक्तयो भवन्ति। मन्दा तीव्रा, तीव्रतरा चेति। तास्वाद्या दुःखानुभवसमये जायमाना विरतिः। कीदृशी सा? यावदिदं मम शरीरं तावत् शुग् भवत्येव इत्येवंरूपा। तीव्राख्या द्वितीया च, मम भार्या पुत्रः द्रविणम् इत्यादिकं मास्तु इति एषणात्रितयवर्जनरूपा विरक्तिः। सर्वं कर्मफलं मृषा इति निश्चयेन नितरां सर्वकर्मणां त्यागः अतितीव्रा विरक्तिः । (१६०)

---

380. ***RSV 1*** and ***RSV 2*** read as विरतिर्बाह्यो . ***GN*** and ***Vera*** read as विरतिन्र्यासो.
381. ***Vera*** reads as तीव्रातमा. The editor gives this note: {अत्र "तीव्रतमा" इति पाठ [sic] स्यात्। मूले छन्दस्त्वात् "तीव्रातमान्" इति प्रयोगः दृश्यते.}
382. ***RSV 1*** , ***RSV 2*** and ***Vera*** read as विरक्तिरधमा. ***GN*** reads as विरतिरधमा.
383. ***RSV 1*** and ***RSV 2*** read wrongly as तीव्रा तितीव्रा.

१६१.

विरक्त्यनुसारं संन्यासभेदानाह।

मन्दे न्यासः कोऽपि पापे[384] न तीव्रे
न्यासः स स्याद्यः कुटीचो बहूदः।
निःशक्तीनां पूर्व एव प्रक्लृप्तः
शक्त्याढ्यानामन्तिमो वेदविद्भिः ।। १६१।।

अन्वयः - मन्दे पापे कोऽपि न्योसो न। तीव्रे आद्यः स कुटीचः स्यात्। (ततः) बहूदः। वेदविद्भिः पूर्व एव निःशक्तीनां प्रक्लृप्तः। शक्त्याढ्यानाम् अन्तिमश्च।

व्याख्या - पापनुभवसमये एव जायमानं यद्वैराग्यं मन्दं, न सुदृढं, तस्मिन् संन्यासो न भवति। तीव्रे वैराग्ये द्विविधः संन्यासः। आद्यः कुटीचः। द्वितीयश्च बहूदः। तत्र कुटीचः गृहाद् बहिर्गमने अशक्तानां कल्पितः। द्वितीयश्च बहिर्लोकगमने शक्तिमतां प्रक्लृप्तो वेदविद्भिः इति। (१६१)

१६२.

अतितीव्रविरक्तौ संन्यासद्वितयं भवतीत्याह -

द्वेधा न्यासो वर्णितश्चातितीव्रे[385] हंसो हंसः स्यात्परो हंसयोगी।
मुक्तिं सत्ये लोक एव प्रयायादन्यो ज्ञानादत्र मुक्तिं लभेत।। १६२।।

अन्वयः - अतितीव्रे द्वेधा न्यासो वर्णितः। हंसः परो हंसश्च स्यात्। हंसयोगी सत्ये लोके एव मुक्तिं प्रयायात्। अन्यः ज्ञानाद् अत्र मुक्तिं लभेत।

व्याख्या - अतितीव्रवैराग्ये द्विविधः संन्यासः। हंसः परमहंसश्चेति। तत्र हंससंन्यासी सत्यलोके गत्वैव मुक्तिं लभते। परमहंसस्तु ज्ञानादत्रैव मुक्तिं लभेत इति। (१६२)

---

384. All the previous editions read पापेन. However, it should be पापे न to keep conformity with the original text which reads पाविमन्दपलत्तिल् संन्यासङ्कळ् ओन्नुं पलिच्चिटाते (*pāvi mantapalattil sannyāsaṅkal onnuṃ paliccitạ̄tē*) . It may be noted that the editor of *Kaivalyadīpikā* (***Vera***) misses the fact that the commentary *Prabhā* favours the reading पापे न as it explains as मन्दे वैराग्ये पापे पापफलानुभवकालजन्यत्वेन क्षणिके. Moreover it (the commentary *Prabhā*) cites the text *Jīvanmuktiviveka*, which citation makes things clearer. These are the two citations: मन्दे न्यासो न कोऽपि हि, and तीव्रे न्यासद्वयं भवेत् (*Jīvanmuktiviveka* 4.8 and 4.9).

385. ***RSV1***, ***RSV2*** read as न्यासौ वर्णितौ चातितीव्रे. ***GN*** and ***Vera*** read as न्यासो वर्णितश्चातितीव्रे.

१६३.

परमहंससंन्यासोऽपि द्विविधः, जिज्ञासुज्ञानिभेदादित्याह -

द्वैविध्यं परहंसकेऽपि[386] विदितं वत्स शृणुष्व ब्रुवे।
जिज्ञासुः प्रथमो मतस्तदपरो विज्ञानवान् संमतः।
आद्यो भूत्रयनिष्ठितो हि चरमो जीवन्विमुक्तः स्वयं
जिज्ञासुद्वितयं वदन्ति कवयस्तद्भेदमाकर्णय ।। १६३।।

अन्वयः - परहंसकेऽपि द्वैविध्यं विदितं (हे) वत्स। शृणुष्व, अहं ब्रुवे। प्रथमो जिज्ञासुः मतः। तदपरो विज्ञानवान् संमतः। आद्यो भूत्रयनिष्ठितः। चरमो हि स्वयं जीवन्विमुक्तः । कवयः जिज्ञासुद्वितयं वदन्ति । तद्भेदमाकर्णय।

व्याख्या - परमहंससंन्यासे अपि द्वैविध्यमस्ति। एकः जिज्ञासुः। अन्यश्च विज्ञानवान् (मुमुक्षुः)चेति। तत्र जिज्ञासुः आद्यासु तिसृषु ज्ञानभूमिषु स्थितः। परमहंसस्तु जीवन्मुक्तः इति। (१६३)

१६४.

किं म्लेच्छा अपि मुक्तिं लभन्ते श्रुत्युक्तरीत्या संन्यासिन एव मुक्ता भवेयुः किल इति शिष्यस्य सन्देहं निघ्नन्नाह गुरुः -केवलं ज्ञानमेव मोक्षकारणमिति।

बान्धाधायकगेहसक्तिरहिताः केचिच्छिवज्ञानिनो[387]
जायन्ते कतिचिद् द्विजान्वयभवा भूपा विशः पादजाः।
ज्ञानेनैव विमुक्तिमापुरिति यद् दृष्टञ्च लोके श्रुतौ
तत्तिष्ठोज्झितसंशयः श्रुतिगिरा युक्त्याऽनुभूत्या सुखी।। १६४।।

अन्वयः - केचित् बन्धाधायकगेहसक्तिरहिताः शिवज्ञानिनो बन्धाधायकगेहसक्तिरहिताः केचिच्छिवज्ञानिनोजायन्ते। कतिचिद् द्विजान्वयभवा भूपा विशः पादजाः च ज्ञानेनैव विमुक्तिमापुः इति यत् श्रुतौ लोके च दृष्टं तत् श्रुतिगिरा अनुभूत्या च (सम्मतम् इति) उज्झितसंशयः सुखी तिष्ठ।

व्याख्या - सत्यम्। केचन सङ्गं त्यक्त्वा बन्धकारणं देहादिकं संन्यस्य असक्ताः सन्तः परमपदम् अखण्डबोधस्वरूपं प्राप्ताः। किन्तु अपरे केचन संन्यासं विना केवलेन ज्ञानेनैव मुक्ता इति श्रुतौ लोके च दृश्यते। तेषु मुक्तेषु

386. ***Vera*** wrongly reads as परहंसकेंति.

387. ***RSV 1*** and ***RSV 2*** read as केचिच्छिवज्ञानिनो. ***GN*** reads as केचिच्च विज्ञानिनो. ***Vera*** reads as केचिच्च विज्ञानिनां.

केचिद् ब्राह्मणाः सन्ति। केचन क्षत्रियाः, केचन वैश्याः केचन च शूद्राः। यस्मादेवं तस्मात्त्वं महावाक्यश्रवणेन मननेन, युक्त्या निदिध्यासनेन अनुभूत्या स्वीयया च मुक्तसंशयः सुखमास्व इति शिष्यस्य संशयं छिनत्ति गुरुः। (१६४)

१६५.

तत्त्वमसिवाक्यार्थानुभवमाह -

उत्पत्तिर्मम चेन्मृतिश्च [३८८]वितताऽनुत्पत्तिगन्धस्य मे
नैव स्यान्मृतिभाषणञ्च जनिमृत्याख्यानदूरं[३८९] परम्।
ब्रह्मैवाहमिति[३९०] स्थितस्तदपि मद्रूपं स्थितं नो भिदा
[३९१]व्योमेवाततविग्रहो ह्यनुभवानन्दामृताम्भोनिधिः।। १६५।।

अन्वयः - मम उत्पत्तिश्चेन्मृतिश्च वितता। अनुत्पत्तिगन्धस्य मे मृतिभाषणञ्च नैव स्यात्। जनिमृत्याख्यानदूरं परं ब्रह्मैवाहमिति स्थितः। तदपि मद्रूपं स्थितम्। भिदा नो। व्योमेव आततविग्रहो हि (अहम्) अजः अनुभवानन्दामृताम्भोनिधिः (अस्मि)।

व्याख्या - मम उत्पत्तिश्चेदेव मृतिरपि भविता। नियतं वितता व्याप्ता, अनयोर्नियतोऽव्यभिचरितः सम्बन्धः। मम उत्पत्तिगन्ध एव नास्ति। कुतः पुनर्मृतिः? जनिमृत्याख्यानं यस्य तस्माद्दूरे यत् परं तदस्म्यहम्। जनिः मृतिः इत्याख्यानं यस्य तस्माद्दूरे वर्तमानं नित्यं यद्वस्तु तदहं परं ब्रह्म। यच्च सोपाधिकं शरीरावच्छिन्नं चैतन्यम् अहम्पदवाच्यं तच्च अहमेव। घटनाशे यथा घटाकाशम् पराकाशे लीनं भवति तथा अन्तःकरणोपाधिनाशे सोपाधिकम् 'अहम्' निरुपाधिके लीनं भवति। तेन अनयोर्भिदा न उ। नैव। आकाशवद् वितत्य स्थितम् अखण्डानन्दस्वरूपम् अखण्डबोधस्वरूपञ्च अहम् इति। (१६५)

१६६.

ब्रह्मैवाहम् इति बोधे अहम्पदार्थः ज्ञायते। परं ब्रह्मपदार्थः कः इति न ज्ञायते इत्यतः तं निरूपयति।

ब्रह्मैवाहं मां न जानामि चेत्तन्मद्रूपं किं चेन्मतिः सा सुषुप्तौ।
नष्टा नो चेत्तत्र वा ज्ञानसाक्षी सम्पूर्णोऽहं संविदानन्दसान्द्रः।। १६६।।[३९२]

388. ***GN*** and ***Vera*** read as भविता.

389. ***RSV 1*** and ***RSV 2*** read as जनिमृत्याख्या न दूरं. ***GN*** reads as जनिमृत्याख्यानं दूरं. ***Vera*** reads as जनिमृत्याख्यानदूरं.

390. ***RSV 1*** and ***RSV 2*** read as ब्रह्मैवाहमिति स्थितस्तदपि. ***GN*** and ***Vera*** read as ब्रह्मैवाहमजस्तदपि.

391. ***Vera*** reads as व्योमे वा ततविग्रहो.

392. ***Vera*** does not have these two verses (this and the next one).

अन्वयः - ब्रह्मैव अहं मां न जानामि (इति) चेत् तत् मद्रूपं किम्? मतिश्चेत् सा सुषुप्तौ नष्टा। नो चेत् तत्र ज्ञानसाक्षी संविदानन्दसान्द्रः सम्पूर्णो वा अहम्।

व्याख्या - ब्रह्मैवाहम् इत्युच्यते। अहं मां न जानामीति शिष्य आह। गुरुः पृच्छति — 'कः पृच्छति मद्रूपं किमिति?'। मतिरित्युत्तरयति शिष्यः। गुरुराह। सा न भवितुमर्हति। यतः सुषुप्तौ सा नष्टा भवति। किन्तु अहम्बोधो न नष्टः। किन्तु ज्ञानसाक्षी एव अहम्पदार्थः। सुषुप्तावपि ज्ञानमासीत्। तस्य साक्षी 'अहम्'। सुषुप्तौ ज्ञानमासीदिति पश्चात्तनात् 'सुखमहमस्वाप्सम' इत्यनुभवाद् अनुमीयते। किञ्च सोऽहम् सुखस्वरुप इत्यपि अस्माद् ज्ञायते। सान्द्रः संविदानन्दः एव अहमासम्। अस्मि च। योऽहं जानामि सोऽपि संविदानन्द एव अखण्डहोधानन्द एव। यदहं जानामि तदपि सान्द्रः संविदानन्द एव। (१६६)

१६७.

सम्पूर्णत्वं कथं ज्ञायते इत्युच्यते।

सम्पूर्णत्वं मम कथमिति प्रोच्यते श्रूयतां तत्
सर्वं मुक्त्वा विषयनिकरं ज्ञाननिद्रां गतस्य।
आनन्दो यः स्फुरति विततोऽखण्डता सैव नान्या
खण्डं लोके न भवति सुखं निर्णयस्त्वेवमेव।। १६७।।

अन्वयः - मम सम्पूर्णत्वं कथमिति प्रोच्यते । तत् श्रूयताम्। सर्वं विषयनिकरं मुक्त्वा ज्ञाननिद्रां गतस्य यो विततः आनन्दः स्फुरति सैव अखण्डता। न अन्या। लोके खण्डं न सुखं भवति । अयमेव तु निर्णयः।

व्याख्या - अहमः सम्पूर्णत्वम् अथवा अखण्डता कथमिति वदामि। सर्वं विषयनिकरं मुक्त्वा ज्ञाननिद्रां गतस्य यो विततः आनन्दः स्फुरति सैव सम्पूर्णता। अथवा अखण्डता। लोके अखण्डस्यैव, भूम्नः सखत्वम्। न त्वल्पस्य। अयमेव निश्चयः - यः अनुभोक्ता, सोऽपि, भोगविषयश्च अखण्डानन्द एवेति। (१६७)

१६८.

प्रज्ञानघन एवाहं ब्रह्मेति दर्शयति।

मनःसङ्कल्पोत्थं जगदिदमशेषं निवसति
प्रबोधे[393] नान्यत्र [394]द्रुततरमुपेक्ष्यैव मनसा।

393. All the previous editions have the reading प्रबोधेनान्यत्र. The *Prabhā* commentary favours the reading प्रबोधे नान्यत्र. It runs as प्रबोधे चैतन्ये तिषठति नान्यत्र.

394. *GN* reads स्फुटतरम्।

विचारे संक्लृप्ते गगनमिव चाद्यन्तरहितं
परं तत्त्वं शिष्टं चिदहमहमेतन्न[३९५] विशयः।। १६८।।

अन्वयः - मनःसङ्कल्पोत्थम् अशेषम् इदं जगत् प्रबोधे निवसति। अन्यत्र न। मनसा द्रुततरं (सर्वम्) उपेक्ष्य विचारे संक्लृप्ते च गगनमिव आद्यन्तरहितम् एतत् परं तत्त्वं शिष्टम्। अहं चित्। न विशयः।

व्याख्या - मनसा सङ्कल्पेन कल्पितमिदमशेषं जगद् वस्तुतः ज्ञान एव प्रतिष्ठितम्। नान्यत्र। मनसा सर्वम् उपेक्ष्य विचारे क्रियमाणे किं शिष्यति? आकाशमिव आद्यन्तरहितं परं तत्त्वमेव शिष्यति। चिदेव, चैतन्यमेव, ज्ञानमेव शिष्यति। सा चिदेवाहम्। तत्र संशयस्यावकाशलेशोऽपि नास्तीति। (१६८)

१६९.

अहम् अखण्डः सन् कथं वा तं भूमानमानन्दमनुभवितुं शक्नोमीति शिष्यस्य प्रश्नं समाधत्ते।

तथा[३९६] पूर्णो भूत्वा कथमनुभवेयं [३९७]विततता-
मिति ब्रूषे[३९८]ऽवस्थास्वपि च तिसृषु त्वं निजहृदि।
समुत्पन्ना वृत्तीर्मुहुरपि निषिध्यैव शनकैः
स्थितश्चेदानन्दो निरतिशय एव स्फुरति ते।। १६९।।

अन्वयः - तथा पूर्णो भूत्वा कथं तां वितताम् अनुभवेयम् इति ब्रूषे? तिसृष्वपि अवस्थासु निजहृदि उत्पन्नाः वृत्तीः मुहुरपि शनकैः निषिध्य स्थितश्चेत् ते निरतिशयः आनन्दः स्फुरत्येव।

व्याख्या - उक्ताम् अखण्डानन्दानुभूतिं कथमहं लभेय इति शिष्यः सोत्कण्ठं पृच्छति। स्वयं पूर्णो भूत्वा विततां व्याप्ततां सर्वव्याप्ताम् आद्यन्तरहिताम् अखण्डां तां चितिं कथं वाऽहमनुभवेयम् इति अतिशयिता उत्कण्ठा वाञ्छा वा

395. ***Vera*** reads as यदहमेतन्न.

396. All the previous editions have the reading यथा. However this reading (तथा) sounds more apt.

397. ***Vera*** reads as वितताभिति. The editor adds one word हि just before this word and thus he has avoided छन्दोभङ्ग. But the fact is that the commentary clearly favours the reading विततताभिति. The relevant passage runs as विततताभात्मनोऽपरिच्छिन्नताम्. This passage also is misconstrued by the editor.

398. All the previous editions have the reading प्रोक्ते. However this reading (ब्रूषे) sounds more apt.

शिष्यस्य। तत्र आचार्यो वक्ति। पूर्वं ज्ञानभूमिसप्तकनिरुपणावसरे जाग्रत्, स्वप्नः, सुषुप्तिः, तुरीयः इति अवस्थाचतुष्कमुक्तं किल। तासु आद्यासु तिसृष्ववस्थासु निजहृदि समुत्थिताः सर्वा अपि वृत्तीः भूयो भूयः प्रशाम्य शनकैः विशुद्धे सत्वे स्थितः तूष्णीकः जोषमास्व। तदानीं तव निरतिशयः आनन्दः, अखण्डानन्दः, स्फुरेदेव। नास्त्यत्र सन्देहकणिकाया अप्यवकाश इति। (१६९)

१७०.

वृत्तीरहं कथां वा हास्यामीति प्रश्नं समाधत्ते।

अनवरतमुदग्रा[399] वासनाभिः प्रवृत्ताः
हृदि पुनरिह वृत्तीर्नाथ हास्यामि केन।
इति भजति नृपत्वं चेत्प्रबोधो मनीषा
सह [400]करणसमूहैर्दासतां त्वं विमुक्तः।। १७०।।

अन्वयः - नाथ! हृदि वासनाभिः प्रवृत्ता उदग्राः वृत्तीः पुनः केन इह हास्यामि इति (चेत्) प्रबोधः नृपत्वं भजति चेत् करणसमूहैः सह मनीषा दासतां भजति। त्वं विमुक्तः (भवेः)।

व्याख्या - हृदये सदा वासनाभिः प्रवर्तिता प्रबलाः वृत्तयः भवन्त्येव। कथं ताः हास्यामि, त्यक्ष्यामीति शिष्यः पृच्छति। त्वं प्रबोधं राजानं कुरु। इन्द्रियैः समेतां बुद्धिञ्च दासीं कुरु। तदा त्वं वृत्तिभ्यो मुक्तो भवेः इति आचार्यः समाधत्ते। (१७०)

१७१.

वृत्तिनिरोधाय उपायान्तरमाह -

भस्त्रीवद्धमनोद्यते[401] मरुति हृत्पद्मे निरुद्धे सुखं
[402]तत्तद्वृत्तिनिरोधनामकमहायोगेन ता वृत्तयः।
न स्युः काश्चन तत्र चेन्न लभते चित्तं [403]प्रतिष्ठां तवा -
[404]विद्या संसृतिकारणं यदि हता[405] लीयेत वृत्तिः स्वयम्।। १७१।।

399. ***RSV 1*** reads उदग्रवासनाभिः. ***RSV 2*** and ***GN*** read उदग्रावासनाभिः. ***Vera*** reads उदग्रा वासनाभिः.

400. All the previous editions have the wrong reading सहकरणसमूहैः.

401. ***Vera*** reads as भस्त्रीवद्यमनोद्यते.

402. ***Vera*** reads as यत्तद्वृत्तिनिरोधनामकमहायोगेन.

403. ***Vera*** reads as प्रतिष्ठान्न वा.

404. ***RSV 1***, ***RSV 2***, and ***GN*** read अविद्यासंसृतिकारणं. ***Vera*** reads as विद्या संसृतिकारणं.

405. ***RSV 1***, ***RSV 2*** read as हिता. ***GN*** reads as ह ता. ***Vera*** reads as हता. The original text has the word पिटुङ्किटिल् (*piṭuṅkiṭil*, which means if uprooted) for यदि हता.

अन्वयः - भस्त्रीवत् धमनोद्यते मरुति हृत्पद्मे तत्तद्वृत्तिनिरोधनामकमहायोगेन सुखं निरुद्धे ताः वृत्तयः न काश्चन स्युः। तत्र तव चित्तं प्रतिष्ठां न लभते चेत् वृत्तिः स्वयं लीयते, यदि संसृतिकारणम् अविद्या हता (स्यात्)।

व्याख्या - भस्त्र्याः चर्मनिर्मितधमनिकायाः अन्तर्गत्वा बहिर्यथाऽऽगच्छति वायुः तथैव वायुः अस्माकं शरीरेऽन्तस्सञ्चारी भवति। तं वायुं चित्तवृत्तिनिरोधनामकेन योगाभ्यासेन हृत्पद्मे निरुद्धं कुर्यात्। एवं कृते चित्तवृत्तयः सर्वा अपि नष्टा भवेयुः। योगाभ्यासे अशक्तः चेत्, त्वं संसृतेर्मूलकारणं अविद्यां जहि। तस्यां हतायां सर्वा वृत्तयो लीना भवेयुरिति। (१७१)

१७२.

संसृतिकारणम् अज्ञानं कथं नश्येदित्याह। श्रुतिः कदापि असत्यं न वदेदिति, महत्या श्रद्धया अहमर्थम् अन्तरालोड्य अखण्डचिदाकाशे आत्मचैतन्ये सर्वमिदमारोपितमिति, यदा निश्चयो जायते तदा अज्ञानं नश्येदिति।

अज्ञानं कारणाख्यं [406]कथमिह न भवेत् संसृतेश्चेदिति स्वं
यस्माद्वेदो न मिथ्या प्रवदति तदिहाम्नायगीतं रहस्यम्।
अन्तर्मत्वाऽहमर्थं मयि विमलपरव्योम्नि [407]विश्वं विभाती-
त्येवञ्चेद्धारणा सा स्थितिमुपलभते नैव तिष्ठेदविद्या।। १७२।।

अन्वयः - संसृतेः कारणं स्वम् अज्ञानम् इह कथं न भवेद् इति? यस्माद् वेदः मिथ्या न प्रवदति तत् इह रहस्यम् आम्नायगीतम् अहमर्थं अन्तर्मत्वा विमलपरव्योम्नि मयि विश्वं विभातीत्येवं धारणा स्थितिमुपलभते चेद् अविद्या नैव तिष्ठेत्।

व्याख्या - संसृतिकारणम् अज्ञानं कथं नाशयेयम् इति शिष्यः पृच्छति। "अहं ब्रह्मास्मि" इत्यादिभिर्महावाक्यैः यः अहमर्थः श्रुत्या लक्षितः तमर्थं महत्या श्रद्धया, वेदः कदापि मृषा न वदेदिति सुनिश्चितया धिया, अन्तः हृदये मत्वा, आलोड्य, इदं सर्वं जगद् विमले पराकाशे अखण्डबोधस्वरूपे मयि विभाति; केवलम् आरोपिततया भातीति, निस्संशया धारणा यदा सुप्रतिष्ठिता भवति तदा अज्ञानं (व्यष्ट्यज्ञानं) निखिलतया विलीनं भवेत्। तदर्थं किमप्यन्यन्न करणीयमस्तीति। (१७२)

406 ***Vera*** reads as कथमिव भविता संहृतञ्चेदिति.

407. ***Vera*** reads as सच्चित्स्वरूपे लब्धा चेद्धारणा.

१७३.

सांसारिकेषु व्यवहारेषु मग्नस्य चञ्चलमनस्कस्य मे कथं सोऽनुभवः स्यादिति पृष्ट्वा शिष्यः स्वयं समाहितो भवति, "मयि परमचितौ एतत्सर्वं स्वप्नाभं भाति; वस्तुतः अहमेक एवासम् अखण्डबोधस्वरूपः; अस्मि च" इति।

तथा पूर्णस्यापि व्यवहृतिषु मे चित्तचलनात्
कथं पूर्वोक्तं स्यादिति जगति यद्वस्तु सकलम्।
न मत्तोऽन्यत्तत्स्यान्मयि लसति मत्स्वप्नसदृशं
मृषेत्येवं दृष्टं परमचितिरेषाऽहमतुला ।। १७३।।[४०८]

अन्वयः - तथा पूर्णस्यापि मे व्यवहृतिषु चित्तचलनात् तथा पूर्णस्यापि व्यवहृतिषु मे चित्तचलनात् कथं पूर्वोक्तं स्यादिति? जगति यद्वस्तु (तत्) सकलं न मत्तोऽन्यत्। मयि स्वप्नसदृशं तल्लसति। एवं (मया) दृष्टं सर्वं मृषा। अहम् एषा अतुला परचितिः।

व्याख्या - "सच्चिदानन्दसारः सम्पूर्णोऽहम् इति पूर्वोक्तः अनुभवः कथं मे स्यात्? अहं तु सांसारिकेषु व्यवहारेषु लग्नचित्तः। तेनैव मदीयं चित्तम् इतस्ततः सञ्चलद्भवति।" एवं सन्दिहानः शिष्यः स्वयं निर्णयं गच्छति। अस्मिन् व्यावहारिकप्रपञ्चे दृश्यमानमिदं सर्वं वस्तुतः अहमेव। मत्तोऽन्यन्नास्ति। इदं सर्वं स्वप्नाभम्। स्वाप्नः सर्वोऽप्यनुभवः यथा जागरणसमये स्वस्मिन्नेव लीनो भवति तथा अतुला परचितिः अहमेव सत्यं वस्तु। तस्मिन् अखण्डबोधस्वरूपे मयि इदं सर्वं मृषाभूतं भातमिति सम्यगवगच्छामीति। (१७३)

१७४.

सर्वोऽयं जाग्रति जायमानः जगदनुभवः स्वप्नवन्मृषैवेति, अखण्डबोधस्वरूपोऽहमिति, निश्चयमेत्य नित्यानन्दस्वरूप आस्ते।

संवित्पूर्णाहमेषा मतिरिति हृदये चेद्विरूढा प्रकामं
यत्किञ्चित्संविधाने किमु भवति तथा चिन्तने यस्य कस्य।
उत्सन्नायां सुषुप्तौ स्मृतिगतसकलस्वप्नवज्जाग्रदेतत्
सर्वं मिथ्या सदाहं निजसुखविभवध्वस्तमोहप्रपञ्चः।। १७४।।

अन्वयः - अहमेषा पूर्णा संविदिति मतिः हृदये प्रकामं विरूढा चेत्

408. *Vera* does not have these two verses (this and the next one).

यत्किञ्चित्संविधाने किमु वा स्यात्? तथा यस्य कस्यापि चिन्तने किं स्यात्? सुषुप्तौ उत्सन्नायां स्मृतिगतसकलस्वप्नवत् एतज्जाग्रत् सर्वं मिथ्या । अहं सदा निजसुखविभवध्वस्तमोहप्रपञ्चः ।

व्याख्या - यदि हृदये अहं अखण्डबोधस्वरूपः इति निश्चयः सम्यग्गूढो भवति,तर्हि किमपि कर्तुं शक्यते ? करणेन किं भवेत्? न किमपि । तथा किमपि मन्तुं शक्यते। मननेन चिन्तनेन किम् ? यतः "शिवः केवलोऽहं" नान्यत्किञ्चिदिति बोधः विमलतया अन्तः स्फुरति। तेन इदं जाग्रदवस्थायाम् अनुभवविषयीभूतं जगत्समस्तं स्वप्नवन्मिथ्या एव इति सदा बोधः स्यात्। निद्रायां स्वप्नमनुभूय उत्थानसमये यदा निद्रा नष्टा भवति तदा स्वप्नानुभवः सर्वोऽपि स्मृतौ विलीनः। तथा इतःपर्यन्तमनुभूतः सर्वोऽपि सांसारिको व्यवहारः मृषैवेति सम्यङ्निश्चयः आयाति। अतुला अनन्ता अखण्डा परचितिः बोधः एवाहं इति सुखमयी अवस्था । (१७४)

१७५.

जनिमृतिचक्रे मम भ्रमणं तावत् भ्रम एवासीत्। अतुलपरमचितिरहं गुरुकृपया मुक्तोऽहं संसारभ्रमाद् इत्याह शिष्यः।

अहमिति वपुरेतन्मन्यमानस्य[४०९] नैका -
स्वपि जनिषु[४१०] निकृष्टोत्कृष्टता या ह्यवाप्ता।
परगुरुकृपयैषा भासते सा मरीचि-
ष्वधिगतसलिलाभा मां शिवं प्राप्य[४११] मुक्तः।। १७५।।

अन्वयः - वपुरेतद् अहम् इति मन्यमानस्य (मम) नैकासु जनिष्वपि या निकृष्टोत्कृष्टता अवाप्ता सा (इदानीं) परगुरुकृपया मरीचिष्वधिगतसलिलाभा भासते । (अहं) मां शिवं प्राप्य मुक्तः।

व्याख्या - परचिति आस्थितः आनन्दसान्द्रः शिष्यः आह - देह एवाहमिति मया चिन्तितमासीत्। तदानीं मम बहुषु जन्मसु निकृष्टता उत्कृष्टता च या अवाप्ता सा सर्वापि वस्तुतः मरुमरीचिकातुल्या। गुरुकृपया एतन्मया ज्ञातम्। अधुनाऽहम् अखण्डानन्दं स्वमवाप्य, स्वं प्रत्यभिज्ञाय मुक्तोस्मि इति। (१७५)

---

409. ***Vera*** reads as मन्यमानस्त्वनेकास्वपि जनिषु.

410. ***RSV 1*** reads wrongly as जहिषु.

411. ***Vera*** reads as व्याप्य.

१७६.

हर्षातिरेकान्नृत्यति मुक्तः -

किं वा भाग्यं न जाने किमु सुकृतमहं नैव जाने प्रक्लृप्तं
[412]कृष्णानन्दाद्यतीन्द्रादपि विपुलकृपां प्राप्य मुक्तो धरण्याम्।
धन्यो धन्योऽस्मि धन्यो बत बत नितरां धन्यधन्योऽस्मि भूयो
नृत्तं कुर्वे प्रहर्षादुपरि चिति मदादाधुनोम्युत्तरीयम्।। १७६।।

अन्वयः - किं वा भाग्यम् ? अहं न जाने। किमु प्रक्लृप्तं सुकृतम्? नैव जाने। कृष्णानन्दात् यतीन्द्रात् विपुलकृपां प्राप्य धरण्यां मुक्तः धन्यः अस्मि। धन्यधन्यः बत बत नितरां धन्यधन्यः प्रहर्षाद् नृत्तं कुर्वे । उपरिचिति उत्तरीयं मदाद् आधुनोमि।

व्याख्या - किमिदं पूर्वजन्मार्जितं सुकृतं वा भाग्यातिरेको वा इत्यहं न जाने । इदं तु जाने मम गुरुवरस्य संन्यासिश्रेष्ठस्य कृष्णानन्दाख्यस्य विपुलकृपयैव अहं धरण्यां जीवन्नेव मुक्तोऽस्मि। अहं नितरां धन्यः । धन्यौ मे पितरौ । धन्यं मे कुलम् । अहं धन्यधन्यः अस्मि । प्रहर्षातिरेकात् नृत्तं कुर्वे । आनन्दभराच्च आकाशे उत्तरीयम् आधुनोमि च। इति नृत्यति जीवन्मुक्तः । (१७६)

१७७.

हर्षोन्मादाच्च गुरुचरणकमलयोर्न्नमतितराम् ।

ब्रह्मात्मैक्योत्थितं यन्निरतिशयसुखं केन वा वर्णयेयं
चेतस्यापूर्य पूर्णं सदुदितमखिलेष्वेव लोकेषु भूयः।
आद्यन्तोन्मुक्तमित्थं गुरुरिह कृपया बोधयामास यो मे
वाक्यैर्वेदान्तजातैः पदकमलमहं सर्वदा तस्य सेवे।। १७७।।

अन्वयः - ब्रह्मात्मैक्योत्थितं यद् (इदं) निरतिशयसुखं (तद्) केन वा वर्णयेयम् ? चेतसि आपूर्य भूयः अखिलेषु एव लोकेषु पूर्णम् आद्यन्तोन्मुक्तं (सत् स्थितम्) उदितम्। यो मे गुरुः वेदान्तजातैः वाक्यैः इत्थं बोधयामास तस्य पदकमलं सर्वदा सेवे ।

व्याख्या - निरतिशयं सुखमेव ब्रह्मणः स्वरूपम् । अन्तःकरणावच्छिन्नं यच्चैतन्यं मम अहन्ताबोधस्य विषयः तद् निरतिशयसुखस्वरूपाद् ब्रह्मणः

412. ***Vera*** reads as ब्रह्मानन्दाद्यतीन्द्रात्.

अभिन्नमिति बोधः एव मुक्तिः। इयञ्च मुक्तिः अखण्डानन्दस्वरूपा। अयमानन्दः मनसि आपूर्य सर्वमिदं जगदभिव्याप्य आद्यन्तरहिततया देशकालावच्छेदरहितः एकघनतया अवतिष्ठति। यः अहैतुकदयासिन्धुः गुरुवरः उपनिषन्महावाक्यैः मां मत्स्वरूपं बोधयामास तस्य चरणकमलमहं सर्वदा सेवे इति गलदश्रुः शिष्यो गदति। किञ्च अनुभूयमानमिदं परमसुखं कस्मै केन वा अहं वर्णयामीति अवाच्यतामखण्डतामनन्यताञ्चावेदयति आनन्दघनस्य । (१७७)

१७८.

यदिदं परमं सुखं ब्रह्मात्मैक्यबोधात् प्रत्यभिज्ञायते तदेव ज्ञानानन्दः इति गुरुरुपदिशति। ग्रन्थस्य फलश्रुतिञ्चावेदयति।

इत्थं [४१३]विद्यासुखमिति मया वर्णितं भक्तियोगा-
देतच्छास्त्रं यदि परिचिनोत्यत्र यः कोपि मर्त्यः।
नित्यानन्दे प्रविततपदे प्राप्य निष्ठामयत्नात्
जीवन्मुक्तो भवति मुनिराट्[४१४] सत्यमेवं मयोक्तम्।। १७८।।

अन्वयः - मया (पूर्वं) विद्यासुखम् इति वर्णितं (यत् तद्) इत्थं (भवति)। यदि यः कोऽपि मर्त्यः एतच्छास्त्रं भक्तियोगात् परिचिनोति (सः) प्रविततपदे नित्यानन्दे निष्ठाम् अयत्नात् प्राप्य जीवन्मुक्तो मुनिराड् भवति । एवं मया उक्तं सत्यमेव ।

व्याख्या - अष्टधा आनन्दः इति मया पूर्वमुपवर्णितम्। अष्टमः ज्ञानानन्दः य उक्तस्तत्र सः अयमेव । जीवब्रह्मैक्यबोधात् साक्षात्क्रियमाणः अपरोक्ष आनन्दः। इदं वेदान्तशास्त्रं, कैवल्यनवनीताख्यमिदं ग्रन्थरत्नं च, यः भक्त्या पठति सः अयत्नेन अखण्डानन्दस्वरूपे परमपदे निष्ठां लभते । जीवन्मुक्तो मुनिश्रेष्ठो भवत्येव इत्यहं प्रतिजाने। (१७८)

१७९.

तद्विद्यासुखमेव तुरीयावस्थेति तत् स्तौति ।

वाक्ये छन्दोगगामिन्यपि[४१५] किल [४१६]तदसीत्येव संघुष्यते यत्
तच्चैतन्यं[४१७] तुरीयं त्वनुभवति जनः शास्त्रतो यो विदित्वा।

413. ***RSV 1*** and ***RSV 2*** wrongly read as विद्या सुखमिति.

414. ***Vera*** reads as यतिराट्.

415. ***Vera*** reads as छान्दोग्यगामिन्यपि.

416. ***Vera*** reads as सदसीत्येव यद्घुष्यते तत्.

417. ***Vera*** reads as त्वच्चैतन्यं.

मुक्त्वा सन्देहजातं निरतिशयसुखं निर्विकल्पं निरीहं
ब्रह्म प्राप्यानुभूतिं सति[४१८] भजतितरां पूज्यते सर्वलोकैः[४१९] ।। १७९ ।।

अन्वयः - छन्दोगगामिनि वाक्ये तदसीति यदेव संघुष्यते तत्तुरीयं चैतन्यं यो जनः शास्त्रतो विदित्वा अनुभवति (सः) सन्देहजातं मुक्त्वा निर्विकल्पं निरीहं निरतिशयसुखं ब्रह्मानुभूतिं प्राप्य सति भजतितराम्। सर्वलोकैः पूज्यते (च)।

व्याख्या - सामवेदान्तर्गते छान्दोग्योपनिषदि तत्त्वमसि इति महावाक्ये यत् समुद्घुष्यते तत् तुरीयं चैतन्यं यः शास्त्रसमुदितरीत्या ज्ञात्वा अनुभवति सः सर्वं विकल्पजालं दूरे अपास्य सन्देहमायां तरित्वा परमसुखमयं ब्रह्म प्राप्य तद् ज्ञात्वा तदेव भूत्वा, सति, केवले सति, चिदानन्दघने, अतिशयेन भजति लीनो भवति। तन्मयीभवतीति यावत्। सर्वैलोकैः पूज्यते च। (१७९)

१८०.

इदं शास्त्रतीर्थं गुरुतीर्थेन समस्तपुण्यनदीतीर्थेन च तुल्यं मोक्षप्रदं भवतीत्याह -

शीतं श्रीगुरुपादपद्मसलिलं मूर्ध्नाऽनिशं बिभ्रतां
यद्वद्भूगतसर्वपुण्यपयसामामज्जनोत्थं फलम्।
आस्ते तद्वदिहापि ये बुधजनाः कैवल्यशास्त्रन्त्विदं
पश्यन्ति प्रथितं प्रबोधनिलयाः सौभाग्यवन्तः शुभाः।। १८० ।।

अन्वयः - शीतं श्रीगुरुपादपद्मसलिलं मूर्ध्ना अनिशं बिभ्रतां यद्वत् भूगतसर्वपुण्यपयसाम् आमज्जनोत्थं फलम् आस्ते तद्वत् ये बुधजनाः इदं प्रथितं कैवल्यशास्त्रं पश्यन्ति ते प्रबोधनिलयाः शुभाः सौभाग्यवन्तश्च (भवेयुः)।

व्याख्या - ये गुरुचरणसेवां कुर्वन्ति, ये च तच्चरणसलिलं मूर्ध्नि सदा धारयन्ति तेषां, पृथिव्यां यानि यानि पुण्यानि अम्मयानि तीर्थानि सन्ति तेषु सर्वेषु आमज्जनेन यत्फलम् अवाप्यते जनैः तदेव फलं भवतीति सम्प्रदायविदः। एवम् अस्य कैवल्यशास्त्रस्य अध्ययनेन "ब्रह्मविद् ब्रह्मैव भवति" इत्युक्तिरीत्या अखण्डसच्चिदानन्दानुभवः निश्चयेन भवेदिति गीयते । (१८०)

---

418. ***Vera*** reads as स तु.

419. ***RSV 1*** and ***RSV 2*** read as सर्वलोकैः. ***GN*** and ***Vera*** read as सर्वदैकः.

१८१.

कविः गुरुं कृष्णानन्दयतीश्वरं प्रणमति।

यत्पादाम्बुरुहामृतानि पिबतां भूयोऽपि मातुस्तन-
क्षीरं दुर्लभमेव यस्य करुणाभ्रूक्षेपभूत्या नृणाम्।
आकाशप्रसवायते जगदिदं प्राक्सत्यवत् संस्थितं
कृष्णानन्दयतीश्वरो विजयते कृत्स्नप्रबोधाकरः [४२०] ।।१८१।।[४२१]

अन्वयः - यत्पादाम्बुरुहामृतानि पिबतां भूयः मातुः स्तनक्षीरं दुर्लभम् एव (भवेत्) नृणां यस्य करुणाभ्रूक्षेपभूत्या प्राक् सत्यवत् संस्थितं जगदिदम् आकाशप्रसवायते सः कृत्स्नप्रबोधाकरः कृष्णानन्दयतीश्वरः विजयते।

व्याख्या - कृष्णानन्दयतीश्वरः भवति कवेः गुरुवरः। सः सर्वशास्त्रविद् ज्ञानमूर्तिः विजयते इति तस्य सर्वोत्कृष्टत्वं आचार्यश्रेष्ठत्वञ्च प्रकाशयति कविः। गुरुवरस्य पादामृतसेवया पुनरिह संसारे जननं नियतं न भवेत्। मुक्तिः करतलगता च। यस्य करुणाकटाक्षेण सर्वमिदं जगत् आकाशकुसुमकल्पं भवेत्, मायाकल्पितमिदमिति सत्यबोधः, अखण्डानन्दबोधः, भवति सः गुरुवरो विजयते इति । (१८१)

१८२.

स्वीया कृतिः महात्मनां हृदयमधिरोहतु इति कविः प्रार्थयति।

मनोन्मनीध्यानविधूतपाप्मनो महायतीनां पदपद्मसेविनः।
महाफलं शङ्कुकवेरियं कृतिर्महात्मनां कर्णवतंसतामियात्।। १८२।।[४२२]

अन्वयः - महायतीनां पदपद्मसेविनः मनोन्मनीज्ञान विधूतपाप्मनः शङ्कुकवेः इयं कृतिः महात्मनां कर्णवतंसताम् इयात् ।

व्याख्या - संन्यासिश्रेष्ठानां गुरूणाम् अनुग्रहविशेषेण रचितेयं कृतिः।

---

420. ***Vera*** reads ब्रह्मप्रबोधाकरः.

421. ***Vera*** has this verse as the prefatory statement for the second *prakaraṇa* by the commentator. There are some slight variations in the reading. It is given as
यत्पादाम्बुरुहामृतानि पिबतां भूयोऽपि मातुस्तन-
क्षीरं दुर्लभमेव यस्य करुणा भ्रूक्षेपभूत्या नृणाम्।
आकाशं प्रसवायते जगदिदं प्राक्सत्यवत् संस्थितं
ब्रह्मानन्दयतीश्वरो विजयते ब्रह्मप्रबोधाकरः।।

422. ***Vera*** does not have this verse.

कर्ता च शङ्कुकविः गुरुस्मरणं विधत्ते। मनोन्मनीज्ञानेन गतकल्मषः निर्धूतपाप्मा, निर्धूताज्ञानमलः, इत्यतः भगवत्याः मनोन्मन्याः ज्ञानविशेषदात्र्याः अपि नमनं स्मरणरूपं करोति ग्रन्थस्य साफल्याय । कृतिरियं महात्मनां कर्णभूषणं भूयादिति प्रार्थयति। प्रतिपाद्यस्य ग्राह्यत्वात् प्रतिपादनस्य सौन्दर्यात् शब्दार्थसौहित्याच्च कर्णरसायनं हृदयप्रियं च भूयादिति च।

मनोन्मनी इति तन्त्रशास्त्रे योगशास्त्रे च प्रसिद्धा शक्तिः। मनांसि उन्मन्यते ज्ञानयुक्तानि कुरुते इति निरुक्तिः *सौभाग्यभास्करे* दृश्यते । योगशास्त्रप्रसिद्धो मुद्राविशेष इति केचित्। मनोन्मनत्वं नाम उत्कृष्टज्ञानवत्वम् इति अनेकत्र दृश्यते। *त्रिपुरोपनिषदि* एवं दृश्यते – "निरस्तविषयासङ्गं सन्निरुद्धं मनो हृदि। यदायात्युन्मनीभावं तदा तत्परमं पदम्" इति। *बृहन्नारदीये*ऽपि – "ध्यानध्यातृध्येयभावो यदा पश्यति निर्भरम्। तदोन्मनत्वं भवति ज्ञानामृतनिषेवणाद्" इति दृश्यते।

कैवल्यनवनीतस्य शङ्कुसूरिकृतस्य वै
सेयं कृष्णप्रिया व्याख्या रचिता कृष्णसूनुना।
राजलक्ष्मीनन्दनेन सुन्दरेश्वरशर्मणा
समाप्तिमागाद् भद्रं वः सततं प्रीयतां शिवा।।

।। कैवल्यनवनीतं सम्पूर्णम्।।

Appendix I

Index of Verses in the Text

Sl. No.	Verse	Introductory remark	Ref. No.	Page No.
1	अकाम्यं काम्यञ्च द्वयमिति परेशाङ्घ्रिभजनं	तपो द्विविधम्। एकं तावत्सिद्धिकरम्। अपरञ्च मुक्तिप्रदमिति समाधत्ते।	2.46	147
2	अक्षय्यं तत्पदं ये नियमितकरणा	नियमितकरणाः ज्ञानिनः एव पण्डितपद-वाच्याः। ते कर्मकूपे न पतन्ति। ते हि अक्षय्ये तस्मिन् पदे राराज्यन्ते इत्याह।	2.54	152
3	अज्ञानं कारणाख्यं कथमिह न भवेत्	संसृतिकारणम् अज्ञानं कथं नश्येदित्याह। श्रुतिः कदापि असत्यं न वदेदिति,महत्या श्रद्धया अहमर्थम् अन्तरालोड्य अखण्ड-चिदाकाशे आत्मचैतन्ये सर्वमिदमारोपितमिति, यदा निश्चयो जायते तदा अज्ञानं नश्येदिति।	2.172	225
4	अज्ञानसन्देहविपर्ययास्ते	के ते प्रतिबन्धकीभूता बन्धाः इत्याह।	1.82	107
5	अज्ञानस्य न कर्मणां हि रिपुता	कर्म अज्ञानसंवर्धकं भवतीति पूर्वमुक्तम्। एवम् अज्ञानकर्मणोरविरोधश्च प्रोक्तः। परं ज्ञान-अज्ञानयोर्विरोधः प्रसिद्धः। एवं स्थिते ज्ञानस्वरूपे ब्रह्मणि संलग्नम् अज्ञानं कथं जगदेतद्विरचयेदिति पृच्छति शिष्यः।	2.78	167
6	अज्ञानाकारसुप्तौ निशि मिहिर-मुखज्योतिषाम्	चित्त्वम् आनन्दरूपत्वञ्च प्रकाशयति।	2.115	190
7	अण्डाम्भः शुक्लमेकं भवति बहुविधाः	दृश्यमानं जगतो व्यवस्थितं नानात्वं चिच्छक्तिकल्पितमेव इत्याह।	2.101	182
8	अतन्निरासवाचकैः स्वरूपवाचकैर्मिथः	एवम् एकमेव ब्रह्म विधिनिषेधमुखेन अनेकैः पर्यायशब्दैः वेदेन लक्षणया वेद्यत इत्याह।	2.138	205
9	अत्यन्तं परिशुद्धशीतहृदयो बोधे निमग्नः स्वके	ज्ञातनिजस्वरूपानन्दोऽपि शिष्यः गुरुसेवातत्परः तत्पदं नात्यजदिति प्राह।	2.3	121
10	अत्र हि दृष्टान्तोऽयं तीर्त्वा	उक्तमर्थं लौकिकोदाहरणेन विशदयति त्रिभिः पद्यैः।	1.54	91
11	अदृश्याऽवाच्याख्या कृतिकलनमाता	माया कथं विलयं नेयेति शिष्यः पृच्छति।	2.102	182

12	अध्यारोपः कश्चेदन्यस्मिन्	अध्यारोपो नाम कः, अपवादश्च कः इति विशदयति।	1.20	72
13	अध्यारोपान्मृषोत्थाद् भवति खलु नृणाम्	प्रतिज्ञातं मोक्षोपायं वक्तुमुपक्रमते।	1.19	71
14	अनवरतमुदग्रा वासनाभिः प्रवृत्ताः	वृत्तीरहं कथां वा हास्यामीति प्रश्नं समाधत्ते।	2.170	224
15	अनुभवसुखतोये गाढमग्नः सुपूर्णः	दीर्घकालं ब्रह्मरसमग्नो बभूवेत्याह।	1.77	104
16	अन्नं पानादि सर्वं यदिह सुखततेः	आत्मैवानन्दः इति सयुक्तिकं प्रदर्शयति।	2.116	191
17	अन्यैः प्रमाणैस्त्रिभिरप्यवेद्यं	आद्यं संशयं दूरीकुर्वन्नाह गुरुः।	2.8	124
18	अपि क्षये वा जगतां सुषुप्तौ	आवरणशक्तिरेव संसारबीजमिति द्रढयति।	1.48	87
19	अमत्वैतज्जीवप्रकलितमिदम्	ये एतत्सर्वं पशुपतिकृतमिति मन्यन्ते ते बद्धा एव भवेयुः। ये च पशुकृतमिति विजानन्ति, ते मुक्ता भवन्ति; परमपदम् उपयान्तीत्याह।	2.60	156
20	अमृतमतुलनित्यानन्दसान्द्रस्वरूपम्	वेदान्तविद्यागुरुं कृष्णानन्दयतीन्द्रमीडते।	गुरुवन्द-नम् ४	55
21	अय इव भुवनेऽयो मार्गणं मार्गणो वा	एवञ्च मोक्षावगतिः मानसी प्रतीतिर्भवेत्। तथा सति मोक्षे प्राप्तेपि बन्धनिवृत्तौ जाताया-मपि अद्वैताभ्युपगमो न भवेत्, मनसः शिष्टत्वा-दिति शङ्कामुद्भाव्य परिहरति।	1.50	88
22	अयं देहो देह्यप्ययमिति यथार्थाद्	देहाद् भिन्नः देही अस्तीत्याह।	1.15	69
23	अयं भवांस्त्वम्पदलक्ष्यमेव	दशमस्त्वमसीति बोधनार्थं सामान्यतः तत्त्वमसिवाक्यार्थस्वरूपं निरूपितम्। इदानीं विशेषतस्तन्निरूप्यते।	1.69	99
24	अयमिह मार्गश्चैकस्त्वपरो	सृष्टिप्रक्रियायामपरोऽपि प्रकारः अस्तीत्याह	1.24	73
25	अवस्थाः सप्तैताः प्रकृतित इतः	अथ अज्ञानिनां जीवानां सप्त अवस्था भवन्तीति कथयति।	1.51	89
26	अविद्यासंसक्ताः सकलपशवः	एवम् ईश्वरस्य कारणोपाधिमभिधाय अधुना जीवस्य तमाह।	1.27	75
27	अव्यक्तं व्यक्तभावं व्यवहरणकृते याति	त्वं, नामरूपात्मकमिदं जगद् विस्मृत्य, सुखमास्व इत्युपदिशति।	2.104	184
28	अश्वत्थे कृतनीडकौ च विहगौ	बन्धस्य मोक्षस्य च कारणं जीव एव। आत्मनि आरोपितं कर्तृत्वं भोक्तृत्वं च बन्ध-कारणमित्यत्र श्रुतिं प्रमाणयति।	2.59	155

29	अस्यां ये भुवि योगभूमिषु नराः	आसु भूमिषु प्रथमां द्वितीयाञ्च प्राप्ता जनाः म्लेच्छाश्चेदपि मुक्ता भवेयुरित्याह।	2.157	216
30	अहन्तासाक्ष्येकी विभुरपि परात्मा	औपाधिकं बहुत्वं जीवानामित्याह ।	2.39	143
31	अहमिति वपुरेतन्मन्यमानस्य	जनिमृतिचक्रे मम भ्रमणं तावत् भ्रम एवासीत्। अतुलपरमचितिरहं गुरुकृपया मुक्तोऽहं संसारभ्रमाद् इत्याह शिष्यः ।	2.175	227
32	आघ्राणभक्षं पिशितासवानाम्	पश्चात्सर्वं त्याज्यमेवेति श्रुतिर्निर्णयमाहेति दर्शयति।	2.77	166
33	आचार्यश्रेष्ठ या त्रय्यभिवदति	ज्ञानादेव बन्धमोक्षः इति निर्णयश्चेत् कर्मणा जीवाः सुखं विन्दन्ति इति श्रुत्या (कर्मकाण्डे) किमर्थमुच्यते इति पृच्छति शिष्यः।	2.73	163
34	आदर्शान्तरिव त्वदीयवदनं छायैव	अथ चिदाभासमपि प्रदर्श्य मनोदर्शनस्य द्वैविध्यं वक्तुमाह।	2.12	126
35	आदर्शे निष्कलङ्के भवति यदि परो दर्पणो निष्कलङ्क	तदानीं मनः निश्चलं निर्विकल्पञ्च भवेदिति दर्शयति।	2.19	130
36	आद्यन्तहीनाम्बरवत्सुपूर्णम्	ग्रन्थप्रतिपाद्यं विषये अधिकारिणञ्च दर्शयति।	प्रस्तावना ५	58
37	आद्या सा हि शुभेच्छा	सप्त ज्ञानभूमीः नाम्ना निर्दिशति द्वाभ्याम्।	2.149	212
38	आधारश्चेन्निगूढो भवति वरगुरो	आरोपमधिकृत्य आशङ्कामाक्षिप्य निरस्यन् विशदयति।	1.44	84
39	आरब्धानां कर्मणां नैकभावात्	बाह्यमाचारव्यवहारादिकं ब्रह्मविदां लिङ्गं न भवतीति दर्शयति।	1.90	112
40	आरूढाश्च महागुरो भुवि परे निष्किञ्चना नित्यदा	योगारूढा अपि कदाचित् प्रारब्धवेगात् निष्ठावन्तो दृश्यन्ते इति कथयति।	2.35	141
41	आवृत्य ब्रह्मभावं प्रभवति विदधद्	बन्धानां स्वरूपमाह।	1.84	107
42	आश्चर्यमेतदवनौ परमं हि साम्यं	तदेव स्फुटयति।	1.45	85
43	आसार्वभौमसुखमा च हिरण्य-गर्भम्	श्रुतिभिः मनुष्यगन्धर्वानन्दः, देवगन्धर्वानन्दः इत्यादि ब्रह्मण आनन्दः इत्यन्तं ये शतगुणोत्तरम् आनन्दाः वर्णिताः ते सर्वे अस्य ब्रह्मानन्दस्य बिन्दुमात्रमित्याह।	2.132	201
44	इतीवैतद्ब्रह्मप्रकटनपरैर्वेदवचनैः	उक्तमेवार्थं पुनर्द्रढयति।	2.68	160
45	इत्थं पृष्टवते जगाद स गुरुः	मनोनाशो द्विविधो भवति - सरूपनाशः, अरूपनाशश्चेति; तत्र जीवन्मुक्तानां सरूपनाशः, विदेहमुक्तानाञ्च अरूपनाशश्चेति दर्शयति।	2.21	131

46	इत्थं वाचं दधाने पुनरपि स गुरौ प्राह शिष्योऽमलात्मन्	अजस्रं चलत्यन्तरङ्गमिति पूर्वमुक्तम्। कथं तन्निश्चलं कर्तुं शक्यते इति शिष्यः पुनः पृच्छति।	2.16	128
47	इत्थं विद्यासुखमिति मया वर्णितम्	यदिदं परमं सुखं ब्रह्मात्मैक्यबोधात् प्रत्यभिज्ञायते तदेव ज्ञानानन्दः इति गुरुरुपदिशति। ग्रन्थस्य फलश्रुतिञ्चावेदयति।	2.178	229
48	इत्थं विहाय प्रथमञ्च संशयं शृणु	एवं प्रथमं संशयं छित्वा द्वितीयं छेत्तुं प्रक्रमते।	2.11	126
49	इत्थं शिष्ये वदति स गुरुस्तुष्टचित्तः	अहैतुकदयासिन्धुर्गुरुः, सदा सच्चिद्रूपो भव; तदेवालं मह्यमिति कथयति।	1.80	106
50	इत्थं शिष्ये ब्रुवाणे पुनरपि कथयामास	एते त्रयो गुणाः सर्वेषु जीवेषु समाना अपि वृत्तिभेदैः भिन्ना इव दृश्यन्ते, गृह्यन्ते च इति दर्शयति।	2.109	187
51	इत्येवं भाषमाणं निजगुरुमथ तं संप्रणम्याह शिष्यः	भवत्कृपया निस्संशयोऽहं कृतकृत्यः इति विनयं प्रकटीकरोति शिष्यः।	2.5	122
52	ईशज्ञानगुरुस्वरूप भगवन्नीशेन	मुक्तः ईश्वरतुल्यः इत्युक्तम्। तत्कथमिति विशदयति।	2.37	142
53	ईशस्येयं सुषुप्तिर्भवति पुनरियं कारणं	माया, अविद्या आनन्दमयकोशः इत्यादीन् निरूपयति।	1.26	74
54	ईशे त्यक्तगुणे गुणस्य कथनं वन्ध्यासुतालङ्कृतिं	निर्गुणस्य ब्रह्मणः गुणगणकथनं वन्ध्यासुतस्य अलङ्कारवर्णनमिव निरर्थकं भवति किलेति प्रश्नमुत्थाप्य खण्डयति।	2.139	205
55	उक्तं श्रीगुरुनाथ सम्यगधुना	अधिगतपरमार्थानामपि श्रवणमननादिकम् आवश्यकं किमिति पृच्छति शिष्यः।	2.29	137
56	उक्तानि पञ्च हि सुखान्यपि बोधसौख्यम्	ज्ञानानन्दं पश्चाद्वक्ष्यामीत्याह।	2.134	202
57	उत्कृष्टस्य परस्य सृष्टिरनघा	ईश्वरस्य सृष्टिरन्या; जीवस्य चान्या इति तयोर्भेदमाह।	2.56	153
58	उत्पत्तिर्मम चेन्मृतिश्च वितता	तत्त्वमसिवाक्यार्थानुभवमाह।	2.165	221
59	उपाधावेकस्मिन्नपि घटशरावादिषु	तदेव विशदयति।	2.40	144
60	उपाधिमेकं वदसीशजीवयोः	एवं स्थूलशरीरे अवस्थादिके च समाने ईशजीवयोः मिथो भेदकं किमित्याह।	1.36	80
61	ऊहैः क्लृप्ते विचारे परिगणितम्	सप्त अज्ञानभूमीः ज्ञानभूमीश्च क्रमेण वक्तुं प्रक्रमते।	2.146	210

62	एकान्तसंनिहितमीदृशमात्मतत्त्वम्	ग्रन्थप्रतिपाद्यं सूचयति। आत्मतत्त्वं मार्ताण्ड-वद्भ्राजमानं सर्वस्यापि हृदये वरीवर्ति। किन्तु अज्ञानवशात् न कश्चित् तं सूर्यं द्रष्टुम् उत्सहते उलूकवदित्याह।	गुरुवन्द-नम् २	54
63	एकामुक्तिं शृणु त्वं प्रथम इह पुमान्	शास्त्रोक्तेन ज्ञानेनैव मोक्ष इत्याह।	2.63	157
64	एतत्सूक्ष्मशरीरजातमुदितम्	स्थूलदेहोत्पत्तिं वर्णयति।	1.33	78
65	एते जीवा असङ्ख्या अपि चरितममीषाम्	शास्त्रं तावदुभयमपि – प्रवृत्तिं निवृत्तिञ्च - उपदिशति। यथाधिकारं स्वीकरणीयम् इत्युपदिशति गुरुः।	2.51	150
66	एवं निश्चयशालिनां सुमनसाम्	परमसुखावस्थायां मुक्तौ बन्धमोक्षकथैव नास्तीत्याह ।	2.89	174
67	एवं शिष्येण पृष्टो गुरुरपि कथयामास	एवं शिष्येण पृष्टो गुरुः समादधाति। त्रिविधाः मुमुक्षवो जनाः कर्माचरन्ति। परं, मुक्तः कर्म नाचरतीति।	2.28	136
68	एवञ्चेच्छृणु वत्स वच्म्यविदित-स्वात्मस्वरुपा जनाः	अधिगतपरमार्थस्य श्रवणादिकं नापेक्षित-मित्युत्तरयति गुरुः।	2.30	138
69	एष स्वप्नो हि भुक्त्वा स्वपनपद-जुषः	ता एव अज्ञानभूमीः निरूपयति (द्वाभ्याम्)।	2.148	211
70	एषोऽधिकारी सुतदारवित्तवाञ्छाः	अपरोक्षतत्त्वशास्त्रे कोऽधिकारी इति पद्यद्वयेन दर्शयति।	1.6	63
71	ऐक्यं लब्ध्वाऽपि भूम्ना सह पशुरयते	ब्रह्मानन्दे मग्नः जीवः पुनः किमर्थं निवर्तते इति प्रश्नं समादधद् वासनानन्दस्वरुपमाह।	2.129	199
72	ऐश्वर्यं पद्मजाताम्बुजनयन-ललाटेक्षणानाम्	मुक्तः ईश्वरतुल्य इत्युक्तम्। जीवेश्वरयोरैक्यं कथं भवेत्। ब्रह्मेशानादीनां जगत्सर्गस्थित्या-दिके शक्तिः, सर्वज्ञता, इत्यादिसामर्थ्य-मस्ति। मुक्ते एतत्सर्वं नास्ति किल इति सन्दिहानः शिष्यः पृच्छति।	2.41	144
73	कमठझषवयांसीवादरात्	दीक्षाविधिमाह ।	1.8	64
74	कर्मारब्धं कथमनुभवन् देहवान् सन् विमुक्तः	विषयेषु व्यवहरन् जीवन्मुक्तः कथं कर्म न करोतीति वक्तुं शक्यते इति पुनः पृच्छति शिष्यः।	2.27	136
75	कल्पनागमविभ्रमस्तव दर्शितः खलु युक्तितः	एवम् आरोपमुपवर्ण्य अपवादं वक्तुं प्रक्रमते।	1.38	81

76	कल्पान्ते परमेश्वरस्य कलने नष्टेऽपि	इश्वरो वा तत्सृष्टिर्वा बन्धस्य कारणं न भवतीति द्रढयति।	2.58	154
77	कश्चित्कोटिशतेषु देहिषु नरः	अपरोक्षतत्त्वशास्त्रे कोऽधिकारी इति पद्यद्वयेन दर्शयति।	1.5	63
78	कस्याप्युक्तिवशान्नवापि पुरुषान्	उक्तमर्थं लौकिकोदाहरणेन विशदयति त्रिभिः पद्यैः।	1.56	91
79	कामादयो हृदि यदा क्षणतो व्रजेयुः	तत्स्वरुपमेव कथयति।	1.89	111
80	किं कार्यं किमु कारणं जगदिदं कस्माद् बभूवेति या	मायां जेतुं तद्विस्मरणं ब्रह्मविचारश्चैव शरणमित्याह ।	2.106	185
81	किं वा भाग्यं न जाने किमु सुकृतमहम्	हर्षातिरेकान्नृत्यति मुक्तः।	2.176	228
82	किं वा शास्त्रं वदति कुहनां नाथ	तदेव पृच्छति।	2.50	149
83	कीदृग्भूता भिदेति प्रवदसि यदि ताम्	जीवेश्वरयोः व्यावहारिकीं महतीं भिदां दर्शयति।	1.70	100
84	कुड्यादौ जडरुपके प्रविलसत्सन्मात्रमेव स्फुटम्	तदेव स्पष्टयति।	2.111	188
85	कुम्भे नष्टे सति गगनवद्देहनाशे प्रपन्ने	तमेव देहनाशं निरुपयति।	1.99	117
86	कृत्यं साधु तथेतरच्च पशवः पत्यैव यत्कुर्वते	जीवानां कर्मजाले भ्रमणम् इश्वरेण कार्यते। ते अनीशाः किं कुर्युः? ईश्वर एव अपराध्यति इत्याशङ्कां प्रकटयति शिष्यः। गुरुराह - ईश्वरो नापराध्यति। जीवा एव स्वान् कर्मलोकान् सृजन्तीति।	2.55	153
87	कृत्वा पञ्चैव भूतान्यपि च दश	पञ्चीकरणप्रकारमाह।	1.34	79
88	कैवल्यं ज्ञानयोगाद्यदि भवति गुरा	सिद्धयः केवलं प्रारब्धजा एवेति स्फुटयति।	2.48	148
89	कैवल्यपूर्वनवनीतसमाह्वयं तच्छास्त्रं	ग्रन्थस्य नामधेयं रुपधेयञ्च अभिदधाति।	प्रस्तावना ७	60
90	कोशाः पञ्च हि केवलं परमकं स्थानं	'वस्तुतः संसारभ्रमस्य, अज्ञानकल्पितअनर्थपरम्परायाश्च बीजं विक्षेपशक्तिः किल? सा किल समस्तमिदमसद् जगद्विक्षिपति। किन्तु भवता सकलजीवानां संसारव्याधेः मूलकारणम् आवरणशक्तिरुक्ता। तत् कथम्?' इति शिष्यस्य शङ्कामुद्भाव्य समाधातुं प्रक्रमते।	1.46	86

91	कोशेषु पञ्चसु धुतेष्वहमद्य पश्चात्	शिष्यः यदा पञ्च कोशानतिक्रम्य स्वस्वरूपं द्रष्टुं यतते तदा स शून्यमेव पश्यति। किमहं कालाञ्जनतुल्यं नभः इति पृच्छति च गुरुम्।	1.63	96
92	गङ्गायामिति घोषो जहती	सोदाहरणं निरूपयति।	1.72	101
93	गतोपमाने सति निष्प्रपञ्चे	निर्गुणं निर्धर्मकं निरवधिकम् इत्यादिना शास्त्रैरुच्यमाने ब्रह्मणि कथं जगद्भ्रान्ति-र्भवितुमर्हतीत्याह।	1.21	72
94	गर्भागारगतं न वस्तु विषयीकुर्याद्	तदेव द्रढयति दृष्टान्तान्तरेण।	2.72	163
95	गुणाद्धि रजसोऽनिलाः खलु भवन्ति	लिङ्गशरीरोत्पत्तिमेव कथयति।	1.31	77
96	गृहाधारस्तम्भेऽप्यवटनिहिते परे तस्य परितः	तत्त्वे ज्ञाते सत्यपि तस्य दृढता, स्थूणानिखननवत् सन्देहप्रशमनेनैव भवतीति सन्देहप्रशमनाख्यं प्रकरणान्तरं प्रवक्ष्ये इति प्रतिजानीते ग्रन्थकारः।	2.2	120
97	ग्रामायान्धूदकमलमलं चन्द्रिका-वर्तिका सा	सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिभेदे सत्यपि बोधस्वरूपत्वेन ऐक्यमेव ईश्वरज्ञानिनोरित्याह।	2.42	145
98	घटाम्भसि घनाम्भसि स्फुरति यद्	जीवेश्वरयोरैक्यबोधनाय पूर्वोक्तम् आकाश दृष्टान्तं स्मारयन्नाह घटाम्भसीति।	1.75	103
99	चत्वारो ज्ञानभाजो जगति हि गणिताः	अधिगतपरमार्थाः ज्ञानभाजः चतुर्विधा भवन्तीत्याह।	1.87	110
100	चेन्मद्यामिषपानभक्षणविधौ वाञ्छा	एवञ्चेत् 'धर्मानातिष्ठ', 'यज्ञान् कुरु' इत्यादीनां श्रुत्यादेशानां को वार्थ इति चेदुच्यते ।	2.76	165
101	चैतन्यात्पूर्णबोधात् प्रथममुदय-वद्यच्च	ता एव अज्ञानभूमीः निरूपयति (द्वाभ्याम्)।	2.147	211
102	छायावदेनं तमनुव्रजन्तम्	कारुण्याब्धिर्गुरुः शिष्यं पुनः पृच्छति - किं त्वं छिन्नसंशयः साक्षिमात्रः निजस्वरूपे तिष्ठसीति।	2.4	122
103	छायैका परसंविदो व्यवहृतौ चित्तैकतामेयुषी	विश्वतैजसौ उभावपि एकस्याः परचितेः छाया। वस्तुतः अनयोर्भेदो नास्तीत्याह।	2.128	199
104	जगत्कर्ता कार्यं विदितमपि शक्तिः	ब्राह्मी मायाशक्तिः न केनापि ज्ञायते इत्याह।	2.98	180
105	जडाकारध्यानं कथमिति दिशेद्	यद्येवं,मृषाभूतवस्तुध्यानात् कथम् अखण्डसच्चिदानन्दस्वरूपावाप्तिः (श्रवणमनननिदिध्यासनैः ब्रह्म अधिगन्तव्य-मिति श्रुतिः) इति शङ्कां निराकुरुते।	2.86	172

106.	जाग्रत्कालशुचापनोदविधये सम्यक् शयित्वैकदा	विषयानन्दस्य स्वरूपमाह।	2.124	196
107.	जाग्रत्काले सकलविषयानक्षजातैर्हि जाने	दृग्दृश्यविवेके किञ्चिदिव उद्बोधितः शिष्यः प्रतिवचनमिषेण तत्त्वबुभुत्सां वेदयति।	1.17	70
108.	जाग्रत्स्वप्नसुषुप्तयो बहुतराः	त्वमेव स्वयं स्वं परिवेत्सि इति किल उक्तम्। तत् समर्थयति सर्वसाक्षी आत्मा इति दर्शयन्। पूर्वोक्तमेव तत्तत्त्वं द्रढयति।	1.65	97
109.	जातं भोगात्सुखं यद्विषयसुख-मिदम्	अष्ट आनन्दभेदान् निरूपयति।	2.123	195
110.	जानीहि व्यवहार एष सुधिया-मारम्भमात्रक्षयी	मुक्तस्य व्यवहारो न दोषाय। किञ्च ये निष्ठावन्तः ते आरुरुक्षवः योगिनः। ये आरूढयोगिनः तुर्ये ब्रह्मणि लीनाः तेषां कर्तृत्वं नास्त्येव इति समाधत्ते।	2.34	141
111.	ज्ञानं केवलमेव मोक्षविधये	तदेव विशदयति। किञ्च सिद्धयः मोक्षाय नोपयुज्यन्ते इत्यभिदधाति च।	2.47	148
112.	ज्ञानं दृष्ट्वाऽनुभूतं श्रुति-विषयकृता	एतद् विज्ञानाख्यं स्वरूपज्ञानं योगादपि भिन्नं निर्विषयम् अज्ञाननाशकञ्चेति द्रढयति।	2.84	171
113.	ज्ञानस्यापि ज्ञापकं ज्ञानमस्तीति	आत्मा स्वयं ज्ञानस्वरूपः तद्बोधनार्थम् अन्यत् ज्ञापकं नावश्यकमिति स्पष्टयति।	1.67	98
114.	तत्त्वम्पदं ब्रह्मपदञ्च साक्षिणम्	तत्त्वमसीतिवाक्यसमन्वयं दर्शयति।	1.74	102
115.	तत्त्वानुभूतिप्रयतिः श्रुतिर्भवेत्	श्रवणादीन् निरूपयति।	1.85	108
116.	तत्त्वार्थस्य विचारणाज्जगदिदम्	क्रमेण तासामवस्थानां स्वरूपमाह, द्वाभ्याम्।	1.53	90
117.	तत्त्वासक्तहृदो ह्यभानमसतः	एतासां ज्ञानभूमीनां स्वरूपं निरूपयति द्वाभ्याम्।	2.152	213
118.	तथा पूर्णस्यापि व्यवहृतिषु मे चित्तचलनात्	सांसारिकेषु व्यवहारेषु मग्नस्य चञ्चलमनस्कस्य मे कथं सोऽनुभवः स्यादिति पृष्ट्वा शिष्यः स्वयं समाहितो भवति, "मयि परमचितौ एतत्सर्वं स्वप्नाभं भाति; वस्तुतः अहमेक एवा-सम् अखण्डबोधस्वरूपः; अस्मि च"इति।	2.173	226
119.	तथा पूर्णो भूत्वा कथमनुभवेयम्	अहम् अखण्डः सन् कथं वा तं भूमानमानन्द-मनुभवितुं शक्नोमीति शिष्यस्य प्रश्नं समाधत्ते।	2.169	223
120.	तप्तस्ताम्ररसोऽग्निना परिणमत्य-श्वादिरूपं यथा	मनसः विषयग्रहणप्रकारं दर्शयति।	2.13	127

121	तप्यत्कोपवशादहं हि मरणं गच्छेयमित्यातुराः	आत्मनः अहेयताम् अवध्यताञ्च दर्शयति।	2.118	192
122	तमोरजःसत्वगुणैर्विभिन्नाः	एकमेव सच्चिदानन्दं ब्रह्म इच्छाज्ञानक्रिया-वशात् जीवेषु भिन्नवृत्तिकं दृश्यते। हृद्वृत्त-यश्च सत्वादिभिर्गुणैः त्रिविधाः इत्याह।	2.110	187
123	तर्ह्याचार्येन्द्र दृश्यं सकलमपि मृषेत्येव	स्वप्नवत् सांसारिकं व्यवहारं पश्यतां मुक्तानां जनानां नानानुभवजातं दुःखं कथं न स्यात्? किञ्च ध्यानादिनिष्ठासु ये श्रद्धावन्तः तेऽपि कर्म कुर्वन्तीति कथम् अकर्तृत्वं तज्जन्यसुखञ्चेति पुनः पृच्छति शिष्यः।	2.33	140
124	तिस्रस्ता हि विरक्तयः श्रुतिमता	संन्यासस्य लिङ्गभूता विरक्तिश्च त्रिविधेत्याह।	2.160	218
125	तुर्यस्थानस्य तुर्योत्तरपदकथने योग्यताम्	नामान्तराणि कथयति।	2.154	214
126	तुर्यातीते वसेद्यो यदि परमपदे	वक्ष्यमाणस्वरूपायां सप्तम्यां ज्ञानभूम्यां स्थितस्य तुरीयगस्य निरुपमम् आनन्दं स्तौति।	2.133	202
127	तूलं दावहविर्भुजीव सकलम्	प्रतिज्ञातं विदेहमुक्तेः स्वरूपकथनम् आरभते।	1.96	115
128	त्यक्त्वा साधनसञ्चयं नहि भवेत्	साधनचतुष्टयम् अनुपेक्षणीयम् अधिकारसम्पादकञ्चेत्याह	1.4	62
129	त्रयाणामाद्यौ द्वावथ दृढसमा-धिञ्च कुरुतः	ब्रह्मविद्वरादीनां स्वरूपमाह।	1.92	113
130	त्वद्वाक्यश्रवणाक्षमोऽपि भगवन्	शिष्यस्य सर्वात्मना गुरुप्रपत्तिं वर्णयति द्वाभ्याम्।	1.10	65
131	त्वमहमिति विहीनं व्योमवत्सर्व-पूर्णम्	एतच्छ्रुत्वा तत्त्वमस्यादिवाक्यार्थस्वानुभवा-दपिच्युतिः भवेत् किम् इति पृच्छति शिष्यः।	1.81	106
132	ददर्श दशमो यथा निजतनुम्	दशमस्त्वमसि इति साक्षात्कारवत् शिष्यस्य तत्त्वमसिवाक्यार्थबोधनाय उपक्रमते।	1.57	92
133	दीपश्चक्षुरिति द्वयञ्च तिमिरे वस्त्वर्थ्यते वीक्षितुम्	घटपटादिज्ञाने नयनं दीप इति द्वयमा-वश्यकम्। किन्तु परमपदं वीक्षितुं ज्ञातुं चिदाभासो नावश्यक इत्याह।	2.14	127
134	दुष्टं सङ्गमुपेक्ष्य या परशिवज्ञाने	एतासां ज्ञानभूमीनां स्वरूपं निरूपयति द्वाभ्याम्।	2.151	212

135	देहादन्यो नास्ति देहीति चेत्त्वम्	शिष्यस्य देहात्मभ्रान्तिं नाशयितुं दयासिन्धुर्गुरुराह।	1.16	69
136	देहाहन्ता हि जन्तोर्जनयति	निजानन्दं निरूपयति।	2.130	200
137	देहाहन्तोज्झितस्य व्यपगतमल-वद्भावनस्य	त्यक्तदेहाभिमानस्य कर्तृत्वभावान्मुक्तस्य कथं वा भोगः? भोगं विना कथं वा प्रारब्ध-नाशः,तद्द्वारा विदेहमुक्तिश्च कथं भवेदिति शिष्यः पुनः पृच्छति।	2.24	134
138	द्वेधा न्यासो वर्णितश्चातितीव्रे	अतितीव्रविरक्तौ संन्यासद्वितयं भवतीत्याह।	2.162	219
139	द्वेधेति ज्ञानमेकं परमपि कथितम्	ज्ञानं द्विविधमस्ति। स्वरूपज्ञानं वृत्तिज्ञानं चेति। तत्र स्वरूपज्ञानस्य अज्ञानेन विरोधो नास्तीत्याह।	2.79	167
140	द्वैविध्यं परहंसकेऽपि विदितम्	परमहंससंन्यासोऽपि द्विविधः, जिज्ञासुज्ञानिभेदादित्याह।	2.163	220
141	धीरा ब्रह्मविदः प्रशान्तमनसः	ब्रह्मविदो लक्षणमाह।	1.88	110
142	ध्यानं सायुज्यमुक्तिप्रदमपि च मृषा चेद्	योगेनाधिगतं ब्रह्मज्ञानमपि मृषा। विचारेण साक्षादनुभूयमानं विज्ञानमेव सत्यमित्याह।	2.85	172
143	नत्वा तिष्ठन् स गुरुसविधे	गुरूपसत्तिं वर्णयति।	1.7	64
144	नश्यद्देहगतं शरीरिणमिमं वेदान्त-वाक्यानि वा	सच्चिदानन्दं ब्रह्मैवाहम् इति ब्रह्मानुभवः कथं जायते? श्रुत्यन्तमहावाक्यैः सच्चिदानन्दं ब्रह्मेति उद्घुष्यमाणस्य अनुभवः कथं साधनीयः इति शिष्यः पृच्छति।	2.113	189
145	नानाविधानामपि मुक्तिभाजाम्	यद्यपि चतुर्णां ब्रह्मविदादीनां मुक्तौ साम्यं, ब्रह्मविद्भिन्नानां शिष्टानां त्रयाणां समाधियोगो विशेषः। तस्य फलं च प्रारब्धकर्मफलध्वंसः दृष्टदुःखाभावश्चेति स्पष्टयति।	1.93	114
146	नानाशास्त्रविदो गुरोस्तु वचनम्	गुरूपदेशेन सम्यक् सुखमनुभूय समाधेर्निर्गतः शिष्यः आत्मानं जगच्चित्रस्य पट इति ददर्शेत्याह।	2.144	209
147	नित्यं मृद्भक्षणेच्छोर्जगति निजशिशोः	प्रथमालीढमधवः बालाः कटु अपि भेषजं पिबन्ति किल। एतन्न्यायमाश्रित्य श्रुतिरपि कामिनाम् इष्टं स्वर्गादिकं यत् सुखं तत्साधन-भूतं कर्मजातं प्रदश्र्य पथ्यं ज्ञानमार्गमुप-दिशतीत्याह।	2.74	164
148	नित्यानित्यविवेचनं प्रथमतः	अपरोक्षतत्त्वज्ञाने साधनं किमित्याह।	1.1	61

149	नेतुर्ब्रह्मादिमूर्तेः सकलतनुभृतां सृष्टयः	जीवसृष्टेर्विमुक्तिरेव मुक्तिरित्यभिदधाति। ईश्वरसृष्टिर्मोक्षकारणम्। बन्धकारणं तु जीवसृष्टिरेव इति दर्शयति च।	2.57	154
150	नो कर्तुं कर्तुमन्यद्भिरचयितुमिदं कर्म	ध्यानमपि पुरुषतन्त्रम्। किन्तु विज्ञानं वस्तुतन्त्रं भवति। किञ्च तत् स्वतन्त्रं भवतीति विज्ञानस्य महिमेत्याह।	2.83	170
151	नो कालत्रितये स्थितं जगदिदम्	सच्चिदानन्दस्वरुपे स्वात्मनि स्थीयते चेत् मिथ्याजडशोकस्वरूपमिदं जडद् विलयं यायादित्याह।	2.105	184
152	न्यासं वदन्त्युपरतिं सहनं शुचां यत्	द्वाभ्यां शमादीनाह।	1.3	61
153	पत्युः पशूनां कृपयैव सर्वभोगार्थम्	सृष्टिक्रमवर्णनम् अनुवर्तते।	1.28	76
154	पश्यन्तं निखिलं पदार्थनिचयं माम्	आत्मा हि स्वानुभूत्येकसिद्धः। तद्दर्शनाय दृगन्तरं नावश्यकमिति द्रढयति।	1.66	98
155	पापिष्ठानामवश्यं यदि नरकगतिर्भाविनी	कर्मकाण्डेन उपासनाकाण्डेन च उच्यमानं पूर्वपक्षत्वेन तुच्छमेव। असक्तस्य त्यक्तदेहाभिमानस्य कर्म, कर्तृत्वं वा नास्ति; सञ्चितकर्मापि क्षणेन विलयं यायादिति, बोधमार्ग एव श्रेयानिति च यत् सिद्धान्तत्वेन उक्तं तदेव श्रद्धेयमिति कथयति।	2.52	151
155	पिष्टस्येव कृतस्य शर्करिकया	ज्ञानत्वेन ज्ञेयत्वेन वा यद्यद् भासते तत्सर्वं (अथवा सर्वमिदं) बोधस्वरूपमेवेति दर्शयति।	1.68	99
157	पूर्णस्य ब्रह्मणो वा बहिरपि जगताम्	वस्तुतो भिन्नयोर्भेदमपि आवृणोति आवरणशक्तिः। तदेव संसारव्याधेर्मूलकारणमिति दर्शयति।	1.43	84
158	पूर्वासां त्रितये भुवां जगदुदेत्येतद्धि	ज्ञानभूमीनां मिथो भेदानाह।	2.153	213
159	पृष्टा नृभिर्दयितमबला नेति चान्यान्निरस्यं	श्रुतिः येन प्रकारेण, महावाक्यैः अद्वैतं वागतीतं ब्रह्म साक्षादनुक्त्वा वेदयति तत्प्रकारमाह।	2.10	125
160	प्रत्याहृताक्षनिचयं परमप्रशान्तम्	गुरुः उपदेशाय प्रक्रमते।	1.11	66
161	प्रयातभवसञ्चितैरपि च पुण्यपुञ्जैर्भवेत्	जन्मान्तरसुकृतैरेव ज्ञानं भवेत् किल? किं विचारेण इति प्रश्नं समाधत्ते।	2.65	159
162	प्राक्शैलूषस्य विद्या हि विदितविहृतेः	ऐन्द्रजालिकस्य शक्तिरिव माया प्रत्यक्षतः ज्ञातुं न शक्या। केवलमनुमेया इति दिशति।	2.97	179

163	बद्धोऽनलो नैव दहेत्तृणाद्यम्	बन्धानां शक्ति दर्शयति।	1.83	107
164	बन्धाधायकगेहसक्तिरहिताः	किं म्लेच्छा अपि मुक्तिं लभन्ते श्रुत्युक्तरीत्या संन्यासिन एव मुक्ता भवेयुः किल इति शिष्यस्य सन्देहं निघ्नन्नाह गुरुः - केवलं ज्ञानमेव मोक्षकारणमिति।	2.164	220
165	बन्धोत्तीर्ण महामते सुरतरुर्वह्निश्च	क्लेशादिकं जीवकृतमेव न त्वीश्वरकृतमिति दर्शयति।	2.62	157
166	बुद्धब्रह्मस्वरूपा अपि जडमतिवत्	ब्रह्मविदः संसारेऽस्मिन् व्यवहरन्ति इत्युक्तम्। एवं चेत् इतरलौकिकवत् तेषामपि कर्मबन्धः स्यादेव। तत्कथं तेषां मुक्तिरिति संशयं छेत्तुमाह।	1.94	114
167	ब्रह्मच्छाया भवति हि गुणेष्वेषु सर्वेषु माया	एवं प्रकारान्तरमस्तीति दर्शयित्वा सामान्यतः सृष्टिक्रमं पुनरेवाह।	1.25	74
168	ब्रह्मध्यानेन मुक्तिर्यदि भवति गुरो	तत्तद्ध्यानं तत्तत्तनुकरं चेत् ब्रह्मध्यानेनैव ब्रह्मीभावसिद्धौ किं विचारेण इति शङ्कामनूद्य निरस्यति।	2.87	173
169	ब्रह्मश्रीपतिशङ्कराः प्रतिदिनं संपूजिताः	जीवन्मुक्तसमाराधनं परं श्रेयःसाधनमिति श्रुतयोऽपि वदन्तीत्याह।	1.95	115
170	ब्रह्मस्वरूपास्मरणं त्वबोधः	क्रमेण तासामवस्थानां स्वरूपमाह, द्वाभ्याम्।	1.52	90
171	ब्रह्मात्मज्ञानहेतौ जगति न भविता	सुषुप्तौ यदनुभूतं तत्कथं जाग्रदवस्थायां जीवो जानातीति पृच्छति शिष्यः।	2.127	198
172	ब्रह्मात्मैक्योत्थितं यन्निरतिशयसुखम्	हर्षोन्मादाच्च गुरुचरणकमलयोर्न्नमतितराम्।	2.177	228
173	ब्रह्माद्याः सर्वदेवा जगति च सुधियः	सर्वे देवाः, सर्वे ऋषयः, गङ्गाद्याः सर्वाः पुण्यसरितः, सर्वे वेदाः इत्येतत्सर्वं मिथ्या इति कथनेनैव पापं स्यादिति शङ्कते शिष्यः।	2.92	176
174	ब्रह्मैकत्वं गतानामिह जगति सतामावपुःपातमेषाम्	चेतः सच्चिदब्धौ लीनं चेत् जीवन्मुक्तस्य कथं प्रारब्धभोगः इति शिष्यः पुनः पृच्छति।	2.20	131
175	ब्रह्मैवाहं मां न जानामि चेत्तन्मद्रूपम्	ब्रह्मैवाहम् इति बोधे अहम्पदार्थः ज्ञायते। परं ब्रह्मपदार्थः कः इति न ज्ञायते इत्यतः तं निरूपयति।	2.166	221
176	ब्राह्मं विज्ञानमेतत् कथमिव भविता	इदं ब्राह्मं ज्ञानं कोऽहंविचारलभ्यम् इत्याह।	2.64	158
177	भवति मुकुरबिम्बे यन्मलम्	दृष्टान्ते दोषं प्रदर्श्य सन्देहं निवर्तयति।	2.70	161

178	भस्त्रीवद्भमनोद्यते मरुति	वृत्तिनिरोधाय उपायान्तरमाह।	2.171	224
179	भिन्ना शक्तिमतो न शक्तिरपि	मायाशक्तिर्ब्रह्मणोऽभिन्ना इति कथयति।	2.99	180
180	भूतेषु पञ्चसु गुणत्रयमस्ति नित्यम्	लिङ्गशरीरं किंस्वरुपं कथञ्चोत्पन्नमिति दर्शयति।	1.30	77
181	भ्रमिरात्मनो ह्यबोधो नास्ति	उक्तमर्थं लौकिकोदाहरणेन विशदयति त्रिभिः पद्यैः।	1.55	91
182	मच्चेतःस्थित सद्गुरो परमतो	तुरीयातीतावस्थां पृच्छति शिष्यः।	2.145	210
183	मत्स्वान्तैकमहालयस्थित गुरो	ज्ञानादेव मुक्तिश्चेत् कस्मात् पण्डिता अपि सुलभं ज्ञानमार्गं त्यक्त्वा घोरे कर्ममार्गे निपतन्तीति पृच्छति शिष्यः।	2.53	151
184	मदीयं शरीरेन्द्रियाद्यं समस्तं	करुणार्णवेन गुरुणा मम अन्तर्विद्योतमानेन ज्ञानज्योतिषैव मदीयम् अज्ञानजातं समस्तं निराकारितम्। तस्मै ज्ञानमूर्तये नम इति पुनरपि आत्मनः गुरुशरणतां प्रकाशयति।	प्रस्तावना ४	58
185	मनःसङ्कल्पोत्थं जगदिदमशेषं निवसति	प्रज्ञानघन एवाहं ब्रह्मेति दर्शयति।	2.168	222
186	मनोऽपि नात्मा करणत्वतो धीः	मनआदिकोशेभ्योऽपि भिन्नः आत्मा इति दर्शयति।	1.61	94
187	मनोन्मनीध्यानविधूतपाप्मनः	स्वीया कृतिः महात्मनां हृदयमधिरोहतु इति कविः प्रार्थयति ।	2.182	231
188	मन्त्रज्ञेन गते पिशाचनिवहे	यद्यपि निस्संशयोऽहं साक्षिमात्रः स्वस्वरूपे परमानन्दे लग्नः तथापि विज्ञानस्य द्रढी-करणाय किञ्चित् मम विज्ञाप्यमस्तीति शिष्यः सविनयं दृष्टान्तप्रदर्शनपूर्वकं निवेदयति।	2.6	123
189	मन्दे न्यासः कोऽपि पापे	विरक्त्यनुसारं संन्यासभेदानाह।	2.161	219
190	मर्त्येष्वेतेषु योगी नृप इव च सुरेष्वेव	यथा मर्त्येषु नृपः योगी इत्यादिभेदाः दृश्यन्ते तथा विष्ण्वादिषु अपि शक्तिकृत-भेदो दृश्यते। एताः सिद्धयः सर्वाः मायिकाः। सिद्ध्यभावेऽपि ज्ञानी इश्वराभिन्नः बोध-स्वरुपत्वादिति दर्शयति।	2.43	146
191	मां विज्ञाय जडं गुरो हृदि भवान्	त्वमपि सुपूर्णं त्वां वेत्सि चेत् तव कल्प-कालेऽपि विहतिः नूनं नास्ति इति गुरु-वचनं मनसि कृत्वा शिष्यः पृच्छति	1.14	68

192	मान्यानां मान्यपादाम्बुज गुरु-चरणानन्दाः	आनन्दस्य कति भेदाः इति पृष्टः अष्टधाऽऽनन्द इत्याह।	2.122	195
193	माया नाम कथंविधा परिगताः	मायामधिकृत्य षट् प्रश्नान् इति शिष्यः।	2.95	178
194	माया मिथ्या तत्प्रसूतानि मिथ्या	मायिकमिदं तुच्छभूतं विस्मृत्य सच्चिदानन्द स्वरुपे ब्रह्मणि स्यास्त्वम् इति शिष्यमादि-शति गुरुः।	2.91	176
195	मिथ्या सत्यमिति प्रमूढमनसः	नामरुपात्मकं पाञ्चभौतिकमिदं सर्वं मृषैव। सच्चिदानन्दस्वरूपं ब्रह्मैव सत्यम् इति कथयति।	2.94	177
196	मिथ्याकारैव शक्तिः कथमिय-मुदयम्	किमर्थमागता माया इति प्रश्नस्योत्तरमाह	2.100	181
197	मुक्तानां भोगकाले प्रविहितमपि यत् कर्म	प्रारब्धभोगकाले क्रियमाणस्य कर्मणः फलं जन्मान्तरस्य कारणं भवेदित्याशङ्कां परिहरति।	1.97	116
198	मुक्तिप्रदान मुनिनायकमानवेषु	ईश्वरीयाः अणिमादयः योगसिद्धयः कथं ज्ञानिनोऽपि भवन्तीति प्रश्नं समाधत्ते।	2.44	146
199	मुख्यार्थस्य विरोधो यत्र भवति	तत्त्वमसीतिवाक्यार्थज्ञानाय लक्षणा आवश्यिकी इति सामान्यतो लक्षणास्वरुप-मभिदधाति।	1.71	101
200	मोक्षाकारे सुपूर्णे परनभसि शिवे	वृत्तिज्ञानं किल मुक्तिरुपस्य स्वरुप-विज्ञानस्य साधनम्। मुक्त्यवस्थायामपि वृत्ति ज्ञानं शिष्यते चेत् कथं मुक्तिरिति शङ्का अस्थाने! यतः वृत्तिज्ञानम् अज्ञानं नाशयति। तेन अज्ञानेन सहैव विलयं याति च; यथा पङ्कप्रसाधनाय क्षिप्तं कतकं पङ्केन सहैव अपयाति तथेत्याह।	2.88	174
201	म्लेच्छानामपि योगभूमिरुदिता	म्लेच्छा अपि ज्ञानभूमिगताः मुक्ता भवेयुरिति यदुक्तं तत्र सन्दिहते शिष्यः।	2.158	217
202	यत्पादाम्बुरुहामृतानि पिबताम्	कविः गुरुं कृष्णानन्दयतीश्वरं प्रणमति।	2.181	231
203	यत्राव्यक्तेऽखिलतनुभृतो वासनाभिः	अध्यासपरम्परां मूलतो वक्तुमाह।	1.22	72
204	यदीयवाक्सूर्यरुचिप्रणाशितः	भाष्यकृतः भगवत्पूज्यपादान् प्रणमति।	गुरुवन्द-नम् ३	54
205	यद्भानन्नित्यमेतत्सत इह निजतः	सता वस्तुना स्वयं चिद्रूपेण भाव्यम् इत्यत्र युक्तिं प्रदर्शयति।	2.142	207

206	यद्वच्चुम्बकभूधरस्य पुरतोऽकर्तु-र्ह्ययश्चेष्टते	तत्र महाकर्तृलक्षणमाह।	2.25	134
207	यस्य प्रसादान्मयि भातमेतन्मि-थ्येति	गुरुवन्दनं विदधाति यस्य प्रसादादिति।	प्रस्ता-वना ३	57
208	यस्याङ्घ्रिपद्मविगलन्मकरन्दसारः	प्रकरणान्तरं प्रारभमाणः दक्षिणामूर्ति-वन्दनं विधत्ते ग्रन्थकारः श्रीशङ्कुकविः।	2.1	120
209	यातस्वप्नकथां वदन्ति हि यथा	यावत् चिदाभासस्य चिति लयः तावदियं व्यवहृतिर्भवेदेव। नैषा दोषायेत्युत्तरयति।	2.32	139
210	यावज्ज्ञात्रादिभेदस्त्वयि भवति	कियत्पर्यन्तं श्रवणाद्यभ्यासः कार्य इत्याह।	1.86	109
211	ये पूर्वत्र गता विरूढिमथ ते	तानेव प्रकारभेदानाह।	2.155	215
212	योगानन्दोऽयमेव श्रुतिवचन-विचारोत्थिता	अमुमेव अभिज्ञाः योगानन्दः इति विदुः। अत्र स्त्री पुमानिति,सद् असदिति,बहिः अन्तः इत्यादयो द्वन्द्वधर्मा न सन्तीत्याह।	2.126	197
213	रज्जौ सर्पवदर्करश्मिजलवत् स्थाणौ नरभ्रान्तिवत्	एवम् अध्यारोपापवादन्यायेन भानमेव सत्यं जगन्मिथ्येति प्रदर्श्य प्रकरणमुपसंहरन् स्वस्व-रूपे सन्तिष्ठस्वेति शिष्यमादिशत्याचार्यः।	1.101	118
214	लोके तारं प्रदर्श्य प्रकटमथ जनः	ब्रह्मस्वरूपं दर्शयितुं स गुरुः, लोके प्रथमं स्थूलं प्रदर्श्य, क्रमेण सूक्ष्मस्य बोधने यः प्रकारः उपादीयते तं स्वीकर्तुमैच्छदित्याह।	1.18	70
215	वत्सायाह्यपि मामकं शृणु	अखण्डचितिरूपोऽहम् इति निश्चयज्ञान-मेव संसारनिवर्तकं भवतीत्युपदिशति।	1.12	67
216	वन्ध्याजस्थाणुमर्त्यौ गगनतरु-सुमस्रक्	तेषां सर्वोऽपि सांसारिको व्यवहारः तुच्छकथैव इति दर्शयति।	2.90	175
217	वल्लीशस्य ममापि तात जगतः संरक्षक	सच्चिदानन्दपदानाम् एकार्थता कथमिति पृच्छति शिष्यः।	2.135	203
218	वस्तु स्वप्नगतं समस्तमपि तन्मिथ्येति	एतत्सर्वं स्वप्नाभमिति कथने नैव दोष इत्याह गुरुः।	2.93	177
219	वस्त्रतन्तुकिरीटकुण्डलनिष्क-काञ्चनकुण्डिका	सत्तामात्रमहं, चिन्मात्रमहम् इति ज्ञानमेव अपवादस्य फलमिति दर्शयति।	1.40	82
220	वह्नौ वायौ कृपीटे जगति च मणिमन्त्रौषधैः	ब्रह्मणि लीनः स्याः चेत् माया स्वयं शाम्येदित्याह।	2.103	183
221	वाक्ये छन्दोगगामिन्यपि किल	तद्विद्यासुखमेव तुरीयावस्थेति तत् स्तौति।	2.179	229
222	वाचां सुदूरमिति या परतत्त्वमाह	वाचामगोचरं परतत्त्वमिति, वेदान्तवाक्यैरव-सेयमिति उभयमपि वाक्यं यथार्थमित्याह।	2.9	125

223	वाच्यावीश्वरजीवकावभिहितौ	क्रमेण तत्त्वमसिवाक्यार्थवर्णनाय उपक्रमते।	1.59	93
224	विक्षेपशक्तिपरिकल्पितमेव सर्वम्	विक्षेपकार्यं मुक्तिबीजं चेत् शुक्तिरजतमिव विक्षेपकार्यत्वात् मुक्तिरपि असद्भानं स्यादिति शङ्कामुत्थाप्य परिहरति।	1.49	88
225	विक्षेपावृतिसंज्ञयोरतिजडात्सञ्ज्ञा-तयोस्त्वम्	मुक्तिबीजमिति कृत्वा विक्षेपशक्तिः प्रथम-मुक्ता। इदानीम् आवरणशक्तिं निरूपयितुं शिष्यकृतप्रश्नमुखेन उपक्रमते।	1.41	83
226	वित्तेभ्यो दयितः सुतस्तनुरतो-पीष्टा	सर्वस्यापि प्रियतमं वस्तु आत्मैवेति दर्शयति।	2.119	193
227	विद्ध्यागमेन परतत्त्वमिति स्ववाचा	तामेव जिज्ञासां प्रकाशयति।	2.7	123
228	विवेचनं वच्मि शवोपमानम्	तच्च विवेचनं कथं कर्तव्यमित्याह।	1.60	94
229	वृक्षो व्यष्टिः स्यादरण्यं समष्टिः	समष्टिव्यषटिवशेन भेदः कथमिति लौकिकं व्यवहारं दर्शयन् समर्थयति।	1.37	80
230	वृत्तिज्ञानमिदञ्च वृत्तिजनितं हन्यात्तदीयं मलम्	स्वरूपज्ञानं वस्तुतन्त्रं भवति। वृत्तिज्ञानं तु पुरुषतन्त्रमित्यनयोर्भेद इत्याह ।	2.82	169
231	वृत्तेः फलस्य विकृतिं हृदयं वदन्ति	एवं लौकिकदर्शनस्य परतत्त्वदर्शनस्य च भेदं प्रदर्श्य कथं मनसोऽप्यगम्यं वस्तु मनसा द्रष्टुमादिश्यते इति द्वितीयं संशयं निरस्यति वृत्तेः फलस्येति।	2.15	128
232	वृद्धत्वे द्रव्यहेतोः स भवति दयितः	एतेभ्योऽपि भूयस्तरं प्रियं प्रत्यगात्मन्येवेति दर्शयति।	2.120	193
233	वेषप्रच्छन्नगात्रा जगति कतिपये	विचारेणैव ज्ञानं लभ्यते, न कर्मणा इति समाधत्ते।	2.67	160
234	वैराग्यं भक्तिपूर्वं त्रिदशपुरगतिम्	वैराग्यं, स्वर्गतिः, अणिमादिसिद्धयः, सालोक्यम् इत्यादि सर्वं दातुं कर्म शक्नोति तदेव कर्म कस्मात् ज्ञानमपि न दद्यात्? विचारेण किम्? इति शिष्यः पुनः पृच्छति।	2.66	159
235	व्यष्टिष्वेतासु जीवो यदि च परिगतः	जीवेश्वरयोः स्वरूपावस्थानादिकं कथयति।	1.32	78
236	व्यापारे सत्समाधिर्यदि भवति तदा	जीवन्मुक्तः असक्तः सन् विषयेषु व्यवहरति इत्युक्तम्। असङ्गश्चेत् कथं व्यवहारः? व्यवहरति चेत् कथं समाधिः? इति शिष्यः पृच्छति।	2.23	133

237	व्यामोहाख्यमहान्धकारपटली-चण्डार्ककोट्याकृते	श्रुत्यन्तवाक्यैः ग्रदुक्तं तद्गुरुकृपया सम्यगवगत्य युक्त्या तद् द्रढयितुं पुनरप्युपदेशाय याचते शिष्यः।	2.140	206
238	व्योमैकमेव जलदाम्बरमित्य-थाऽन्यत्	तत्त्वमसिवाक्यार्थवर्णनस्य भूमिकात्वेन चैतन्य-चतुष्टयं निरुपयति।	1.58	92
239	शक्तिर्विक्षेपनाम्नी समभवदथ सा	अथ विक्षेपशक्तेः सूक्ष्मशरीरोत्पत्तिं वर्णयति।	1.29	76
240	शमो दमश्चोपरतिस्तितिक्षा	द्वाभ्यां शमादीनाह।	1.2	61
241	शान्ताहन्तामलस्य व्यपगतकल-नस्य	मुख्यानन्दं लक्षयन् स निजानन्दाद् भिद्यते इति दर्शयति।	2.131	200
242	शार्दूलोऽप्यनुकूल एव भविता	अन्येषु सुखसाधनेषु अनुकूलवेदनत्वं प्रिय-कारणं भवति। आत्मनि न तथा। अतः आत्मा प्रेमस्वरुप इति जानीहि इत्याह।	2.121	194
243	शिवाकार स्वामिन् प्रथिततपसः	तपसा सिद्धीः लभन्ते चेत् समेषां ज्ञानिनां सिद्धयो भवितव्याः। परं, केषाञ्चन ज्ञानिनां सिद्धयः न दृश्यन्ते। तत् कथम् इति पृच्छति शिष्यः।	2.45	147
244	शीतं श्रीगुरुपादपद्मसलिलं मूर्ध्नाऽनिशं बिभ्रताम्	इदं शास्त्रतीर्थं गुरुतीर्थेन समस्तपुण्यनदीतीर्थेन च तुल्यं मोक्षप्रदं भवतीत्याह।	2.180	230
245	शीतस्वच्छद्रवास्ते पयसि विदधते	त्रीण्यपि सच्चिदानन्दपदानि एकमेव लक्षय-न्तीत्याह। ब्रह्म, जगतः सुतरां भिन्नमिति दर्शनाय तथा जाड्यादयो धर्माः ब्रह्मणो नैव भवन्तीति बोधनाय सत्यानन्दप्रकाशान् ब्रह्मणः लक्ष्मत्वेन कथयति श्रुतिरित्याह।	2.136	204
246	शुद्धं सत्त्वं स्वरुपं किल यदि रजसा	अरुपनाशे मनसः चित्तत्वमेव नष्टं भवतीत्युच्यते।	2.22	132
247	श्रीगुरुचरणद्वन्द्वं वन्देऽहम्	ग्रन्थारम्भे गुरुवन्दनं विदधाति ग्रन्थकृत्।	गुरुवन्द-नम् १	53
248	श्रीमच्छारीरभाष्यादिकसकल-महाशास्त्र	अखण्डबोधस्वरुपं कैवल्यमत्र विषय इत्याह।	प्रस्ता-वना ६	59
249	श्रीमन् देशिक यत् त्रिभिश्च करणैः	पूर्वमुक्तं कर्म अज्ञानं न दहतीति।अधुनो-च्यते वृत्तिज्ञानं दहतीति। वृत्तिज्ञानं नाम मानसं कर्मैव किल। एवञ्चेत् कर्मैव किल अज्ञाननाशकमिति शिष्यः पृच्छति।	2.81	169

250	श्रुतिं युक्तिं युक्तामिव तव वदेयं ह्यनुभवम्	अनुभवश्च श्रुत्या युक्त्या च सङ्गच्छते इत्याह।	2.143	208
251	श्रुत्वेत्थं पुनराह शिष्यवचनं श्रीमानसौ देशिकः	सत्वप्रधानस्य मनसः निश्चलीकरणं विवक्षुः भूमिकात्वेन मनसः त्रिगुणात्मकत्वं प्रतिपादयति।	2.17	129
252	षण्णां न्यूनाधिकसमतया संस्थितानां रसानाम्	महाभोगवतः महात्यागवतश्च लक्षणमाह।	2.26	135
253	संलग्नघोरभवरोगनिवृत्त्युपायम्	शिष्यस्य सर्वात्मना गुरुप्रपत्तिं वर्णयति द्वाभ्याम्।	1.9	65
254	संवित्पावकमेत्य नश्यति पुराऽविद्याशरीरं वपुः	जीवन्मुक्तस्य शरीरनाशः कथं भवतीत्याह।	1.98	116
255	संवित्पूर्णाहमेषा मतिरिरिति हृदये	सर्वोऽयं जाग्रति जायमानः जगदनुभवः स्वप्नवन्मृषैवेति,अखण्डबोधस्वरूपोऽहमिति, निश्चयमेत्य नित्यानन्दस्वरूप आस्ते।	2.174	226
256	संसारे यावदाशा भवति जडधियः	अखण्डानन्दबोधस्थितिसम्पादने वैराग्यं साहाय्यमाचरतीत्याह।	2.107	186
257	संस्मृत्यातीतजन्मव्रजकृतसुकृताघौघमुच्छोकपङ्क्तेः	कालत्रितयेऽपि सन् जीवः इति सूक्ष्मं पश्य। सत्त्वं ज्ञायते इत्याह ।	2.114	189
258	सङ्ख्याय मोहेन नवैव पूर्वम्	यथा 'दशमस्त्वमसि' इत्युदाहरणे दशमः स्वमदृष्ट्वा स्वस्य स्थाने शून्यं दृष्ट्वा बभ्राम; तदनु पान्थेन स्वयं स्वं द्रष्टुमुपदिष्टः अपश्यदात्मानं तथा त्वमपि सावधानं स्वमुपधारय इति उपदिशत्याचार्यः।	1.64	96
259	सङ्गोत्पन्नसुखं त्रिपुट्यपि शुगित्याज्ञाय	ब्रह्मानन्दस्य स्वरूपमाह।	2.125	197
260	सच्चित्सुखं सकलमद्वयमेकमाद्यम्	एवं, पञ्चकोशाद् भिन्नमात्मस्वरूपम् इति ज्ञात्वा आत्मनो याथात्म्यं चावगम्य मुक्तो भवेरित्याह।	1.62	95
261	सत्वं भवति विशुद्धं रजस्तु	गुणवैचित्र्याद् विकारजातस्य जगतो वैचित्र्यमिति दर्शयितुं गुणस्वरूपमाह।	1.23	73
262	सत्वापत्तिपुरातनेषु च पदेषु	स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयाद् इति रीत्या ये आद्यासु तिसृषु भूमिषु प्रविष्टाः तेषां श्रेय एव भूयादित्याह।	2.156	216
263	सत्यं ज्योतिर्महत्तत्परमपदमजम्	श्रुतिः, विधिमुखेन निषेधमुखेन च, अनेकैः पदैः, ब्रह्म लक्षयतीति दर्शयति।	2.137	204

264	सत्यानन्दचिताञ्च लक्ष्म भगवन् ब्रूहीति चेदुच्यते	सदादीनां लक्षणमाह ।	2.112	188
265	सत्यानन्दचिदम्बुधावपि तथा	शुद्धे ब्रह्मणि कर्तृत्वशोकित्वादिकमध्यस्तम्। तादृशस्य अज्ञानस्य दाहकं ज्ञानमेव; न पुनः कर्मेत्याह ।	2.71	162
266	सत्स्यादेव चितिर्न चेदपि मृषा तत्साक्षिकम्	सत् चित् आनन्दः इति त्रयोऽपि एक मेवेति दर्शयति।	2.141	207
267	सम्पूर्णत्वं मम कथमिति प्रोच्यते श्रूयतां तत्	सम्पूर्णत्वं कथं ज्ञायते इत्युच्यते।	2.167	222
268	सर्प एष न रज्जुरेव न रूप्यमेव हि शुक्तिका	सोदाहरणम् अपवादमार्गं दर्शयति।	1.39	81
269	सर्वत्र वत्स गगने सति कूपखा-तात्	एवं विदेहमुक्तिमभिधाय, त्वमपि सदा ब्रह्मणि अद्वितीये लीनः भव इत्युपदिशति शिष्यम्।	1.100	118
270	सर्वे जीवास्त्वयमिति गुरो प्रोक्तवानस्य मोक्षे	यदि सर्वमिदमेकात्मकं तर्हि एकेन मुक्तेन सर्वेषां मुक्तिः कथं न भवतीति पृच्छति शिष्यः।	2.38	143
271	सहस्रश्रुत्युक्त्या विमलतरयुक्त्या च भगवन्	भोगेनैव कर्मनाशः इति चेत् ज्ञानाग्निः सर्वं सञ्चितं कर्म नाशयेदिति कथम्? स्फुटं भासमानः परस्परविरोधः कथं परिहरणीयः इति प्रष्टुमुपक्रमते शिष्यः।	2.49	149
272	सा पञ्चमी तु षष्ठी	सप्त ज्ञानभूमीः नाम्ना निर्दिशति द्वाभ्याम्।	2.150	212
273	साधो त्वं शृणु तत्त्वविद्व्यव-हृतिर्लोकोपकारक्षमा	सैषा मुक्तस्य व्यवहृतिः लोकोपकाराय कल्पते इत्याह।	2.36	142
274	साधो श्रीगुरुनाथ सर्वतनुभृत्सा-मान्यम्	ईश्वरस्य सृष्टिः समाना चेत् कस्मात् सः कांश्चन अनुगृह्णाति,अन्यांश्च क्लेशयति इति शिष्यस्य सन्देहं निरस्यति।	2.61	156
275	सृष्टिस्थित्यन्तहेतोरपि कमल-भवाधोक्षजेशान	तदेव आद्यं ज्योतिः अखण्डबोधस्वरूपम् अस्ति। नान्यत् किञ्चित्। तस्मिन्नेव ज्योति-षि सर्वमिदं जगत् मायिकं भासते इत्यतः तदेव परमकारणं ज्योतिः स्तौति।	प्रस्ता-वना २	57
276	सेत्थंभूतस्वरूपेत्यभिगदितुम्	क्रमेण समाधत्ते।	2.96	178
277	सेयं विक्षेपशक्तिर्बहुविधजगतः संविधात्री	आवरणशक्तिरेव बलीयसी दुःखदात्री चेति दर्शयति।	1.47	87
278	सोऽयं द्विज इति वाक्ये	जहदजहल्लक्षणाम्, अत्र विशिष्य उपयोगि-त्वेन, विशदयति।	1.73	102

279	स्थाने ते विशयः शृणुष्व कथये	स्थान एव त्वदीयः संशयः इति शिष्य-मभिनन्द्य संन्यासस्य चातुर्विध्यमाह।	2.159	217
280	स्थित्वा चिराय परमाम्बररूप-मात्रः	चिरकालात् प्रबुध्य शिष्यः गुरुं पप्रच्छेत्याह।	1.78	105
281	स्थूलाभिमानी खलु विश्व उच्यते	स्थूलशरीरे उपहितयोः जीवपरेशयोः नाम-दशादिकम् उच्यते।	1.35	80
282	स्मरन्ति न गतं तथा मनसि भाविदृष्टेः पुरः	ब्रह्मविदः द्वन्द्वातीताः सर्वत्र समबुद्धयश्च भवन्तीति दर्शयति।	1.91	112
283	स्यात्प्रीतिर्विषये परं निजसुखे	सुखसाधनेभ्यो विषयेभ्यः, प्रियतर आत्मा सुतरां भिद्यत इति दर्शयति।	2.117	191
284	स्वञ्च स्वाधारमीशं भुवि विबुधवरः	जन्मक्षतये उपायः पृष्टः किल शिष्येण। तमाह।	1.13	67
285	स्वच्छादर्शगतं मलं करतली	कथं तदिति शिष्यः पृच्छति सयुक्तिकम्।	2.69	161
286	स्वज्ञानानतिरिक्तपूर्णवपुषः सच्चित्सुखाख्या गुणाः	सर्वे जीवाः सच्चिदानन्दरूपाः इत्यत्र सन्देहः। आनन्दरूपता जीवानां कथं तुल्या भवेदिति सन्दिहानः शिष्यः पृच्छति।	2.108	186
287	स्वरूपं सत्त्वाख्यो गुण इह हृदो द्वावथ परौ	मनसः निसर्गतः सत्वप्राधान्यं भवतीत्यतः तस्य निश्चलत्वसम्पादनं क्रमात्कर्तुं शक्य-मेवेति दर्शयति।	2.18	130
288	स्वरूपज्ञानं यन्न दहति सुषुप्ता-वपि तमः	सुषुप्तावपि स्वरूपज्ञानम् अज्ञानं न दहति। किन्तु वृत्तौ लग्नं ज्ञानं दहति। तत्कथमिति प्रश्नमुत्थाप्य सोदाहरणं समाधत्ते।	2.80	168
289	स्वर्णक्षेत्रवधूस्पृहासहितहृत्तन्मुक्त चित्तात्मनाम्	जीवब्रह्मैक्यबोधकं शास्त्रं प्रारभमाणः सर्वेषां जीवानां हृदाकाशे सदा भासमानम् अखण्डा-नन्दस्वरूपं परं ज्योतिः नमस्करोति।	प्रस्ता-वना १	56
290	स्वाचार्योक्तस्वतत्त्वप्रवणतरमनाः	आचार्यस्य आदेशानुसारम् आचरितवतः शिष्यस्य ब्रह्मानुभूतिर्जातेत्याह।	1.76	104
291	स्वामिन्! तत्त्वपरायणा अपि बुधाः	यथा जागरणं स्वाप्नव्यवहारनिवर्तकं तथा तत्त्वज्ञानम् अज्ञाननिवर्तकं भवतीत्युक्तम्। एवञ्च तत्त्वज्ञानिनः संसारव्यवहृतिः न भवेत्। तत्त्वपरायणा अपि व्यवहृतिमन्तश्चेत् विकृतिः ब्रह्मापि बाधते किम् इति मे सन्देहः इति पृच्छति शिष्यः।	2.31	139
292	स्वामिन्ममान्तःस्थितघोरवासना-निशाप्रणाशोदितचण्डभानो	तद्वचःप्रकारमाह स्वामिन्निति।	1.79	105
293	स्वेष्टाहारे वधूनामभिमतगमने	रागतः कर्मादौ प्रवृत्तिर्भवति। तत्र तदनु-शासनं नावश्यकम्। एवं सति अनुशिष्यते चेत् अभिमतमन्यदिति ज्ञेयमित्याह ।	2.75	165
294	स्वोपमानपरमेश्वरं विना	आवरणस्य स्वरूपं तत्कार्यञ्च कथयति।	1.42	83

Appendix II

Scanned copies of a few pages of *RSV1* edition

श्री शङ्करकवि विरचितम्

॥ कैवल्यनवनीतम् ॥

WITH AN INTRODUCTION BY

Mahamahopadhyaya

Sri. N. S. Ananthakrishna Sastriar

of the Calcutta University.

Published by

R. Subrahmanya Vadhyar & Sons,

BOOK-SELLERS & PUBLISHERS,

KALPATHI-PALGHAT

Price] [As. 8.

Publishers' Note.

Kaivalya Navaneetha is a very popular Vedanta work in Tamil-Poetry. The fact that this precious work is available in Sanskrit in manuscript, was very recently brought to our notice by one of our esteemed and revered friends, who chooses to remain anonymous. Due to his courtesy in handing over the manuscript to us we have now immense pleasure in presenting the edition to the public.

Our thanks are due to Sriyuta Mimamsa Siromani Somasundara Deekshitar of the Chittur Veda Sastra Pathasala for his untiring efforts to carry the book through he press and to Mahamahopadhyaya N. S. Ananthakrishna 'astriar of the Calcutta University for his generous response our request to furnish a foreword which has added to the alue of the book.

ॐ

कैवल्यनवनीतम् ॥

श्रीगुरुचरणद्वन्द्वं वन्देऽहं मथितदुःसहद्वन्द्वम् ।
भ्रान्तिग्रहोपशान्तिं पांसुमयं यस्य भसितमातनुते ॥

एकान्तसंनिहितमीदृशमात्मतत्त्वं
लोका विमूढमतयो बत नाद्रियन्ते ।
आकाशगोचरमशेषजगत्प्रकाशं
घूका न भास्करमुदीक्षितुमुत्सहन्ते ॥

यदीयवाक्सूर्यरुचिप्रणाशितो हृदन्धकारो नमतामशेषतः ।
महात्मनः शिष्यहिते सदा रतान् नमामि तान् शङ्करपूज्यदेशिकान् ॥

अमृतमतुलनित्यानन्दसान्द्रस्वरूपं
विदितसकलवेदान्तार्थतात्पर्यनिष्ठम् ।
मृदितसकलदोषं मोक्षकामैः सुसेव्यं
गुरुवरमहमीडे कृष्णसंज्ञं यतीन्द्रम् ॥

तत्त्वप्रदीपः ॥

नित्यानित्यविवेचनं प्रथमतस्तत्साधनं तत्पर-
श्चेहामुत्रविराग एव पठितः पश्चाच्छमाद्या अपि ।
मोक्षेच्छेति च सूरिभिर्जगदिदं मिथ्येति सत्यं परं
ब्रह्मैवेति विनिश्चयो भवसुखास्वादे विरक्तिः परा ॥ १ ॥

शमो दमश्चोपरतिस्तितिक्षा श्रद्धा समाधानमितीह षट्कं ।
लक्ष्यैकतानत्वमुशन्ति शान्ति चित्तस्य बाह्यार्थविनिग्रहो दमः ॥ २ ॥

न्यासं वदन्त्युपरतिं सहनं शुचां यत्
क्षान्तिं च देशिकवरोदितशास्त्रमार्गे ।
श्रद्धाऽतिविश्वसनमात्मपरैक्यमात्रे
धीस्थापनं खलु वदन्ति समाधिमार्याः ॥ ३ ॥

त्यक्त्वा साधनसञ्चयं नहि भवेत् साध्यः प्रबोधो नृणां
तस्मात्साधनशालिनामिह भवेद्ब्रह्मात्मबोधोदयः ।
प्रत्यग्रस्य हि साधकस्य न भवेत् स्याच्चेत्कचित् कस्य चित्
जन्मस्तोमशतैः कृतेन तपसेत्येवं सतां निश्चयः ॥ ४ ॥

कश्चित्कोटिशतेषु देहिषु नरो देहोत्थितैर्व्याधिभि-
र्दैवादापतितैरथाक्षजनितैर्भूतोत्थितैर्भौतिकैः ।
दुःखैर्नित्यमुपीडितोऽर्ककिरणैस्सन्तप्तकीटो यथा
भीतस्संसृतिमोक्षणाय चकमे प्राप्तुं स्वतत्त्वामृतम् ॥

एषोऽधिकारी सुतदारवित्तवाञ्छा विलूयैण इवाथ जालम् ।
धावन् समित्पाणिरशेषतत्त्ववेत्तारमेवाप गुरुं शरण्यम् ॥ ६

नत्वा तिष्ठन् स गुरुसविधे मूर्ध्नि बद्धाञ्जलिस्सन्
प्राह स्वामिन्विषयगरलैर्मायिकैर्दूनदूनः ।
छित्वा कोशान् हृदयमपि मे साधु शीतं विधातुं
श्रीमन् बोधामृतशिशिरया मां गिरा बोधयेति ॥ ७

कमठझषवयांसीवादरात् स्मृत्युदीक्षा-
च्छदयुगपुटमध्यस्पर्शनैर्दीक्षयित्वा ।
अमुमथ गुरुराह त्वज्जनिं मार्जयिष्या-
म्यहमपि मम वाक्यं श्रूयते चेत् सुभक्त्या ॥ ८

संलग्नघोरभवरोगनिवृत्त्युपायं
वक्तर्यथो गुरुवरेऽमृतमग्नवत्सः ।
आर्द्राङ्गकोऽक्षिविगळत्सुखवारिपूर्णः
प्राह प्रणम्य पुनरेव विनीतगात्रः ॥ ९

त्वद्वाक्यश्रवणाक्षमोऽपि भगवन् कारुण्यदृष्ट्या विभो
स्वाधीनं प्रविधातुमत्र किल मां को वा प्रयासस्तव ।
त्वज्जन्मक्षतयेऽस्त्युपाय इति यन्मां प्रत्यवोचः पुरा
तत् स्वामिन् सपदि प्रदर्श्य कृपया मां रक्ष रक्षेति च ॥

Appendix III

Foreword to the *RSV* editions

(by MM. N. S. Ananthakrishna Sastri)

।। भूमिका ।।

कैवल्यनवनीतमिदं बहोः कालाद् द्राविडभाषायामेव लब्धप्रचारमतिप्राचीन शुद्धद्राविडभाषायां निष्णातानामेव पठनपाठनादियोग्यं सदध्ययनाध्यापना भ्यसनादिप्रसङ्गेन विशेषत आत्मानन्दानुभवनिदानमासीत्। विश्वसिमः कैवल्यनवनीतानध्ययनात् सर्वेऽप्यध्यात्मचिन्तकाः स्वानुभूतिमार्गात् सत्यमेव प्रतार्यन्ते। कैवल्यनवनीतं नाम कैवल्यशास्त्रस्यातिगभीरस्य क्षीराब्धिसमानस्य मथनेन भगवदनुग्रहेण भक्तानामेव कृते परिवेष्यमाणः कैवल्यरस एव। सर्वदाऽप्ययं रसो नवनव एव पुनः पुनरुपयुज्यमानो वाऽनुपयुज्यमानो वा न केवलं नवनीतभावावस्थायाम्, किन्तु घृतभावावस्थायामपि नवनीतमेव भविता। अत एव ग्रन्थकारा इमे - नवनीतेऽप्यत्र षष्ठे श्लोके प्रस्तावनायां "कैवल्यसर्पिरि" ति, सप्तमे च श्लोके "कैवल्यपूर्वनवनीतमि"ति च व्यवहरन्ति। सांप्रतं तु संस्कृताभिज्ञानामपि विशेषत आनन्दानुभवावसरः संस्कृतभाषामयस्याप्यस्य निबन्धरत्नस्य प्रकाशनेन सर्वानपि भारतीयानेतन्निबन्धरत्नप्रकाशनार्थं बद्धदीक्षाः प्रकाशकप्रवराः अधमर्णयन्तीति।।

अस्य हि द्राविडभाषामयस्य कैवल्यनवनीतस्य कर्ता श्री ताण्डवमूर्तिस्वामीति रङ्गस्वामिमुतलियार्द्वारा प्रकाशिताद् द्राविडभाषामयात् पुस्तकाज्जानीमः। तेऽपि संस्कृतभाषायामतीव निपुणा आसन्निति तद्व्याख्यातारः प्रथमश्लोकस्यावतारकाले निरूपयन्ति। ततो जानीमो वयं कौवल्यनवनीतमिदं संस्कृतभाषायाम् अपि बहोः कालाद्वर्तत इति। को नाम तस्य कर्ता? को हि

तस्य गुरुः? कीदृशं च तत्पुस्तकम्? इत्यादिकमन्धकारपथ एवैतावत्पर्यन्तमासीत्। सांप्रतं तु प्रकाश्यमानेनानेन पुस्तकेन प्रदीपरत्नेन सर्वेऽप्यन्धकारा अस्तं गमिता इति महदिदमानन्दकारणम्। अस्य हि संस्कृतभाषामयस्य निबन्धस्य कर्ता श्रीशङ्कुककविरिति -

"महाफलं शङ्कुककवेरियं कृतिर्महात्मनां कर्णवतंसतामियात्" इत्यन्तिमेन श्लोकेनावगच्छामः। एतद्गुरवस्तु श्रीकृष्णानन्दसरस्वत्य इति तत्पूर्वतनेन-

"कृष्णानन्दयतीश्वरो विजयते कृत्स्नप्रबोधाकरः" इति श्लोकतुरीयपादेन निश्चिनुमः। कृष्णानन्दयतीश्वरोऽयं को वेति नेदानीं वक्तुं पारयामः। एतावत्तु सूचयितुं शक्यते विमर्शकानां सौकर्यार्थम् - सिद्धान्तसिद्धाञ्जनकाराः कृष्णानन्दयतीश्वरा एवैतस्य निबन्धस्य कर्तार इति व्यवस्थापनायां नानौचित्यलेशोऽपि भविष्यति। निबन्धरत्नस्यास्य शब्दार्थगभीरताप्रसादादिकं सर्वमपि तदनुगुणमेव वर्तते।।

अत्र हि ग्रन्थे प्रकरणद्वयं वर्तते - तत्त्वप्रदीपः, संशयान्धकारप्रदीप इति च। प्रथमे प्रकरणे शतं (१००) श्लोकाः, द्वितीये त्वेकाशीत्युत्तरशतं (१८१) श्लोकाः सन्ति। तत्र प्रथमं प्रकरणं श्रवणम् द्वितीयं तु मननम्। साधनचतुष्टयसंपत्तिः, गुरूपसर्पणं च प्रथमं श्रवणाङ्गमादितोऽष्टादशभिः श्लोकैः प्रतिपाद्यते। श्रवणं तु नाध्यारोपापवादाभ्यां तत्त्वोपदेशः "अध्यारोपादि" त्येकोनविंशश्लोकमारभ्य प्रस्तूयते।।

ब्रह्मणि शुद्धचैतन्ये स्थूलसूक्ष्मकारणशरीराणां व्यष्टिरूपाणामारोपेण जाग्रत्स्वप्नसुषुप्त्यवस्थापन्नो जीवो नाम त्वंपदार्थः, तत्रैव समष्टिरूपाणां तेषामेवाध्यारोपेण तत्पदवाच्यार्थ ईश्वरः, तत्प्रसङ्गेन कारणशरीरातिरिक्तयोः शरीरयोर्द्वयोः सत्त्वरजस्तमोगुणात्मकावरणविक्षेपशक्तिमदज्ञानकार्ययोरुत्पत्तिक्रमः, जीवेश्वरयोर्भेदाभेदादिकं बहुतत्त्वजातं प्रथमप्रकरण आलोच्यते। अत्र च जीवेश्वरयोर्विश्वतैजसप्राज्ञभेदेन विराड्हिरण्यगर्भान्तर्यामिभेदेन च त्रैविध्यम्, तुरीयं तु शुद्धचैतन्यं जीवेश्वरयोरधिष्ठानमिति बोध्यते। तच्च शुद्धं चैतन्यं "अथात आदेशो नेति नेती" त्यपवादविधयैव बोधयितुं शक्यत इत्यध्यारोपितानां जीवेशानामेवापवादविधया शुद्धचैतन्ये विलयबोधनद्वारा निष्कृष्टचैतन्य

मात्रस्यावशिष्यमाणस्यैव लक्षणया बोधनार्थं "तत्त्वमसी"ति महावाक्यमित्यादि महावाक्यार्थोपदेशेनैव प्रकरणं इति सुष्टूक्तं श्रवणपरमेव प्रथमं प्रकरणमिति।।

अत्र च प्रसङ्गे ग्रन्थकारा घटाकाशघटगतजलाकाश मेघाकाशमेघगतजलाकाश भेदेनाकाशचातुर्विध्यप्रक्रियामिव जीवचातुर्विध्यप्रक्रियामपि पञ्चदशीप्रकरणादिगतां संगृह्णन्ति। अद्वैतसिद्धान्तानामतिसूक्ष्माणां ग्रहणधारणादौ वेदान्तसारपञ्चदशी प्रकरणादिबहुतरग्रन्थानामध्ययनेन संभाव्यमानं सर्वमपि कैवल्यनवनीतस्यास्यातिसरलस्य गभीरार्थबहुलस्योदाहरणशतपरिपोषितस्य चाध्ययनेन भवतीति नेयमतिशयोक्तिः।।

तदेवं स्थालीपुलाकन्यायेन प्रथमं प्रकरणमधिकृत्य किञ्चिदिव निवेदितम्। सांप्रतं द्वितीयं प्रकरणमधिकृत्यापि किञ्चिदिव सूचयामः। श्रवणेन ह्यज्ञानमात्रं निरस्यत इति "तत्त्वप्रदीपः" इति प्रथमस्य प्रकरणस्य नाम। संशयविपरीतभावने तु निवर्त्येते मननेनेति "संशयान्धकारप्रदीपः" इति प्रकरणान्तरस्य नाम। इदमेवाभिप्रेत्योक्तम् -

परे तत्त्वे ज्ञाते निभृतमनुभूतिं द्रढयितुं
प्रवक्ष्ये सन्देहप्रशमनसमाख्यं प्रकरणम् ।। इति।

अनेन प्रकरणेन - ब्रह्म वेदान्तवेद्यम्, अवाङ्मनसगोचरमिति च कथं न विरुद्धमिति प्रथमः प्रश्नः, प्रमाणान्तरावेद्यम्, वेदान्तेनापि वृत्तिमात्राभास्यम्, न तु घटादिव तत्प्रतिफलितचैतन्यभास्यमिति चतुर्दशभिः, श्लोकैर्व्यवस्थापितम्। अनन्तरं तु मनोनिग्रहोपायः, जीवन्मुक्तानां मुक्तानामुभयेषां च समानेऽपि मनोनाशे जीवन्मुक्तानां तस्य सरूपनाशो विदेहमुक्तानां चारूपनाश इति द्वेधा मनोनाशो व्यवस्थापितः। अनन्तरं जीवन्मुक्तानां ब्रह्मात्मना सर्वं विजानतामपि कथं भोगः? कथं संसारिभ्यो भोगे समानेऽपि विशेष इत्यादि समालोचितम्। ततस्तु समानेऽपि कर्तृत्वे संसारिणां जीवन्मुक्तानां च संसारिणामेव प्रकृत्येषणाहन्तादिवशानां बन्धः, न तु जीवन्मुक्तानामिति विवेचितम्। किं बहुना? संसारिणां जीवानां च दृश्यमानं साम्यमेकैकस्मिन्नपि व्यवहारे परास्य तेषां विवेकव्यवस्थापनं हि द्वितीयप्रकरणस्य मुख्यो विषयः। येन जीवब्रह्माभेदासंभावनाविपरीतसंभावने सुदूरमपगच्छतः।।

ब्रह्मविद्याप्रकरणग्रन्थेषु सर्वत्र सत्यं प्रत्यक्षादिप्रमाणादिविचारः, जीवेशानां कर्मकर्तृत्वतदाराध्यत्वादिविचारा बहवः क्रियन्ते, परन्तु सर्वेऽपि ते विचारा

ब्रह्मविद्यापूर्वाङ्गभूताः, न ब्रह्मविद्यांशतां भजन्ते। अत एव कैवल्यनवनीतेऽत्र केवलं ब्रह्मविद्यांशभूता एव विचारा अवतार्यन्त इति कैवल्यशास्त्रत्वाविशेषेऽपि प्रकरणान्तराणां पूर्वोत्तराङ्गजातबाहुल्यान्मिश्रमेव कैवल्यशास्त्रं तानि प्रकरणानि। इदं तु कैवल्यनवनीतं केवलं ब्रह्मविद्याप्रकरणम्।।

अत्र च "सर्वे ब्रह्म वदिष्यन्ति संप्राप्ते तु कलौ युगे"इति वचनानुसारं ब्रह्मविद्याप्रकरणं न दुरुपयोगं नेतुमर्हतीत्येव द्वितीयप्रकरणे संसारिजीवन्मुक्तविदेहमुक्तानां विशेषाः प्रतिपाद्यन्ते। तथा च यावदेषणात्रयं यावद्देहात्माभिमानं च "अहं ब्रह्मास्मि" इत्यादिशब्दोच्चारणमात्रेण 'परोपदेशे पाण्डित्यमि' ति नीत्याऽन्येषामेव कृते वेदान्तोपदेशादिना स्वकार्येषु परं सांसारिकेषु जागरूकाः साधनचतुष्टयसंपत्तिरहिताश्च स्वीयं लोकप्रतारणं कार्यं विशेषतस्तत्र तत्र कुर्वाणाः कैवल्यनवनीतस्यास्य सम्यगध्येतॄणां विषये न कृतार्था भतिष्यन्तीति सादरं सूचयामः - यदन्ततो गत्वा परोपदेशपाण्डित्यनीत्याऽन्येभ्यो य आत्मनः प्रतारणं न कांक्षन्ति, तेषामिदं कैवल्यनवनीतप्रकरणं स्वानुभवैकशरणं विशेषत उपकुर्यादेव।।

अस्य हि निबन्धरत्नस्य भाषासौष्ठवम्, शय्या, शब्दमाधुर्यम् द्राक्षापाकश्च स्वानुभवैकवेद्यमिति सर्वाङ्गसुन्दरमिदं महात्मनः कस्यचन स्वानुभवैकनिदानमिति श्री शङ्कुकविनाम्ना प्रसिद्धोऽस्य निबन्धस्य कर्तापि न केवलं महात्मनां कृष्णनन्दसरस्वतीनामन्तेवासी, किं तु स्वयमपि महात्मैव।।

केचन तु मन्यन्ते द्राविडभाषामयस्य कैवल्यनवनीतस्य संस्कृतभाषामयस्य चास्य कर्तैक एवेति। इदं तु मतमप्रमाणम्। ताण्डवमूर्तिस्वाम्येव शङ्कुकविरप्यासीदित्यत्र हि न किमपि प्रमाणं ग्रन्थमध्यादन्यतो वा वयमधिगच्छामः। निबन्धयोरनयोः संस्कृतभाषामयमेव मूलम्, द्राविडभाषामयं तु तस्यैवानुवादरूपमिति मम प्रतिभाति। इदमेव द्राविडभाषामयस्य कैवल्यनवनीतस्य व्याख्याताऽत्रभवानरुणाचलस्वाम्यपि मन्यते। प्रथमश्लोकोपक्रमणिकायां द्राविडभाषामयकैवल्यनवनीतस्य कर्तारं संस्कृतभाषायामपि विशेषतो निष्णातं वदन्, तद्वर्णनस्य हि प्रयोजनमस्यैवोभयकर्तृत्वेन वा स्यात्, अथवा संस्कृतभाषामयस्य दर्शनेन द्राविडभाषामयस्य रचनमिति व्यवस्थापनेन वा। आद्यस्तु पक्षः संस्कृतभाषामयोऽत्र शङ्कुकवेः कर्तृत्ववर्णनान्नावतिष्ठत इति द्वितीये पक्ष एव

पर्यवसानम्। यदि तु केचन श्री शङ्कुकविरित्यपि श्री ताण्डवमूर्तिस्वामिन एव नामान्तरमिति प्रदर्शयिष्यन्ति प्रमाणजातेन, तर्हि वयमपि तन्मतमेव तत्रानुसरिष्यामः, नास्माकमत्राग्रहविशेषः कस्मिन्नपि मते। सर्वथा त्वनेन पुस्तकेन प्रकाश्यमानेन प्रकाशका इमे स्वार्थत्यागिनो नितरामेव धन्याः, सर्वोत्तमर्णाश्च। एतादृशानां निबन्धरत्नानां गुप्तानां प्रकाशनेन पण्डितकुलमुपकुर्वन्तः पालघाट् पुस्तकालयाध्यक्षाः श्री सुब्रह्मण्यशास्त्रिणस्तनूजा रामस्वाम्यार्याश्च विशेषतो धन्यवादानर्हन्तीति साम्प्रतमत्रैव लेखोऽयं समाप्यते।

इति पण्डितकुलाधमर्णः

अनन्तकृष्णशास्त्री

महामहोपाध्यायः

Calcutta,

4.6.'40

KAIVALYANAVANĪTAM
OF
ŚAṄKUKAVI

Edited with *Kṛṣṇapriyā* commentary
By
N. K. Sundareswaran

I have great pleasure to write a foreword to this important work *Kaivalyanavanītam* of Śaṅkukavi, critically edited along with an original commentary called *Kṛṣṇapriyā* by Dr. N. K. Sundareswaran. Originally composed in Tamil by Tāṇḍavarāya Svāmikaḷ (around 16th CE) it was rendered into Sanskrit by Śaṅkukavi, a Kerala poet whose identity yet remains to be established.

The authenticity and possible date of this Sanskrit work and the question of the identity of these two teachers of Advaita are all discussed at length in this edition by the present editor.

The *Kṛṣṇapriyā* commentary adds to its value as a source book of Advaitavedānta. The prose order, meaning of words and explanations given in the commentary are useful and make the text easier to understand. By bringing out this volume Dr. Sundareswaran has become an essential contributor to the vast area of Advaita literature.

Prof. K.N. Neelakantan

Publication Division
University of Calicut

ISBN 819473803-2

9 788194 738039

Price ₹ 250